KIRATARJUNIYAM

CANTO I.

Edited with
Introduction, Notes, Translation, &c

BY

Prof. Kshitish Chandra Chattopadhyaya, M. A.

To be had of

SEN, RAY & CO,

BOOK SELLERS & PUBLISHERS,

15 College Square, Calcutta

1934

Printed at the Calcutta Oriental Press, Ghose Machine
Press, Vidyodaya Press and Rudra Printing
Works and Published by N. N.
Banerjee, M. A., B L

61/B, Ram Kanta Bose Street, Calcutta.

PREFACE TO THE FIRST EDITION.

The present edition of the Kiratarjuniyam with the commentary of Mallinatha is intended mainly for the B. A candidates of the Calcutta University. All the grammatical and rhetorical peculiarities have been fully explained and everything calculated to be serviceable to the student has been brought together from different sources.

The text of the commentary is based on the following Mss and printed editions :

1. A Ms. in the Govt. Sanskrit College Library, Calcutta. It is written in Devanagari character and generally correct. It has been of the greatest use to me in supplying correct readings in doubtful cases It is designated A.

2 A Ms belonging to the Asiatic Society, Bengal in Bengali characters, complete but not correct. It is designated B

3 A Ms. in the library of the Govt. Sans. Coll, Calcutta, containing extracts from the commentary of Mallinatha. It has been designated C.

4 Madanapala's edition of 1814 A D

5. The excellent edition published by the N. S Press, Bombay

In a few cases, however, I have ventured to suggest other readings Almost all the quotations in Mallinatha's commentary have been traced and verified

For the elucidation of the text, two other commentaries have been constantly consulted—the सारावली of हरिकण्ठ and the शब्दार्थचन्द्रिका of चित्रभानु. The last named book has recently been published by the Travancore government and deserves

to be carefully studied by every serious student of Sanskrit literature.

Free English translations of the slokas are given under the head 'English.' The literal renderings will be found under 'English Equivalents,' and 'Analysis.'

Special thanks are due to Dr. I J S. Taraporewala, B.A , Ph. D., Bar-at-law of the Calcutta University for his great kindness in reading the manuscript and making many suggestions for the improvement of the book , to Pandit Sitaram Shastri of the Calcutta University and Prof Bhagavat Kumar Shastri, M A. of the Hugly College for advice on several points , and to Prof A C Dutt, M A , Bar-at-law for permission to use the excellent metrical translation of the poem by his illustrious father, the late Mr R C Dutt.

PREFACE TO THE NEW EDITION

Since the first edition was published more than a decade ago, the editor's views on Sanskrit Grammar have undergone a radical change and the book would have been much less burdened with grammatical lumber if it had been written anew The ordinary student is advised to shun all the fanciful derivations that have been proposed by different schools of grammarians and concentrate his attention on the literary beauties of the poem which Bharavi has left as a perpetual possession to posterity The teacher and the advanced student will find in many cases questions of grammar treated from the standpoint of the historian and realise how the rules of Panini have been

turned and twisted by later writers who were blissfully unconscious of the fact that language like all human institutions is liable to change and that it is absurd to apply the rules of Panini to justify forms which came into use centuries after the death of the celebrated grammarian For my part I would take the bull by the horns and derive प्रभाव with the help of the suffix घञ् added to the root भू preceded by the उपसर्ग प्र, instead of having recourse to the periphrasis प्रकृष्टो भाव. However as already stated the principle enunciated above has not been followed in this book and it is hoped that readers will find all that they require in the following pages

In this edition the very valuable commentary of Asadharabhatta on Mallinatha's introductory portion has been reprinted from an excellent article published in the Calcutta Oriental Journal with the kind permission of the writer and copious extracts have been given from two unpublished commentaries of sterling worth As the present edition has been hurried though the press in a very short time it is likely that there will be several typographical errors but it is hoped that none of them will be found to be of a serious nature

With the exception of the Calcutta Oriental Press, the other presses in which different portions of the book have been printed did not possess types with diacritical marks, so the transliterations of Sanskrit words in this edition leave much to be desired.

———

ABBREVIATIONS.

B. C.—Buddha Charitam.

D. R.—Dasakumara Charitam.

G. M.—Ganaratna Mahodadhi.

Hi.—Hitopadesa

Kan—Kautilya's Arthashastra.

K. D.—Kavyadarsa

K N —Kamandakiya Nitisara

K P.—Kavya Prakasa.

Nai.—Naishadhiyam

N. S —Nitisatakam of Bhartrihari

P. R.—Prataparudra Yasobhushanam.

Ra—Ramayanam.

Si—Sisupalavadham

S T.—Sukranitisara.

सि. कौ —सिद्धान्तकौमुदी ।

1/3—1st person plural in the case of roots and nom. pl. in the case of substantives

———

INTRODUCTION

Personal History of Bharavi

"Bhāravi ranks as second in magnitude among the constellations of the Kāvya" and though it is doubtful if he received from his contemporaries the homage due to his genius, posterity has always been kind to him and regarded him as a great poet (महाकवि) He has been praised for the depth of meaning contained in his poem, and his poem has been studied, commented on, quoted and imitated by a large number of devoted admirers

Of his personal history, nothing certain is known to us It is said that in his youth his genius was not recognised and unable to secure the patronage of kings, Bhāravi like most men of letters had to spend his days in misery and degradation

Goaded by the taunts and reproaches of his wife he one day set out for the royal court, and on his way he felt tired and rested on the banks of a lake There he happened to meet the king and at his request he wrote the well-known verse

"सहसा विदधीत न क्रियाम्
अविवेक परमापदा पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धा स्वयमेव सम्पद ॥" [कि० २।३०]

Do nothing rashly. want of circumspection
Is the chief cause of failure and disaster
Fortune, wise lover of the wise, selects
Him for her lord who ere he acts, reflects.

The king was highly pleased and asked the poet to meet him on his return to the capital, and rode away The poor poet thought better days were dawning for him and went to the king's palace in high hopes only to be turned away by the porter who mistook him for a loafer from his shabby dress

Meanwhile the king returned to his capital and had the verse inscribed in letters of gold in his bedroom Long afterwards one day on returning to his bedroom before his appointed time he found a youth lying by the side of his queen on his bed His first impulse was to put an end to his faithless wife and her lover but as he raised his sword the verse on the wall caught his eye and made him halt Then on enquiry he found that the youth was none other than his long lost son Filled with gratitude for the poet who had saved him from an act which would have embittered the remainder of his life, he soon sought him out and lavished riches on him beyond his wildest dreams

According to the Avantisundarīkathā and its epitome in verse by Dandin recently unearthed and published by M Ramakrishna Kavi, Bhāravi was the grand father of Dandin, the celebrated poet and rhetorician with whom he had come down from the North to Kanchipore and lived under the patronage of the Pallava kings Mahendravarman and Narasimhavarman in the beginning of the 7th century This date no doubt agrees with the known date of Bhāravi, and moreover Durvinīta who is also mentioned in the Avantisundarīkathā as the person with whom Bhāravi resided for a while is known to have reigned at the beginning of the

7th century and is well known as having commented on the 15th canto of Bhāravi's poem Still the Avantisundarīkathā does not appear from internal evidence to have been the work of Daṇḍin and it is difficult to accept the posteriority of Dandin to Bhāravi

The name of Bhāravi occurs in the Aihole Inscription dated 634 A D and that of his poem is also found in later inscriptions The Kāśikā quotes from Bhāravi and Prabhākara the celebrated Mīmamsā scholar also quotes from him Kumāradāsa in his Jānakīharana often imitates Bhāravi and Bhatti's description of the autumn as also of the dawn and the debate are clearly based on Bhāravi His influence on Māgha is manifest in every canto of the Śiśupālavadha, but "Bāna ignores him, so that he can hardly have preceded him long enough to compel recognition It is, therefore, wiser to place him c A D 550 than A D 500 " *From the fact that Bhāravi's description of the Himalayas is rather tame and from the use of his vigorous simile (XVIII 5)of the huge violent billows of the ocean beating in vain against the side of the Sahya mountain† it has been surmised that Bhāravi was a southerner Had he been familiar with the northern regions he would hardly have let slip the splendid opportunity of describing the regions lying between the Dvaitavana and the Indrakīla mountain while sending his hero there

The Kirātārtjunīyam is the only work of Bhāravi

* Keith, History of Sanskrit literature.

† उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः ।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥

that has come down to us Several verses, however, not found in the Kirātārjunīyam are attributed to Bhāravi in the anthologies etc Thus in the Saduktikarnāmrta two verses are attributed to our poet

येन ध्वस्तमनोभवेन बलिजित्काय॰ पुरास्त्रीकृतो
यो गङ्गां च दधेऽन्धकक्षयकरो यो बर्हिपत्रप्रिय ।
यस्याहु शशिमच्छिरोहर इति स्तुत्यं च नामामरा
योऽव्यादिष्टभुजङ्गहारवलयस्त्वा सर्वदो माधव ॥

I 33 3

This verse is found in the Sarasvatī Kanthābharana II 81, Kāvyaprakāśa VII 302, Sāhityadarpana X 14 It is also given anonymously in Subhāsitāvali 44 Of course the readings are slightly different

सोद्वेगं करिकृत्तिवाससि भवद्व्रीडान्वित ब्रह्मणि
त्रैलोक्यैकगुरावनादरवलात्तारं शचीभर्त्तरि ।
त्रासामीलितपद्म भास्वति लसत प्रेमप्रसन्नं हरौ
क्षीरोदोत्थितया श्रिया विनिहतं चक्षु॰ शिवायास्तु व ॥

I 67 I

The following verse is attributed to Bhāravi in Nārāyanabhatta's commentary on the Vrttaratnākara

क्वचिदग्रे प्रसरता क्वचिदाप्लुत्य निम्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषा कुलम् ॥

Bharavi's Popularity

We have already said that it is doubtful if Bhāravi enjoyed the homage of his contemporaries. It would

appear from a verse in canto XIV that a certain section of people did not praise his works

स्तुवन्ति गुर्वीमभिधेयसम्पदं
विशुद्धिमुक्तेरपरे विपश्चित· ।
इति स्थिताया प्रतिपूरुषं रुचौ
सुदुर्लभा· सर्वमनोरमा गिर ॥

Some people extol the great wealth of meaning while others speak highly of the purity of diction. Thus when the taste of each man differs, words that give universal satisfaction are rare indeed

With this we may compare Bhavabhūti's references to his own work

ये नाम केचिदिह न प्रथयन्त्यवज्ञा
जानन्ति ते किमपि तान् प्रति नैष यत्न ।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्यय निरवधिर्विपुला च पृथ्वी ॥

Again,

यथा स्त्रीणा तथा वाचा साधुत्वे दुर्जनो जन ।

But later on Bhāravi was held in high esteem as is evident from the well-known slokas

तावद्भा भारवेर्भाति यावन्माघस्य नोदय· ।
उदिते नैषधे काव्ये क्व माघ क्व च भारवि· ॥
उपमा कालिदासस्य भारवेरर्थगौरवम् ।
नैषधे पदलालित्य माघे सन्ति त्रयो गुणा· ॥

Bharavi's Style

Bhāravi's style though more laboured than that of Kālidāsa is generally clear and manly In spite of the saying अपशब्दशतं माघे भारवौ तु शतत्रयम् his language is generally free from errors of grammar Though we often find grammarians racking their brains to defend such forms as उपारताः पश्चिमरात्रगोचरात्, निरीक्ष्य मेने शरदः कृतार्थताम्, आजघ्ने विषमविलोचनस्य वक्षः etc, still such lapses are very rare and with the solitary exception of आजघ्ने all of them can be defended.

His writing, at its best, is प्रसादरम्य, yet ओजस्वि, गरीयः yet लाघवान्वित As R C Dutt remarks "Bhāravi is by a long way inferior to Kālidāsa in all the qualities which make a great and a true poet In the richness of poetic fancy, in true tenderness and pathos, and even in the sweetness and melody of verse, Kālidāsa is incomparably a greater poet But nevertheless Bhāravi boasts of a vigour of thought and language, a spirited and lofty eloquence in expression, which Kālidāsa seldom equals"

His similes are often far less attractive and natural than those of Kālidāsa One of these (v 39) gained for him the style of आतपत्रभारवि or छत्रभारवि because he compared the lotus dust driven by "the winds to the

Goddess Laksmī's parasol* Following in the foot-steps of Kālidāsa, he has used grammatical similes also, but they are far less effective than those of Kālidāsa

In the 15th canto of the Kirātarjunīyam, Bhāravi "sets himself to try *toars de force* of the most foolish kind, redolent of the excesses of the Alexandrian poets Thus one verse has the first and third, second and fourth lines identical, in another all four are identical, one has practically only *c* and *r*, another only the letters s, ś, y and l, in other stanzas each line reads backwards the same way as the next or the whole stanza read backwards gives the next, one stanza has three senses, two no labial letters, or each verse[9] can be read backwards and forwards unchanged But at least he eschewrs long compounds and taken all in all is not essentially obscure "+

In the first canto we are introduced to Yudhisthira in exile receiving the spy whom he had sent to report on the doings of Duryodhana He bears the unwelcome tidings that the king is walking in the ways of virtue and charming the hearts of the people As soon as she learns of this, Draupadī, his spirited wife urges

---

* उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः ।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ॥

* Keith, History of Sanskrit Literature

* For many other such lāñchanas see Calcutta Oriental Journal Vol 1 No 2 pp 57-73

* Calcutta Oriental Journal Vol 1 p no 7 pp 241-248

him to break the treaty with his cousins and to win back his kingdom With the burning eloquence of a proud and wronged woman, she points out to him that peace and submission ill become a Kṣatriya, that faith is not to be kept with the faithless, that kingdom and glory are not won by meekness and resignation

---

The story of the Kiratarjuniya*

Bhāravi's Kirātarjunīya is based, as usual, on the epic. The Mahābhārata tells us how, when the Pāndavas with their wife Draupadī have retired under their vow of twelve years' banishment to the Dvaita forest, Draupadī, with truly feminine faithlessness, urges the heroes to break their pledge A council is held, Yudhisthira pleads for the bond, Bhīma controverts his contentions Vyāsa counsels retirement from the Dvaita forest, and the brothers go to the Kāmyaka wood where Yudhisthira takes the prudent course of bidding Arjuna, as a preliminary to war, to secure from Śiva divine weapons Arjuna obeys, practises in the Himālaya severe penances, meets and struggles with a Kirāta, who proves to be Śiva himself, he grants the boon desired, to which the other gods add further largesses This theme Bhāravi has chosen to expand and illustrate with all the resources of a refined and elaborate art The opening shows at once the hand of the artist, in the epic the discussion of the brothers arises merely from the dreary plight in which they are placed, Bhāravi begins instead with the return of a spy whom Yudhisthira has sent to report on the deeds of Suyodhana—as he is always styled, he bears the unwelcome tidings that the king is walking in the ways

*This is taken from Dr Keith's excellent History of Sanskrit Literare which the student is advised to read thoroughly

of virtue and charming the hearts of people Hence, naturally, Draupadī, anxious for the future, taunts Yudhisthira with his inglorious plight and urges swift battle (i) Bhīma adds his support , Yudhiṣthira, the unready, has scruples of honour (ii), but seeks counsel from Vyāsa, and the sage admits that war must be, but, since the foe is so strong urges that Arjuna should by penance in the Himālaya win Indra's aid He vanishes, but a Yakṣa appears to lead Arjuna on his way, and they depart, cheered by the good wishes of the remainder of the party (iii) At this point the poet's invention displays itself in elaboration , just before, by omitting all mention of the move to the Kāmyaka wood, he, had shortened the narrative, improving greatly the effect , now he takes the opportunity to display the poet's command of language In Canto IV the Yaksa leads Arjuna on ,and a brilliant picture is drawn of the autumnal scene, partly in narrative, partly in the mouth of Yaksa Then follows (v) the description of the Himālaya itself, the Yaksa lays stress on the mystery which guards it and on its close kinship with Śiva and Pārvatī, and vanishes after bidding Arjuna do penance on Indrakīla The penance of Arjuna terrifies the Guhyakas, the spirits who haunt Indrakīla , they appeal to Indra to aid them, and he sends Gandharvas and Apsarases to disturb the asceticism which menaces the quiet of his mountain (vi) The heavenly host speeds through the air to Indrakīla and makes there its camp , their elephants merit special description (vii) The Apsarases now leave their palaces, just made by their magic power, and

wander in the woods to pluck the flowers, then the Ganges invites them to the bath, and the bathing scene is described with much charm and beauty (viii) Evening comes, the sun sets, the moon arises—the banal theme wins new effect through the poet's skill, the nymphs and their lovers drink and seek the pleasures of love, the day dawns (ix) The Apsarases now turn their minds to their task, aided by the seasons who now appear six in number to second their efforts, they expend, but in vain, all their charms on the young ascetic (x) Seeing his minions thus foiled through Arjuna's constancy, Indra appears himself in the guise of a sage, admires the fervour of the penance, but contends that to bear arms and practise asceticism are inconsistent, Arjuna admits the logic of the censure, but assert that he will do all to save his family's honour Indra is touched, reveals himself, and bids him win the favour of Śiva (xi) Here ends the poet's invention, and we again find the epic as his source, Arjuna continues his penance in order that Śiva may bless him, the seers in distress appeal to the great God, who expounds to them Arjuna's divine nature as an incorporation of Nara, a part of the primeval spirit, a demon Mūka in boar form plans to slay him, therefore Śiva bids his host follow him to guard the prince (xii) The boar appears to Arjuna, it falls pierced by his own and Śiva's dart, the prince advances to recover his arrow, but is challenged by a Kirāta who claims it in his master's name (xiii) Arjuna rejects the demand in a long speech, the Kirāta returns, and Śiva launches, but in vain, his host against Arjuna, who endures

unscathed the shower of their arrows (xiv) The host is rallied from flight by Skanda and Śiva himself, who then begins a deadly battle of arrows with Arjuna (xv) The two then strive with magic weapons, the hero is beaten (xvi), but grasps again his bow, and with sword, mighty rocks, and the trunks of great trees assails the God, but all in vain (xvii), They box, at last they wrestle , Śiva reveals his true form, and the hero humbled at last, praises the greatness of the God and begs him for strength and victory , the God and the world guardians, who come to the scene, accept his devotion and give him the magic weapons that he craves



Draupadi's Remonstrance*

King Yudhishthir had lost his kingdom and had retired into forests with his wife and brothers He sent a forester to observe how his foe ruled the kingdom The forester returned, gave a glowing account of Duryodhan's administration Yudhishthir's wife listened to this account with a woman's jealousy, and counselled instant war to recover the lost kingdom.

I

Sent to Kuru-land to fathom
 How Duryodhan ruled his men,
He,—a dweller of the forest,—
 Came once more to Dwaita's glen
Freely to the King Yudhishthir,
 He Duryodhan's glories told,
For they love not fulsome lying,
 Those who serve the true and bold
Strong of heart, the exiled monarch
 Urged the spy his tale to tell,
Rich in language, deep in import,
 Clear the words that from him fell !

II

"Who by King of men is trusted
 Loves not to deceive his lord,
Pardon, then, if free my accents —
 Seldom true is honeyed word !

---

*From the late R C Dutt s "Indian Poetry '

False the friend who basely flatters,
False the King who brooks a lie
Only those who join in virtue
Conquer Fortune's favours high
I, a dweller of the woodlands,
Deep designs but dimly trace
If I comprehend the foeman,
'Tis, O monarch, by thy grace !

Seated on the throne of nations,
Still he dreads thee, exiled lord,
Realm, by trick of dice he conquered,
Rules by righteous deed and word.
And with seeming virtue vested
Still he apes thy inborn grace,—
Better war with open foeman
Than communion with the base !

Veiling well his pride and passion
Manu's path he seeks to tread,
Toiling noon and dewy evening
Kuru's glories strives to spread
And he treats as friends his menials,
Treats his friends as nearest kin,
While a semblance of affection
Darkly hides his thoughts within !

Still with equal love the monarch
Courts each kingly virtue well,—
Varying graces sought and conquered
In his heart harmonious dwell
Bounty speaks his royal kindness,
Gifts with royal favours flow,

And his presents, never ceasing,
Only men of virtue know
Not for profit, nor in anger,
But to guard the righteous cause,
On his foe or on his children
Visits sin with equal laws
Trusty are his palace soldiers,
Dauntless are his brow and face,
Bounteous are his sacrifices,
Endless is his royal grace
And his plans devised by wisdom,
And pursued with silent toil,
Spreads for him a happy future,
Bless the children of the soil

III

"Cars and steeds of warrior-chieftains
Throng his palace halls around,
Tuskers sent by friendly monarchs
With their perfume fill the ground
Kuru-lands are rich in harvests,
Ripening without tiller s toil
Ask no rain, since Kuru's monarch
Showers his blessings on the soil
And his rule of peace and plenty
Blesses towns and fertile fields!
And impregnate with his bounty
Earth her ample produce yields
Chieftains from each town and castle
Warriors famed in toil and strife,
Muster, not aginst their monarch,
But to guard him with their life

And his spies can darkly fathom
Deep device of rival kings;
His device,—like work of Nature,—
Is revealed by fruit it brings
Never bends his bow in battle.
Frowns his forehead never shade,
For his rule his subjects cherish
Like a garland on their head

Aye, upon his gallant younger
He hath placed his regal might
Saint-like, from the world retiring,
He performs each holy rite !

Conqueror of all his foemen,
Lord of earth begirt by sea
Master of a rule unbounded,—
Still Duryodhana quakes at thee,
Let his courtiers name Yudhishthir,
Speak of Arjun's might of arm,
And the monarch bends his forehead
Like a snake subdued by charm !

Bent is he to do thee battle,
Be prepared thy foe to meet,—
This, O King, my humble message,
Such, I lay it at thy feet "

IV

Then the woodsman, honoured duly,
Went his way o'er hill and dale,
And Yudhishthir to his consort
Told once more the wond'rous tale

Dark remembrance of her insults
In her heaving bosom woke,
And, to rouse her husband's anger,
Drupad's daughter proudly spoke.

V

"Counsel to a sapient monarch
Is rebuke from woman weak,
But ignoring wifely duty,
Pardon, if my feelings speak
Mighty warriors, thy forefathers
Held their rule o'er Kuru's land,
But, as tuskers cast their garlands,
Thou hast hurled it from thy hand !
Weak are they who with the wily
Deal not with responsive wile,
For like darts on mail-less warriors
Artful foemen on them steal
Weak art thou who hast forsaken
Glory of thy ancient house —
More than life by warriors cherished,
Dearer than their wedded spouse !

VI

"Godlike man ! Now sadly treading
Paths despised by proud and free,
Doth not rising wrath consume thee
As the flames consume the tree ?
Men spontaneous yield to heroes
Who have will to face their foes,
But for faint, forgiving creatures
Love nor friend nor foeman knows !

Sandal-graced was royal Bhima.—
Dust-besmeared he roams the hills
Scarce I know, O soul of virtue,
If thy heart with pity thrills.
Conqueror of northern nations,
Arjun scattered wealth and gold,—
Mark him now, O Saintly hermit,
Bark-clad, sleeping on the wold
And the twins, thy youngest brothers,
Princes born and great and good,—
Mark them roaming in the jungle,
Even like tuskers of the wood !

Scarce I guess thy feelings, monarch,
Strange and diverse are our hearts,
Bur reflection on thy sorrow
Cruel grief to me imparts
Erst my lord from royal slumber
Waked to hear the song of praise,
Now outstretched on jungle heather
Hears the cry the jackals raise
Erst on food by Brahmans tasted
Lived my king of mighty name,
Now he feeds on forest berries
Pale and lightless—like his fame !

On thy feet, on jewels resting,
Vassal kings their blossoms dropped,
Now they range the thorny wood-lands
By the deer or hermit cropped.
Most I grieve,—insulting foemen
Mock thy low, dejected state,—

Heroes win a higher glory
If they strive with adverse fate !

VII

Conquer back thy glory,
Vengeful schemes devise,
Anchorites, not heroes,
Meek forbearance prize
For if kings and chieftains
Bore their insults tame,
Lost were worth of warriors
Lost were monarch's fame !
Or if patient suffering
Still for thee hath charms,
Prate thy hymns like hermits,
Leave these kingly arms !
But a higher duty
Fits thy royal fame
Break this plighted treaty,—
Treaty of our shame
Monarchs bent on conquests
Fasten on their foe
Blame for breach of treaty,—
Blame for war and woe
Pale from loss of glory,
Weak from loss of might,
Rise like sun in splendour,—
Quell this darksome night !"

———

Draupadi's First Speech*

(Mahābhārata III 27).

ततो वनगताः पार्थाः सायाह्ने सह कृष्णया ।
उपविष्टाः कथाश्चक्रुर्दुःखशोकपरायणाः ॥

प्रिया च दर्शनीया च पण्डिता च पतिव्रता ।
अथ कृष्णा धर्मराजमिदं वचनमब्रवीत ॥

न नूनं तस्य पापस्य दुःखमस्मासु किञ्चन ।
विद्यते धार्तराष्ट्रस्य नृशंसस्य दुरात्मन. ॥

यस्त्वां राजन् मया सार्धमजिनैः प्रतिवासितम् ।
वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत दुर्मतिः ॥

आयसं हृदयं नूनं तस्य दुष्कृतकर्मणः ।
यस्त्वां धर्मपरं श्रेष्ठं रूक्षाण्यश्रावयत् तदा ॥

सुखोचितमदुःखार्हं दुरात्मा ससुहृद्गण. ।
ईदृशं दु.खमानीय मोदते पापपूरुषः ॥

चतुर्णामेव पापानामस्रं न पतितं तदा ।
त्वयि भारत निष्क्रान्ते वनायाजिनवाससि ॥

दुर्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुर्भ्रातुस्तस्य चोग्रस्य राजन् दुःशासनस्य च ॥

इतरेषान्तु सर्वेषा कुरूणां कुरुसत्तम ।
दुःखेनाभिपरीतानां नेत्रेभ्यः प्रापतज्जलम् ॥

---

* On the speech, Nilakantha remarks—सुशीलापि स्त्री धर्म्मं त्याजयति किमुत इतरा ।

इदञ्च शयनं दृष्ट्वा यच्चासीत्ते पुरातनम् ।
शोचामि त्वां महाराज दुःखानर्हं सुखोचितम् ॥
दान्तं* यच्च सभामध्य आसनं रत्नभूषितम् ।
दृष्ट्वा कुशबृसीञ्चेमां शोको मां †रुन्धयत्ययम् ॥
यदपश्यं सभाया त्वा राजभिः परिवारितम् ।
तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ॥
या त्वाहं चन्दनादिग्धमपश्यं सूर्यवर्चसम् ।
सा त्वा पङ्कमलादिग्धं दृष्ट्वा मुह्यामि भारत ॥
या त्वाहं कौशिकैर्वस्त्रैः शुभ्रैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र सा त्वा पश्यामि चीरिणम् ॥
यच्च तद्रुक्मपात्रीभिः ब्राह्मणेभ्यः सहस्रशः ।
ह्रियते ते गृहादन्नं संस्कृतं सार्वकामिकम् ॥
यतीनाम्‡ अगृहाणां ते तथैव गृहमेधिनाम् ।
दीयते भोजनं राजन्नतीव गुणवत् प्रभो ॥
सत्कृतानि सहस्राणि सर्वकामैः पुरा गृहे ।
सर्वकामैः सुविहितैर्यदपूजयथा द्विजान् ॥
तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ।
यत्ते भ्रातॄन् महाराज युवानो मृष्टकुण्डलाः ॥
अभोजयन्त मृष्टान्नैः सूदाः परमसंस्कृतैः ॥

---

* गजदन्तमयम् ।

† आवृणोति मोहयति इत्यर्थः ।

‡ ब्रह्मचारिणाम् ।

सर्वांस्तानद्य पश्यामि वने वन्येन जीविनः ।
अदुःखार्हान् मनुष्येन्द्र नोपशाम्यति मे मनः ॥
भीमसेनमिमञ्चापि दुःखितं वनवासिनम् ।
ध्यायतः किं न मन्युस्ते प्राप्ते काले विवर्धते ॥
भीमसेनं हि कर्म्माणि स्वयं कुर्वाणमच्युतम् ।
सुखार्हं दुःखितं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥
सत्कृतं विविधैर्यानैर्वस्त्रैरुच्चावचैस्तथा ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥
अयं कुरून् रणे सर्वान् हन्तुमुत्सहते प्रभुः ।
त्वत्प्रतिज्ञां प्रतीक्षंस्तु सहतेऽयं वृकोदरः ।
* योऽर्ज्जुनेनार्ज्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ।
शरावमर्द्दे † शीघ्रत्वात् कालान्तकयमोपमः ॥
यस्य शस्त्रप्रतापेन प्रणताः सर्वपार्थिवाः ।
यज्ञे तव महाराज ब्राह्मणानुपतस्थिरे ॥
तमिमं पुरुषव्याघ्रं पूजितं देवदानवैः ।
ध्यायन्तमर्ज्जुनं दृष्ट्वा कस्माद्राजन् न कुप्यसि ॥
दृष्ट्वा वनगतं पार्थमदुःखार्हं सुखोचितम् ।
न च ते वर्धते मन्युस्तेन मुह्यामि भारत ॥
यो देवांश्च मनुष्यांश्च सर्पांश्चैकरथोऽजयत् ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥

---

* अर्ज्जुनेन कार्त्तवीर्य्येण । † बाणपाते ।

यो यानैरद्भुताकारैर्हयैर्नागैश्च संवृतः
प्रसह्य वित्तान्यादत्त पार्थिवेभ्यः परन्तपः ॥
क्षिपत्येकेन वेगेन पञ्चबाणशतानि यः ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥
श्यामं बृहन्तं तरुणं * चर्म्मिणामुत्तमं रणे ।
नकुलं ते वने दृष्ट्वा कस्मान्मन्युर्न वर्धते ॥
दर्शनीयश्च शूरश्च माद्रीपुत्रं युधिष्ठिर ।
सहदेव वने दृष्ट्वा कस्मात् क्षमसि पार्थिव ॥
नकुलं सहदेवञ्च दृष्ट्वा ते दुःखितावुभौ ।
अदुःखार्हौ मनुष्येन्द्र कस्मान्मन्युर्न वर्धते ॥
†द्रुपदस्य कुले जाता स्नुषां पाण्डोर्महात्मन ।
धृष्टद्युम्नस्य भगिनी वीरपत्नीमनुव्रताम् ॥
मा वै वनगता दृष्ट्वा कस्मात् क्षमसि पार्थिव ॥
नूनञ्च तव वै नास्ति मन्युर्भरतसत्तम ।
यत्ते भ्रातृंश्च माञ्चैव दृष्ट्वा न व्यथते मन ॥
न निर्मन्युः क्षत्रियोऽस्ति लोके निर्वचनं ‡स्मृतम् ।
तदद्य त्वयि पश्यामि क्षत्त्रिये विपरीतवत् ॥

---

* खड्गचर्म्मधराणाम् ।

† In our poem द्रौपदी with characteristic delicacy refrains from any reference to herself

‡ "निर्वचन क्षत्रियशब्दस्य क्षरते त्रिनश्यतीति क्षत्रम् इति ।"

यो न दर्शयते तेजः क्षत्रियः काल आगते ।
सर्वभूतानि तं पार्थ सदा परिभवन्त्युत ॥
तत् त्वया न क्षमा कार्या शत्रून् प्रति कथञ्चन ।
तेजसैव हि ते शक्या निहन्तुं नात्र संशय. ॥
तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति ।
अप्रियः सर्वभूतानां सोऽमुत्रेह च नश्यति ॥

* * * *

न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा
इति तात विजानीहि द्वयमेतदसंशयम् ॥

* * * *

तदहं तेजसः कालं तव मन्ये नराधिप ।
धार्तराष्ट्रेषु लुब्धेषु सततञ्चापकारिषु ॥
न हि कश्चित् क्षमाकालो विद्यतेऽद्य कुरून् प्रति ।
तेजसश्चागते काले तेज उत्स्रष्टुमर्हसि ॥

———

किरातार्जुनीयम्

किरातार्जुनीयम्—a poem treating of the hunter (i. e. Lord Shiva in the disguise of a hunter) and Arjuna ; cf. वाक्यपदीय—a work dealing with वाक्य's and पद's किरातश्च अर्जुनश्च (द्वन्द्व) किरातार्जुनौ, तौ अधिकृत्य कृतं काव्यम् किरातार्जुनीयम् किरातार्जुन + छ (ईय), neuter because it refers to काव्य which is neuter. The word किरात in the compound has been placed first, because it denotes Mahadeva in the disguise of the hunter and Mahadeva is an object of reverence. Had it referred to an ordinary hunter, the compound would have taken the form अर्जुनकिरातौ, because अर्जुन is a word which begins with a vowel and ends in अ [' अजाद्यदन्तम्"] , also because Arjuna is an object of greater reverence than a hunter [' अभ्यर्हितञ्च'']

The rule for छ is शिशुक्रन्द-यमसभ-द्वन्द्वेन्द्रजननादिभ्यश्छ (पा. ४।३।८८ सि १४६८) शिशु-क्रन्द, यम-सभ, द्वन्द्व, इन्द्र जननादि एभ्य छ प्रत्यय. स्यात् अधिकृत्य कृते ग्रन्थे इत्यर्थः । अणोऽपवाद ।

The suffix छ is added to the words शिशुक्रन्द, यम-सभ, द्वन्द्व compounds and such words as इन्द्रजनन etc in the sense of 'a book with—as the subject matter'. The छ is changed into ईय by the rule : आयन्-एय्-ईन् ईय्-इयः फ ढ ख छ-घां प्रत्ययादीनाम् (पा ७।१।२)—फ्, ढ्, ख, छ् and घ् forming the beginning of suffixes are changed into आयन्, एय , ईन्, ईय् and इय् respectively शिशूनां क्रन्दः शिशुक्रन्दः, तम् अधिकृत्य कृतः ग्रन्थः शिशुक्रन्दीय । यमस्य सभा यमसभम्। क्लीबत्व निपातनात् । "सभा राजा—" [२।४।२३] इति तु नपुंसकत्वं न भवति तत्र 'अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीन् आह' इत्युक्तेः । यमसभीय. । द्वन्द्वात्—किरातार्जुनीयम् । विक्रमोर्वशीयम् । वाक्यपदीयम् (शब्दार्थसम्बन्धीय प्रकरणम्)। इन्द्रजननीयम् । इन्द्रजननादिराकृतिगणः प्रयोगतोऽनुसर्तव्य ।

'किरातार्जुनीय-शब्दस्य काव्यम् इत्यनेन सामानाधिकरण्यात् नपुंसकत्वम् । किरातशब्देनोपस्थापितस्य देवदेवस्य अभ्यर्हितत्वात् , "अभ्यर्हितं च" इति वार्त्तिकेन पूर्वनिपातः, अन्यथा "अजाद्यदन्तम्" [२।२।३३] "अभ्यर्हितञ्च" [२।२।३४।४] इति सूत्रवार्त्तिकाभ्याम् अर्जुनशब्दस्य एव पूर्वनिपातो भवेत् ।

श्रीः

टीका-कृतो मङ्गलाचरणादिकम्।

अर्द्धाङ्गीकृत-दाम्पत्यमपि गाढानुरागि यत्।
पितृभ्यां जगतस्तस्मै कस्मैचिन्महसे नमः ॥ १ ॥

श्रीस्वामिने नमः। अर्धाङ्गीकृतदाम्पत्यम् इति। अर्धाङ्गीकृतदाम्पत्यमपि अर्धस्वीकृतदम्पतिभावमपि। अपिशब्दो विरोधद्योतकः। तेनार्धस्वीकृतमिथुनीभावस्य वक्ष्यमाणं गाढानुरागित्वं विरुध्यते। सम्पूर्णमिथुनीभावस्वीकारे हि गाढानुरागित्वं घटते। अत एव विरोधाभासोऽलङ्कारः। अर्थान्तराश्रयणेनात्र विरोधपरिहारः। तद् यथा अर्धं च अर्धं च अर्धे। सरूपाणामेकशेष एकविभक्तौ [पा. १।२।६४] इति द्वन्द्वसमासापवाद एकशेषः। अर्धे अङ्गे यस्य तदर्धाङ्गम्, नार्धाङ्गम् अनर्धाङ्गम्, अनर्धाङ्गम् अर्धाङ्गं सम्पद्यते तथा कृतं दाम्पत्यं येन तत्तथोक्तम्। यद्वा अर्धाभ्याम् अङ्गीकृतं दाम्पत्यं येनेति विग्रहः। अर्धशब्दे द्वन्द्वस्तु न भवति द्वन्द्वबाधकत्वादेकशेषस्य। गाढानुरागि गाढश्चासौ अनुरागश्च सोऽस्यास्ति गाढानुरागि इदंतत्त्वम्। यद्यपि "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रत्यायकः" इति मत्वर्थीयनिषेधोऽप्यस्ति, तथापि "—एकदेशिनैकाधिकरणे" [पा. २।२।१] इति ज्ञापकात्, "कृष्णसर्पवान् वल्मीकः" [महाभाष्य. २।१।६९] इति भाष्यकारप्रयोगाच्च तस्यानित्यत्वेन बाधो नास्ति। अत एव कालिदासेन "हंसचिह्नदुकूलवान्" [रघु १७।२५] इति प्रयोगः कृतः। वस्तुतस्तु गाढमनुरज्यतीत्येवंशीलमिति ब्युत्पत्तिर्निर्बाधा। जगतः पितृभ्यां मातापितृभ्यां प्रतिपालकाभ्यामित्यर्थः। तस्मै कस्मैचित् महसे तेजसे नमः।

> लिङ्गसंख्याविभेदेऽपि विशेषणविशेष्यता।
> विभक्तिः पुनरेकैव विशेषणविशेष्ययोः ॥

इति वचनादनियतलिङ्गसंख्याकेषु शब्देषु विशेषणविशेष्यभावो भवत्येव ॥१॥

"Salutation to that ineffable Light—the parental pair of the universe—of which each half bears the closest affinity to the other, even though each is but *half* the conjugal pair"

अर्द्धाङ्गीकृततादात्म्यम् also implies that the husband and wife are halves of the same body.

The husband and wife are theoretically halves of each other, but Hara and Gauri are halves of each other *physically* Hence they are really one—this is the ideal of connubial love

The reference here is to the अर्द्धनारीश्वर-मूर्त्ति * of महादेव in which the right half is man (representing शिव) and the left half woman (representing दुर्गा) Mallinatha generally salutes this form of शिव at the beginning of his commentaries probably following the example of Kalidasa who begins his Raghuvamsha with the following sloka—

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

"In अर्धाङ्गीकृततादात्म्यम् and गाढानुरागि there is the figure of speech known as विरोधाभास, for how can the pair be deeply attached to each other when the state of husband and wife has only been half accepted by them ? The second meaning of the word अर्धाङ्गीकृततादात्म्यम् gives us the solution"

गाढानुरागि—Asadhara discusses the form thus in his पूर्वपक्षात्मको—

ननु "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रत्यायकः" इति सूत्रेण कर्मधारय-तत्पुरुषं कृत्वा मत्वर्थीय प्रत्ययो बलिनादिर्न स्यात्, कथं तर्हि "अर्धाङ्गीकृततादात्म्य

* The most remarkable image of the अर्द्धनारीश्वर form, a magnificent specimen of the sculptor's art, is preserved in the Kailasa cave at Ellora

अपि गाढानुरागि यत्" इत्यत्र [गाढानुरागि इति स्यात्]? गाढश्चासावनुरागश्च गाढानुरागः इति कर्मधारयतत्पुरुषं विधाय सः अस्य अस्ति इति गाढानुरागि इत्येष समासो न स्यात्। कुतः? पाणिनीयसूत्रविरोधात्, अत्र गाढोऽनुरागो यस्य इति गाढानुरागम् इति बहुव्रीहिसमासेन [वाक्यार्थसिद्धेः]। नैवम्, वाक्यार्थस्तु सिध्यति [परं] बहुव्रीहिरर्थप्रत्ययाकोऽत्र न भवति। कथम्? तत्र संयोगसम्बन्धज्ञापनत्वेन कर्मधारयान्मत्वर्थीयो भवेत्। तदुक्तं मनोरमायाम्—

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

इति। एष्वर्थेषु मतुबादयः प्रत्यया भवन्ति। अत्र इनुप्रत्ययफलन्तु संयोगसम्बन्धज्ञापनमेव। तस्मात् फलमुख गौरवं न दोषायेति।

पितृभ्यां—माता च पिता च इति पितरौ (एकशेष.) ताभ्याम्। ४र्थी in connexion with नम। Rule: "नमः-स्वस्ति-स्वाहा-स्वधाऽलं वषड्-योगाच्च" (पा. २।३।१६)।

दाम्पत्यम—दम्पत्योर्भावः इति दम्पति + ष्यञ्। जाया च पतिश्च इति दम्पती (निपातनात्). [Acc to western scholars दम means house, cf Lat *domus* So दम्पति means lit the lord of the house, as dual—the two lords (i e. master and mistress) of the house, hence 'husband and wife'].

आलम्बे जगदालम्बं हेरम्ब-चरणाम्बुजम्।
शुष्यन्ति यद्रजः-स्पर्शात् सद्यः प्रत्यूह-वार्द्धयः ॥ २ ॥

मङ्गलार्थं शिवं नमस्कृत्य 'मङ्गलभूयस्त्वं सिद्धिभूयस्त्वम्' इत्यभिप्रेत्याह—आलम्बे इति। जगदालम्बं जगदाश्रयम्। हेरम्बचरणाम्बुजं हेशब्दं रम्बते भाषते इति हेरम्बो गणेशः। "अप्येकदन्तहेरम्बलम्बोदरगजाननाः" इत्यमरः। तस्य चरणाम्बुजं लौहित्यमार्दवादिगुणैरम्बुजोपमं चरणमालम्बे आश्रये। रबि लबि अबि शब्दे लबि अवस्रंसने च इति धातुपाठे। आङ्पूर्वस्य लम्बेः कर्तरि लट्। अब्दशब्दस्याध्या-

हारादुत्तमपुरुष.। यद्रजःस्पर्शात् यस्य कमलकोमलचरणस्य रजसां परागोपमानां स्पर्शात् सद्यः प्रत्यूहवार्धय विघ्नवारिधय शुष्यन्ति शुष्का भवन्ति। एतेन प्रभावातिशय उक्त.। चरणाम्बुजम् इति रूपकाश्रयणे तु प्रभावातिशयद्योतनं न सम्भवत्युत्तरपदार्थस्याम्बुजस्य प्राधान्येनान्वयात् ॥ २

"I cling for support to Heramba's lotus-foot, the support of the world, at the touch of the dust of which oceans of obstacles forthwith get dried up."

Mallinatha's passion for figures of sound like alliteration is quite apparent in this sloka. The word वार्धि is of comparatively rare occurrence in literature, the word generally used is वारिधि, वारि being far more common than वार. आप. स्त्री भूम्नि वार् वारि सलिल कमल जलम्—अमरः।

प्रत्यूह—प्रति + ऊह् + घञ् = विघ्न । "विघ्नोऽन्तराय प्रत्यूह" इत्यमरः। वार् (जलं) धीयते अत्र इति वार्धि। वार् + धा + कि (अधिकरणे) by the rule कर्मण्यधिकरणे च (पा. ३।३।९३) (which follows the rule उपसर्गे घोः किः।) The roots technically known as घु i. e. दा and धा, admit कि in the अधिकरणवाच्य when preceded by an object as उपपद

तद्दिव्यमव्ययं धाम सारस्वतम् उपास्महे।
यत्-प्रकाशात् प्रलीयन्ते मोहान्ध-तमस-च्छटाः ॥ ३ ॥

पुनरप्याह—तदिति। तद वक्ष्यमाणप्रकार दिव्य सुन्दर "दिव्य वल्गु मनोज्ञयोः" इति हेम। अव्ययम् अविनाशि सारस्वत सरस्वतीसम्बन्धि धाम तेजः उपास्महे चिन्तयाम। वयमिति शेष'। 'अस्मदो द्वयोश्च" [पा. १।२।५९] इति सूत्रेण कर्त्तरेकत्वेऽपि बहुवचन युक्तम्। तत् किमित्यपेक्षायामाह—यस्य धाम्न प्रकाशात् प्रकाशनवैभवात् मोहान्धतमसच्छटाः मोहान्धतमसस्य जाड्यान्धकारस्य। अन्धं करोतीत्यन्धयति। अन्धयतीत्यन्धम्। अन्धं च तत्तमश्च अन्धतमसम्। "अवसमन्धेभ्य-

समसः" [पा. ५।४।७९] इति समासान्तोऽच्प्रत्ययः। "ध्वान्ते गाढेऽन्धतमसम्" इत्यमरः। प्रत्नीयन्ते नश्यन्ति। सारस्वतमित्यत्र स्वार्थेऽण् प्रत्ययो वा पूर्वश्लोकानुसारात्। तत्र हि पार्वतीपरमेश्वरयोर्मङ्गलाभिधानम्। "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते" इति परिभाषया क्लीबत्वमविरुद्धम्। ३॥

"I worship that divine, inexhaustible glory of Sarasvati at the flashing forth of which clouds of the blinding darkness of ignorance melt away"

धाम—तेजः, धा + मनिन् (कर्तरि or कर्मणि) "गृह-देह-त्विट्-प्रभावा धामानि" —अमरः।

मोह एव अन्धतमसं तस्य छटाः समूहः। अन्धयति इति अन्धम्। अन्ध + णिच् ("तत् करोति तदाचष्टे") अन्धि नाम-धातु। अन्धि + अच् (पचादित्वात्) अन्धम्। अन्धं तमः = अन्धतमसम्। "अवसमन्धेभ्यस्तमसः" (पा. ५।४।७९) इति समासान्तः अच्। अच् comes after the word तमस् when preceded by अव, सम् or अन्ध in a compound Cf अमर—'ध्वान्ते गाढेऽन्धतमसं चोरेऽवतमसं, तमः। विष्वक् सन्तमसम्।"

वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकीम्
अन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत्।
वाचामाचकलद् रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद् यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः॥४॥

सम्प्रति यात्मवचनत्वविषये स्वात्कर्षं गर्वाभाव आह—वाणीमिति। यो मल्लिनाथः कविः कणान् भुङ्क्ते इति तस्य काणभुजः कणादस्येयं काणभुजी तां तथोक्तां वाणीं वैशेषिकदर्शनरूपाम् अजीगणत् गणयति स्म प्रत्यक्षर धारयति स्मत्यर्थः। किञ्च वैयासकीं व्यासस्येयं वैयासकी तां तथोक्तां वाणीं ब्रह्ममीमांसादिरूपाम् अवाशासीत् तदुक्तार्थान् प्रतिपक्षनिरसनेन सम्प्रदायशासनमकार्षीदित्यर्थः। तदुक्तं हि स्वादिकं निर्मल धारणयोग्यं भवति। व्यासस्तौ तदुक्तरणेन शोधातिशय उक्तत्वेन तदादराधिक्य

गम्यते । अन्तस्तन्त्रं तन्त्रे कर्ममीमांसायाम् इत्यसमस्त विभक्त्यर्थेऽव्ययीभावः । अरस्त रमते स्म । बुद्धिधर्मो रमणं तद्वति कथावुपचर्यते । पन्नगगवीगुम्फेषु पन्नगस्य शेषावतारस्य पतञ्जलेः गावो वाचः महाभाष्यरूपाः पन्नगगव्यः । "गोरतद्धितलुकि" [पा ५।४।९२] इति टच्प्रत्ययः । "टिड्ढाणञ्"इत्यादिना [पा ४।१।१५] ङीप् । तासां गुम्फेषु सन्दर्भेषु अजागरीत जागर्ति स्म, यथा जाग्रत् पुरुषो विमलबुद्धिर्भवति तथा विमलधीरभूदित्यर्थः । किञ्च अक्षपादो गौतमः । अक्षम् इन्द्रियं पादे यस्येति व्युत्पत्तिः । गौतमस्य हि शम्भुवरात् पादयोरवलोकनशक्तिर्बभूवेति वृद्धेभ्यः श्रूयते । अक्षपादात् स्फुरन्तीत्यक्षपादस्फुरः तासां (प्राचीनषोडशपदार्थदर्शनरूपाणां ?) वाचां गिरां न्यायदर्शनरूपाणाम् अखिलं रहस्यम् आकलयत् अविदत् । किञ्च लोके विदुषां पण्डितानां सौजन्यजन्य सौजन्यप्रभव यश यदुपघ्न यदाश्रयमेवाभूत् । उपहन्यते पीड्यतेऽसावुपघ्न आश्रय । तं हि सर्वलोकाः स्वभावात् पीडयन्तीति प्रसिद्धम् । यो मल्लिनाथ उपघ्नो यस्य इति यदुपघ्नम् । एवकार इतरोपघ्ननिषेधार्थः । सञ्ज्ञाशब्दोऽयम् "उपघ्न आश्रये" [पा ३।३।८५] इति निपातनात् साधुः । गुणाधिकस्य सौजन्याधिक्यं दुर्लभमिति भावः । यदुपज्ञमिति पाठे "उपज्ञोपक्रमम्—" [पा २।४।२१] इत्यादिना क्लीबत्वम् । "उपज्ञा ज्ञानमाद्यं स्यात्" इत्यमरः । एतदर्थस्य क्लिष्टत्वात् प्रथमनिर्दिष्ट एव पाठः साधुः । एतच्छ्लोकोक्तविद्यानामुपलक्षणत्वात् सांख्यपातञ्जलयोश्छन्दःशास्त्रादीनां ग्रहणं यतः काव्यं साहित्यशब्दवाच्यम् । सहिताभिः समग्राभिः विद्याभिः कृतं साहित्यम् इति व्युत्पत्तिः ॥४॥

"(He) who has counted (i e carefully studied) the words of the Atom eater * and has exhausted (i. e. has not left anything unstudied of) the works of Vyasa † ; (he) who

---

* कणभुक् or कणाद was a nick name of the founder of the atomic or Vaisesika system of philosophy This nick name gained such a hold on the imagination of the people that his real name came to be entirely forgotten

† Who has mastered the Mahabharata, Puranas and

has sported within the mazes of Tantra * and has been wide awake amidst the coils of the Serpent's † words, (he) who has fathomed the entire mystery of the words falling from Akshapada ‡ and whose fame is spread throughout the world as first of learned men in high-born courtesy "

अजीगणत्, अवासासीत्, अरंस्त, अजागरीत्, आचकलत्, and अभूत् are the लुङ् forms of the roots गण (अदन्तचुरादि), अव+सो, रम्, जागृ, कल (अदन्त चुरादि) and भू respectively. A reads आकलयत्

काणभुजीम्—adj to वाणीम्, कणभुज्+अण्=काणभुज, स्त्रियाम् ङीप्।
कणभुक् is the name given to कणाद by his detractors

---

especially the Brahmasutras of Vyasa. Asadhara reads अवाग्राहीत् and explains reduced i e. purged them of all interpolations and re established the traditional purity of the texts

* Tantra is explained by Asadhara as Mimamsa This is a likely meaning, as it is well-known that Mallinatha was a Mimamsa scholar and wrote a commentary on Kumarila's Tantravarttika According to some, Tantra here refers to the well known treatises of that name, while others hold that Tantra here means Shashtitantra or Samkhya philosophy and Satvatatantra or Vaisnava philosophy. Asadharabhatta's explanation is by far the best

† The serpent here refers to Patanjali who is said to have been an incarnation of the serpent Sesha. Three works are attributed to Patanjali—the Yogasutras, the Mahabhasya and the Caraka samhita.

‡ i e. who is proficient in the Nyaya philosophy as expounded by Aksapada known also by the family name Gautama.

व्यासस्य अपत्य (mental offspring) स्त्री इति वैयासकी, व्यास+इञ् (तस्यापत्यम्) = वैयासकिः। व्यास-वरुड़-निषाद-चण्डाल-बिम्बानाञ्च इति वक्तव्यम् (४।१।९७ वा) इति अक (ङ्)। "न य्वाभ्या पदन्ताभ्यां पूर्व्वौ तु ताभ्याम् ऐच्" (पा. ७।३।३) इति ऐकारागम।—यकार-वकाराभ्याम् उत्तरस्य अचाम् आदेरचः स्थाने वृद्धिर्न भवति, ताभ्या तु यकार-वकाराभ्यां पूर्व्वौ क्रमात् ऐचौ आगमौ भवतः ञिति णिति किति च तद्धिते परत.। "इतोऽमनुष्यजातेः" (पा. ४।१।६५) इति ङीष्।

अन्तसन्तम्—तन्तस्य अन्तः or तन्त इति अव्ययीभावः।

पद्भ्यां न गच्छति इति पन्नगः। तस्य गौ * पन्नग-गवी। [पन्नग-गो+टच्+ई। A समासान्त टच् is added to the word गो at the end of a तत्पुरुष compound but not in a तद्धितार्थद्विगु; of टच् अ remains, and because of the indicatory ट् the feminine is formed by adding ङीप्।] तस्या गुम्फाः तेषु।

यदुपज्ञम्—यस्य उपज्ञा (षष्ठी तत्) The rule for neuter is उपज्ञोपक्रम तदाद्याचिख्यासायाम् (पा. २।४।२१)—उपज्ञा and उपक्रम standing at the end of a तत्पुरुष compound become neuter in the sense of the starting point of a work first invented or commenced. "उपज्ञा ज्ञानमाद्य स्यात् ज्ञात्वारम्भ उपक्रम"—अमर.। "उपज्ञोपक्रमाद्यश्च तदादित्वप्रकाशने"—अमर। A prefers the reading यदुपज्ञम्.

With this the student may compare Pandita-raja Jagannatha's reference to his father's learning in the Rasa-gangadhara:

> श्रीमज्-ज्ञानेन्द्रभिक्षोरधिगत-सकल-ब्रह्मविद्या-प्रपञ्चः
> काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।

* गौर्नादित्ये बलीवर्दे क्रतु-भेदर्षिभेदयोः।
स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि।
पुं स्त्रियोः स्वर्ग-वज्राऽम्बु-रश्मि-दृग्-बाण लोमसु॥

देवाद्देवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामल-भणितिरभूत् सर्व्वविद्याधरो यः ॥

मल्लिनाथः कविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत् किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥५॥

मल्लिनाथः सः प्रसिद्धः शास्त्रवित् सुजनश्च । अयमिति स्वरूपनिर्देशः । यद्यपि स्वात्मनिर्देशेऽस्मच्छब्दप्रयोगो घटते तथाऽप्युपाधिना भेदारोपात् अयमित्यपि नानुचितं बहुत्र प्रयोगदर्शनात् । मल्लिनाथ रूढशब्दोऽयं कविः काव्यकर्ता दक्ष इति वा । "कविः शुक्रे च दक्षे च कविः स्यात् काव्यकर्त्तरि" इति विश्वः । मन्दात्मनां मूढधियाम् अनुग्रहेच्छया तत् प्रसिद्धं किरातार्जुनीयाख्यं काव्यं व्याख्यातुं विवरीतुम् इच्छति । अहमिच्छामीत्युक्ते गर्वप्रतीतिः स्यादतः एवमुक्तम् ॥५॥

"That poet Mallinatha now wishes to explain the well-known poem named Kiratarjuniya with the desire of favouring slow-witted people"

मन्दः आत्मा येषां ते मन्दात्मानः तेषाम् अनुजिघृक्षा (अनु + ग्रह् + सन् + अ, स्त्रियां टाप्) तया । हेतौ तृतीया ।

तत् = सुप्रसिद्धम् । Hence it is used without its correlative यत् । Cf. यत्तदोर्नित्यसम्बन्धः । But प्रसिद्ध-प्रक्रान्तानुभूतार्थस्तच्छब्दो यदुपादानं नापेक्षते । प्रसिद्ध as here, or तद् दिव्यमव्ययं धाम &c or तद् विष्णोः परमं पदम् । प्रक्रान्त ('already begun')—सोऽध्येष्ट वेदान् &c. अनुभूत—ते हि नो दिवसा गताः ।

व्याख्यातुम् इच्छति = व्याचिख्यासति ।

अहम् etc. Cf. प्रायेणाचार्य्याणाम् इयं शैली यत् स्वाभिप्रायमपि परोपदेशम् इव वर्णयन्ति—Kulluka on Manu

नालिकेर-फल-सम्मितं वचो भारवेः सपदि तद् विभज्यते ।
स्वादयन्तु रस-गर्भ-निर्भरं सारमस्य रसिका यथेप्सितम् ॥६॥

सम्प्रति प्रक्रान्तग्रन्थप्रशंसार्थमाह—नालिकेरेति । भारवेः प्रकृतग्रन्थकर्तुः वचः नालिकेरफलसम्मितम् नालिकेरस्य वृक्षविशेषस्य फलेन सम्मितं तुल्यमस्तीति शेषः । बाह्यः कठिनम् अन्तः सारवत्तरं चेत्यर्थः । सपद्यधुना तद् विभज्यते विविच्यते । रसिकाः रसज्ञपुरुषाः रसगर्भनिर्भरं रसः शृङ्गारादिः स एव तद्गर्भः इति श्लिष्टरूपकम् । गर्भो ध्वन्यलङ्कारादिः स एवान्तरस्वरूपमिति ताभ्यां निर्भरं नितरां भ्रियतेऽसौ निर्भरः । अथवा निश्चितो भरोऽतिशयो यस्येति निर्भरस्तम् । "भरातिशयो भरः" इत्यमरः । तस्य सारं श्रेष्ठभागं यथेप्सितं यथेष्टं स्वादयन्तु अनुभवन्तु । रसिकग्रहणमधिकारि-निर्देशार्थम् । तदुक्तं साहित्यदर्पणे [६]—

सवासनानां सभ्यानां रसस्याऽऽस्वादनं भवेत् ।
निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः ॥

"केवलशाब्दिकाः काष्ठसन्निभाः केवलतार्किकाः लोष्टसन्निभाः केवलच्छान्दसाः अश्मसन्निभाः" इति रसविलासी ॥६॥

"The diction of Bharavi is like the cocoanut fruit. It is just going to be broken (analysed. Let men of taste (connoisseurs) enjoy to their hearts' content the fruit (the essence of the poem) full of sweet juice (poetic charm, रस) inside."

सम्मित—सम् + मा + क्त (कर्मणि) = सदृश । सम्मितं समानं सदृशमित्यर्थः । सपदि—एकपदे । 'सद्यः सपदि तत्क्षणे ।' ईप्सितम्—आप् + सन् + क्त (नपुंसके भावे क्त) = प्राप्तुम् इच्छा । ईप्सितम् अनतिक्रम्य यथेप्सितम् (अव्ययीभावः) ।

रसगर्भ-निर्भरम्—रस-पूर्णः गर्भः, तेन निर्भरम् adj. to सारम् The word गर्भ shows that one comes across रस after one has penetrated right to the heart of the fruit (or the poem)

Cf. उपमा कालिदासस्य भारवेरर्थगौरवम् ।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

नाना-निबन्ध-विषमैकपदैर्नितान्तं
साशङ्क-चङ्क्रमण-खिन्न-धियाम् अशङ्कम् ।

कर्तुं प्रवेशमिह भारवि-काव्य-बन्ध
घण्टापथं कमपि नूतनम् आतनिष्ये ॥ ७ ॥

अथैकनाथादिकृतव्याख्यानेभ्य स्वकीयकृतव्याख्यानस्याऽधिक्यमाह—नानेति । नाना-विधा निबन्धाः किरातार्जुनीयव्याख्यानग्रन्थास्त एव विषमा दुर्गमा एकपद्यः एकेन पद्यन्ते गम्यन्ते ता एकपद्यः सङ्कीर्णपद्धतयः । "सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति च" इत्यमरः । ताभिः कृत्वा नितान्तसाशङ्कम् अत्यन्तसन्दिग्धं यत् सङ्क्रमणं प्रवेशनं तेन खिन्नधियां खेदान्वितबुद्धीनां रसिकानामिति शेषः । इह अस्मिन् भारविकाव्यबन्धे भारविकृते काव्यग्रन्थे । इहेति बुद्धिस्थनिर्देशपरम् । असङ्कटप्रकारेण यथा तथा प्रवेशं कर्तुं बुद्धेरिति शेषः । कमपि नूतनं घण्टापथं विशालमार्गं तत्सदृशव्याख्यानमित्यर्थः । "घण्टापथः संसरणं तत्पुरस्योपनिष्करम्" इत्यमरः । आतनिष्ये करिष्ये इत्यर्थः । अत्र केचिद् वदन्ति—नानाविधा निबन्धा रघु आदयस्तेषां विषमैकपद्यः सुचिन्तटीका इति । तदसङ्गतमेव । अत्र हि सन्दिग्ध-धियामुपकाराय तद्व्याख्यानमेव कर्तुमुचितम्, अन्यथा "काकस्य कार्ष्ण्याद्धवलः प्रासादः" इति न्यायः स्यात् ॥ ७ ॥

"I shall construct a splendid new highway giving easy entrance into the fortress of Bharavi's poetry to those whose minds have been sorely troubled trying to find dubious entrance therein by the tortuous paths of various (other) commentaries."

"Asadharabhatta reads नानानिबन्धविषमैकपदोनितान्त" for the generally accepted reading ॰पदैर्नितान्त. It is difficult to decide which of these is the better as both readings are open to objection. विषमैकपद or ॰पदी must be explained both as a narrow path and as difficult compound words. For the first meaning the appropriate word is एकपदी and for the second एकपद. एकपदी may also be taken to mean compounds and the word explained as a समाहार, after the analogy of

एकापूपौ which is a well-established expression. So on the whole the reading एकपदौ would appear preferable Of course, if we accept the reading एकपदौ it will have to be compounded with the following words and the vibhakti of नितान्त being dropped the last syllable in the first line will be a short one, but this presents no difficulty as in the Vasantatilaka, the final short syllable at the end of a verse (pada) may easily be regarded as long (Cf Vamana's Kavyalamkarasutravritti V. 1 3)"

The second line is based on Bhoja's famous invective against commentators :

दुर्बोधं यदतीव तद्विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थैः समासादिभिः ।
अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते
श्रोतॄणामिति वस्तुविप्लवकृतः सर्वेऽपि टीकाकृतः ॥*

---

* (1) Distinctions, that had been at first designed
To regulate the errors of the mind,
By being too nicely over strained and vexed
Have made the comment harder than the text.
BUTLER

(2) I heard a whisper from a ghost who shall be nameless "that these commentators always kept in the most distant quarters from their principals in the lower world, through a consciousness of shame and guilt, because they had so horribly misrepresented the meaning of these authors to posterity" SWIFT

(3) As learned commentators view
In Homer more than Homer knew SWIFT

(4) How commentators each dark passage shun
And hold their farthing candles to the sun.
YOUNG.

In the second line Asadhara reads संक्रमण for चङ्क्रमण which gives the additional alliteration of स and suits well with प्रवेशम् in the next line. But चङ्क्रमण is to be preferred because यङ् is added to क्रम् and other verbs of motion in the sense of "crooked motion" according to Panini's rule नित्यं कौटिल्ये गतौ III. 1 23 and चङ्क्रमण thus means "walking crookedly or tortuously" which fits in very well with सावज्ञ

The maxim काकस्य कार्ष्ण्याद् धवलः प्रासादः used in the commentary means that the palace is white, because the crow sitting on it is black and is used in speaking of something irrelevant Mallinatha uses this maxim in his commentary on Sisupalavadha VI 48 :

मुखसरोजरुचं मदपाटलामनुचकार चकोरदृशां यतः ।
धृतनवातपमुत्सुकतामतो न कमलं कमलस्मयदं भवन् ॥

निबन्ध—digest or commentary.

एकपद—short path or bye-path (एकपदी [एक + पाद] is the word used in this sense but एकपदः can be similarly formed from the word पद)

घण्टापथ —High-way, hence royal road "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः" इति चाणक्यः। "घण्टोपलक्षितानां हस्तिनां पन्था घण्टापथः"—क्षीरस्वामी।

चङ्क्रमणम्—कुटिलभ्रमणम्। Rule : नित्यं कौटिल्ये गतौ (पा ३।१।२३)। क्रम् + यङ् लुक् + ल्युट् (भावे)।

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ८ ॥

कमपि नूतनं घण्टापथमातनिष्ये इति यदुक्तं तद् विविच्य प्रतिजानीते—इहेति। मया इह अस्मिन् बुद्धिस्थे घण्टापथाख्ये ग्रन्थे अन्वयमुखेन अन्वयप्राधान्येन। "मुखं तु वदने मुख्ये आरम्भप्राधान्ययोरपि" इति यादवः। सर्वं पद्यम् इति शेषः।

जातावेकवचनम्। [व्याख्यायते विव्रियते]। किञ्च अमूलं मूलानुदाहरणरहितं किञ्चिद् व्याख्यानं न लिख्यते। किञ्च अनपेक्षितम् अपेक्षारहितं किञ्चिन्नोच्यते। इह क्रिया-पदद्वयेऽपि "वर्त्तमानसामीप्ये वर्त्तमानवद्वा" [पा. ३।३।१३१] इति कर्मणि लट्प्रयोग. ॥ ८ ॥

"In this commentary I shall explain everything in the regular order (i e according to the prose-order), nothing unwarranted is written, nor is anything irrelevant said"

अन्वयमुख—direct method or दण्डान्वय as opposed to व्यतिरेकमुख or खण्डान्वय। *

अथ तत्रभवान् भारवि-नामा कविः

(1) काव्यं यशसे ऽर्थकृते व्यवहार-विदे शिवेतर-क्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥
[काव्यप्रकाशे १।२]

इत्याद्यालङ्कारिक वचन-प्रामाण्यात्, काव्यस्य अनेक-श्रेयः-साधनतां "काव्यालापांश्च वर्ज्जयेत्" इति निषेधशास्त्रस्य असत्-काव्यविषयताञ्च पश्यन्, किरातार्ज्जुनीयाख्यं महाकाव्यं चिकीर्षुः, चिकीर्षितार्थाविघ्नपरिसमाप्ति-सम्प्रदायाविच्छेदलक्षण-फलसाधनत्वात्,

"आशीर्नमस्क्रिया-वस्तुनिर्देशो वाऽपि तन्मुखम्"
[काव्यादर्शे १।१४]

---

* Most of the matter contained in the foregoing pages is taken from a very learned article on the Muse of Mallinatha in Vol. I no 3 of the Calcutta Oriental Journal

इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च,वनेचरस्य युधिष्ठिर-प्राप्तिरूपं वस्तु निर्दिशन् कथामुपक्षिपति ।

सम्प्रति प्रयोजनादिसङ्गतिं निर्दिशति—अथ तवेत्यादि । अथशब्दः प्रारम्भार्थः क्रियापदेनान्वेति । "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः । स इति तव । प्रथमार्थे तल । भातीति भवान् । भातेर्डवतुरौणादिकः । तवभवान् पूज्य इत्यर्थः । भारविनामा भारविर्नाम यस्य स तथोक्तः । भासा भया वा रवि भारविः काव्यकर्त्ता । "काव्यं यशसे" इत्यारभ्य काव्यप्रकाशस्यार्या । तत्र काव्य-प्रयोजननिर्देशः । 'यशसे' इत्यादीनि तादर्थ्ये चतुर्थ्यन्तानि । अर्थकृते अर्थस्य पुरु-षार्थस्य कृते कारणाय । 'कृते' इति तादर्थ्येऽव्ययमिति केचित् । काव्यप्रदीपे तु कृत् विद युज्-शब्दा सम्पदादित्वाद्भावे क्विबन्ता इत्युक्तम् । व्यवहारविदे प्रशोत्तरादि-व्युत्पत्तये राजादिगतोचिताचारपरिज्ञानाय वा । शिवेतरक्षतये शिवादितरस्य अशिवस्य क्षतये नाशाय सद्यः परनिर्वृतये श्रवणसमकालमेव परमानन्दाय । निर पदस्य वृङ् सम्भक्ताविति धातोः क्तिन्प्रत्ययः । कान्तासम्मिततया वनितातुल्यतया । वनिता यथा प्रीत्युत्पादनपूर्व्वकमुपदेशं करोति तद्वदित्यर्थः । उपदेशयुजे हितोपदेशप्रयुक्तये । इत्यार्यार्थसंक्षेपः । इत्यादीनि आन्यान्यालङ्कारिकवचनानि काव्यफलोपपादकानि तेषां प्रामाण्याद् यथार्थत्वात् काव्यस्य पठनश्रवणनिर्माणैरनेकश्रेय साधनता नानाविधकल्याण-हेतुत्वं पश्यन् जानन्नित्यर्थः । "काव्यालापांश्च वर्जयेत्" इति । काव्यालापान् कवित्वप्रलापान् प्रहेलिकादिरूपान् वर्जयेदिति निषेधशास्त्रस्य केनचित् कल्पितस्य शास्त्रादृष्टत्वेन निर्मूलस्यापि असत्काव्यविषयताम् अप्रशस्तकाव्यपरत्व च पश्यन् । सत्काव्यपरत्वे तु रामायणादिकाव्यानामप्यनादेयतोपपत्तेः । पश्यन् सन् । किरातेति किरातार्जुनीयाख्यं महाकाव्यं "सर्गबन्धो महाकाव्यम्"इत्यादिना दण्डिप्रतिपादितम् । चिकीर्षुः कर्त्तुम् इच्छन् सन् । चिकीर्षितार्थाविघ्नपरिसमाप्ति. चिकीर्षितस्यार्थस्या-विघ्नेन या परिसमाप्तिः सा च सम्प्रदाय. शिष्टाचारः तस्याविच्छेद. अनुष्ठेयत्वेन स च तल्लक्षणस्य फलस्य साधनत्वात् । "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति दण्डिप्रोक्तस्याशीराद्यन्यतमस्य आशीरादिषु अन्यतमस्य कस्यचिदेकस्य । अन्यतरान्यतम-

शब्दावशुद्धत्पन्नौ शिवशुविशुद्धे निर्धारणे वर्त्तेते। प्रबन्धमुखत्वाच्चत्वात् ग्रन्थारम्भसूचकत्वात् वनेचरस्य युधिष्ठिरप्रहितस्य तत्राभिरूप वस्तु निर्दिशन् सन् कथामुपक्षिपन्नि प्रारभते। वनेचरसमागमविशिष्टयुधिष्ठिरवर्णनात् वस्तुनिर्देशात्मक मङ्गलमेतत्। वस्तु-शब्देन प्रशस्तवस्तुनिर्देशस्य विवक्षितत्वात् युधिष्ठिरस्य पुण्यश्लोकत्वात् तद्वर्णन मङ्गलमेवेति बोध्यम्।

तत्रभवान्—पूज्य। "विद्य तत्र-भवान् पूज्यं तथैवात्रभवानपि"।

(1) काव्य यशसे &c "Poetry yields fame and fortune It affords a knowledge of the customs (of kings and others) It dispels evil (शिवेतर-क्षतये) and instantaneously affords the highest felicity. Lastly, it teaches valuable lessons as agreeably as a beloved wife" शिवात् इतरत—other than good, hence evil (Figure—Litotes). क्षति—destruction

कान्तासम्मित-तया*—सम्मित means सदृश।

चिकीर्षित —कर्तुम् इष्ट:। अर्थ—वस्तु।

सम्प्रदाय—Succession of teachers and pupils. अविच्छेद—non-break, continuity.

Now, the revered poet, Bharavi by name, finding on the authority of the statements of rhetoricians "काव्य यशसे"—

* "उपदेशस्तावत् त्रिविध —(i) प्रभु-सम्मित (ii) सुहृत्-सम्मित. (iii) कान्ता-सम्मितश्च। तत्र आद्य वेदादि। स हि प्रभुरिव त्वमेव कुरु इति समाज्ञापयति। ततश्च नियुक्त सन्ध्यावन्दनादौ स्वर्गादि-फलरहितेऽपि प्रवर्त्तते। एवं य उपदेश एकान्ततोऽपि असम्मत, अकरणे प्रत्यवायभिया अवश्यम् अनुष्ठेयो भवति, स उपदेश प्रभुसम्मितो नाम। द्वितीय पुराणेतिहासादि। स हि सुहृदिव 'एव कृते इष्टमिष्ट' भवति एव च कृते इदम् अनिष्टम्' इत्येतावन्मात्र' बोधयति, न तु आज्ञापयति। तृतीयस्तु आभ्यां विलक्षण (different) रसप्रधान काव्यलक्षण। नानाविध-विलास-भासुरा किल कान्तास्तत्तेभावैरपहरति प्रेयसो हृदयम्, सरसमधुरैश्च वचनैरेनम् उपदिशन्ति, अनुष्ठापयन्ति च अनुना अनायासपरवशेन आत्मन उपदेशानुसारीणि कार्य्याणि। एव ये सुकुमारमतय अतिसुखितस्वभावा राजकुमारादयो नीरसे नीतिशास्त्रे प्रवर्त्तयितुम् अशक्या, तान् काव्य' कान्ता इव सरसतापादनेन अभिमुखीकृत्य उपदेश ग्राहयति। गुड-जिह्विकया शिशूनिव औषधम्।"

&c., and the like that Poetry is the source of manifold blessings and considering that the prohibitory text "one should forego the cultivation of poetry" refers to immoral poetry, with a view to compose the great poem entitled Kiratarjuniya introduces the story by referring to the subject-matter, viz, the arrival of the hunter before Yudhishthira. He introduces the subject matter, because it leads to the unobstructed (अविघ्न) accomplishment (परिसमाप्ति) of the desired (चिकीर्षित) object (अर्थ), (ii) it keeps up the tradition (सम्प्रदाय) and (iii) it is in keeping with the text, "A benediction, salutation (to a deity) or statement of the subject-matter is its beginning" which lays down that a Kavya must begin with one of the three—benediction &c

काव्यालापांश्च वर्जयेत्—In his commentary on the Ekavali, Mallinatha says : तदेवमनेकश्रेयःसाधनतया काव्यं न हेयम्। निषेधो दुराचारसाधकतत्काव्य-विषयतया व्यवस्थापनीयः। अन्यथा रामायणादीनामपि हेयत्वप्रसङ्गादिति भावः।

भास्करराय, the commentator on the वामकेश्वरतन्त्र shows the different stages thus : "आत्तमात्रस्य त्रैवर्णिकस्य पुरुषस्य क्रीडाधिकारे निरुच्च अक्षराभ्यासे, तच्छन्दोभाषाज्ञानार्थं काव्याध्ययने प्रवर्तमाने "अदोषं गुणवत् काव्यम्" इत्यादिपुराणवचनानि। व्युत्पन्नस्य तु "काव्यालापांश्च वर्जयेत्" इति निषेधः। काव्याध्ययनजन्यप्रयोजनस्य जातत्वेन उत्तरभूमिकायामेव अधिकारात् तां विहाय पूर्व-भूमिकायामेव आयुः क्षपयतोऽनिष्टं भवति इति तदर्थः। ततो देहाद्यतिरिक्तत्वेन आत्मनो ज्ञानार्थं न्यायशास्त्राध्ययने विधिः।"

अथैकदा धर्म्मसुतो वने वसन्
वनेचरं कञ्चन बुद्धिमत्तरम्।
न्ययुङ्क्त वैरिव्यवहारमीक्षितुं
स वर्णिवेशः प्रविवेश तत्पुरम्॥

युधिष्ठिरेण वनेचरः कदा प्रेषित इत्याकाङ्क्षायाम् उच्यते—अथेति। अथशब्दो मङ्गलार्थः। आनन्तर्यार्थस्तु न सम्भवति तस्य प्रकृतग्रन्थानिबद्धेन अर्थेन साकं सम्बन्धा

घटते, यस्यान्तरीभावेन सन्धाभिधाने तु सन्धिर्न स्यात्। एकदा कदाचित् धर्मसुतो युधिष्ठिरः वने वसन् बुद्धिमत्तरम् अतिशयेन बुद्धिमन्तं नीतिशास्त्रीतावारगुणसम्पन्न-मित्यर्थः। कञ्चनाप्रसिद्धनामगोत्र वनेचर वनवासिनं किरातजाति 'वनेचरः किरात स्यादन्यो वनचरः स्मृतः' इति शाश्वत, निजभृत्यमिति शेष। वेदितुमवहारं दुर्योधनादिप्रवृत्ति राजनीतिलक्षणाम् ईक्षितु सम्यग् बोद्धुमित्यर्थः। न्ययुङ्क्त नियुक्तवान्। युजि कर्तरि लङ्। दुर्योधनस्य प्रजासु व्यवहारो धर्मानुरोधी न वेति परीक्षा कर्तुं गूढचरप्रेषणमुचितमेव। यदि तस्य व्यवहारो धर्मानुरोधी स्यात् तर्हि तज्जयार्थं प्रयतनीयम्, अन्यथा तु स्वापराधेनास्य नाशः स्वयमेव भविष्यतीति व्यवहारपरीक्षाया हेतुर्द्रष्टव्यः। स वनेचरः वर्णिवेश सन्। वर्णो ब्राह्मणादिरस्यास्तीति वर्णी। 'वर्णाद् ब्रह्मचारिणि' इति इनिप्रत्ययः। 'वर्णिनो ब्रह्मचारिण' इत्यमरः। ब्रह्मचर्यात् प्राक् सर्वे वर्णाः शूद्रप्रायाः संस्कारेण ब्रह्मचर्यधारणे कृते सति तेषां स्वस्वव्यवहारो भवतीति वर्णिन्-शब्दो ब्रह्मचारिषु योगरूढः। तस्य वेश मृगचर्मप्रावरणादिरूपः स इव वेश यस्य स तथोक्तः। तत्पुर दुर्योधननगर गजाह्वय प्रविवेश, स्वाभाविकवेशेन तत्र प्रवेशो दुर्घट इति भाव।

स तत्र नानोपधिभिः परिभ्रमन्
विचित्रवार्त्ताकुशलोऽवसच्चिरम्।
ततो नृपः प्राक्तनवासमुत्सृजन्
वनान्तरं द्वैतवनान्तिके श्रितः॥

हास्तिनपुरे प्रविश्य वनेचरः कथ विदितवृत्तान्तोऽभवदित्याकाङ्क्षायामाह—स इति। तत्र हास्तिनपुरे विचित्रवार्त्ताकुशलः विचित्रासु वार्त्तासु प्राचीननवीनकथासु कुशलश्चतुरः स वनेचरो नानोपधिभिर्नानाविधं कपटं कुर्वाणस्तदर्थं कुत्रचित् प्रावरणादिप्रार्थनार्थ-मित्य सर्वत्र सञ्चारकपटात् सद्मानि परिभ्रमन् पर्यटन् भ्रमणं कुर्वन् राजवृत्तान्तज्ञानार्थ-मिति भावः। चिर बहुकालम् अवसत्। अचिरवासेन निःशेषवार्त्ताज्ञानासम्भवादिति भावः। अनन्तर युधिष्ठिरः किमकार्षीदित्यपेक्षायाम् आह—तत इति। ततो वनेचरप्रेषणानन्तर नृपो युधिष्ठिरः प्राक्तनवास पूर्वाधिष्ठितकाम्यकवनैकदेशम् उत्-

यद्वा भजत् भजन् सन् सम्यग्दृष्टमपुपार्थेनया सर्वातककवचकाविति । द्वैतवनाभिधे द्वैतवनाख्य-सरोवरसमीपे । "यत्र द्वैतवनं सरः" इति महाभारते वनपर्वणि द्वैतवनशब्दस्य सरोविशेषवाचित्वं दृश्यते । वनान्तर काम्यकवनस्यैव प्रदेशविशेषमित्यर्थः । वस्तुतस्तु तत्रापि द्वैतवनशब्दः प्रवर्त्तते । यथा च महाभारते आदिपर्वणि—

येन लिङ्गेन यो देशो युक्तः समभिलक्ष्यते ।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः ॥

इति । निरूढलक्षणाया शक्तितुल्यत्वाद् वाच्यम् इत्युक्तम् । तथा चोक्तं काव्यप्रदीपे— "शक्यावाच्यत्वे तैलादिर्विषयोऽपि स तादृश." इति । एवं च गङ्गायां घोष इत्यादौ निरूढलक्षणा सम्भवति । प्रकारान्तरन्तु विवक्षावशाद् बोध्यम्, "विवक्षावशाद् दर्शनम्" इत्युक्तेः । श्रितो बभूवेति शेषः । श्रयति स्म यो श्रित. इति सकर्मकादप्यविवक्षिते कर्मणि कर्त्तरि क्तः "द्वितीयाश्रित—"इत्यादिना ज्ञापकात् । एतेन भजति स्म यो भक्त इति कर्त्तरि निष्ठा समाहिता । अन्यथा भक्तशब्दस्य भजनीयपरता स्यादिति सङ्क्षेपः ॥*

इति पदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजगङ्गाधरभट्टकृते ज्ञानानन्दे
किरातार्जुनीयव्याख्याया सुखव्याख्यानं समाप्तम् ।

श्रियः इति । आदित. श्रीशब्दप्रयोगाद् वर्णगणादिशुद्धि-र्नातीवोपयुज्यते । तदुक्तम्—

देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ इति ।

* अत्राविवक्षितकर्मकाणामपि ग्रहणम् । न च "आश्रित कर्त्ता" [पा. ६।१।२०७] इत्यवत्यभाष्यविरोधः । तत्र हि—"आङ्पूर्वाच्छ्रेः सकर्मकत्वात् कर्मण्यप्राप्ते क्तो निपात्यते" इत्युक्तम् । अन्यथा "मातुः स्मरति" इतिवदविवक्षितकर्मत्वेनाकर्मकतायां सूत्रेणैव सिद्धे निपातनं व्यर्थं स्यादिति वाच्यम्, तस्य भाष्यस्य "आश्रितोऽनेन देवदत्तः' इत्याद्युदाहरणस्येष्टत्वेन तदर्थं निपातनमित्याशयस्यापि वक्तुं शक्यत्वात् । अत एव 'आश्रितः कर्त्ता' इति निर्देशस्यायुक्तत्वं न विचारितं भगवता । लघुशब्देन्दुशेखर on S K. 3087.

(2) Because of the use of the word श्री at the beginning, the purity of the letters and *ganas* is not absolutely necessary here For it has been said, words denoting deities or those denoting prosperity and the like are not exceptionable in respect of writing or *gana*

In Sanskrit metre (वृत्त) each पाद is divided into groups of three.

For the purpose of scanning metres regulated by the number of syllables, writers on prosody have devised eight "ganas" or syllabic feet, each consisting of three syllables, and distinguished from one another by particular syllables being short or long They are given in the following verse :—

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।

Or

आदिमध्यावसानेषु य-र-ता यान्ति लाघवम् ।
भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम् ॥

In the following mnemonic line :—

यमाताराजभानसलगम्

the letters taken three at a time (except in the case of ल and गम् which are to be taken singly) from the beginning give the *gana* represented by the first letter Thus य मा ता represent य-गण , मा ता रा म-गण and so on

म— — — (3 sylls long)	न ◡ ◡ ◡ (3 sylls short)
भ— ◡ ◡ (1st syll long)	य ◡ — — (1st syll short)
ज◡ — ◡ (2nd syll. long)	र — ◡ — (2nd syll. short)

स ⌣ ⌣ — (last syll long) त — — ⌣ (last syll. short)
ल ⌣ (a single short syll) ग —(a single) long syllable).

Of these eight *ganas* म, न, य, त, भ are auspicious (or lucky), the rest ज, स and र are unlucky. In his commentary on the Bhatti Kavya I. I Mallinatha says :—"तदुक्तं भारतीये—

ससभज्या गणा ह्यष्टौ तेषु नयतभाः शुभाः ।
जसरैर्लसमैर्युक्ता श्रीनरो न शुभप्रद ।"

Again in Prakrita Paingala —

मगण रिद्धिथिरकज्ज यगण सुहसम्पअ दिज्जइ
रगण मरण सम्पलइ जगण खरकिरण विसज्जइ ।
तगण सुण्ण फल कहइ सगण सहदेसु वासइ
भगण रचइ मङ्गल अणेक कइ पिङ्गल भासइ ॥

Similarly of the letters अ, आ, इ, ई, ए, ऐ, ओ, औ, क, ख, ग घ, च, छ, ज, ड द ध, न, प, य, श, स, ह are auspicious, the rest inauspicious Thus we see the Ganas ज, स and र being inauspicious should not be used at the beginning of a poem But the Kiratarjuniya opens with a जगण (श्रि य कु) Mallinatha justifies this by saying that the word श्री denoting prosperity and a deity used at the very beginning lends purity to the whole composition, so that the question of the purity or otherwise of the letters (वर्ण) or गण hardly arises here

Narayanabhatta in his commentary on the वृत्तरत्नाकर says that ज and त both being regardey as उदासीन, the combina- of the two is neither auspicious nor inauspicious * :

अत एव किरात-माघ-नैषधीयेषु दुष्टफलप्रदात्पुरःसरोदासीनाज्जगणादुदासीनस्य

किरातार्जुनीयम्



प्रथमः सर्गः

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णि-लिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

English Equivalents श्री—prosperity. पालनी—guarding. protecting वृत्ति—conduct, policy. वर्णिन्—Brahmacharin. लिङ्ग—mark, garb, disguise

Analysis—स वनेचरः विदितः सन् युधिष्ठिरं समाययौ—Having learnt (about the affairs of the enemy i. e having gained the necessary information) the rover of the forest came to Yudhishthira. Where? द्वैतवने—in the Dvaita forest. कोऽसौ वनेचरः? यं कुरूणाम् अधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं [युधिष्ठिरः] अयुङ्क्त—whom Yudhishthira had appointed to ascertain the conduct of the lord of the Kuru country towards his subjects किम्भूतां वृत्तिम्? श्रियः पालनीं—guarding the goddess of royal fortune किम्भूतः सः? वर्णिलिङ्गी—wearing the garb of a Brahmacharin.

Prose-Order. कुरूणाम् अधिपस्य श्रियः (राजलक्ष्म्याः) पालनीं (प्रतिष्ठापिकां) प्रजासु वृत्तिं (व्यवहारं) वेदितुं (ज्ञातुं) यं (वनेचरम्) [युधिष्ठिरः] अयुङ्क्त (नियुक्तवान्) वर्णिलिङ्गी (ब्रह्मचारी-वेशवान्) स वनेचरः विदितः (ज्ञाताखिलवृत्तान्तः) [सन्] द्वैतवने युधिष्ठिरं समाययौ ।

Bengali. কুরুদেশের অধিপতির (দুর্য্যোধনের) রাজলক্ষ্মী-রক্ষিতার মূলস্বরূপ প্রজাবর্গের প্রতি ব্যবহার জ্ঞাত হইবার জন্য যুধিষ্ঠির যে কিরাতকে নিযুক্ত করিয়াছিলেন ব্রহ্মচারীর বেশধারী সেই কিরাত সমস্ত বৃত্তান্ত পরিজ্ঞাত হইয়া দ্বৈতবনে যুধিষ্ঠিরের নিকট উপস্থিত হইল।

English. The woodman whom Yudhishthira had appointed to discover the treatment (meted out) to his subjects by the Lord of Kuru-land (which would have resulted in) safeguarding the Royal glory, having found out (everything needed) came back to him in the Dvaita forest.

Elucidation Yudhishthira had fallen on evil days Through the machinations of knavish kinsmen the greatest king with the noblest heart had been reduced almost to the state of a beggar In the game at dice, he had staked everything and lost everything His wife was subjected in open court to a humiliation unheard of in the annals of any country Yet he was as firm and calm as ever All this could not disturb the tranquillity of his mind His policy was like that of Mr Asquith—wait and see. He went into exile with his wife and brothers followed by the good wishes of his subjects and the blessings of the Brahmanas and sages , For a time they lived in the Kamyaka forest , then they removed to the Dvaita forest where the company of sages and the glories of natural scenery more than made up for the loss of their kingdom

Yudhishthira was, however, not unmindful of his duties as a Kshatriya prince He knew that for the determination of his future policy, a detailed and accurate knowledge of the affairs of his enemy was indispensable . But he could not get a good diplomat in the forest who would make an efficient spy. So he did the best he could. He secured the services of a hunter as spy and

commissioned him to gather all information about the affairs of Duryodhana, about the way in which he was wielding the reins of goverment, about the measures he was adopting for securing the allegiance of his subjects &c. The spy went to the kingdom of Duryodhana and his innocent disguise of a young Brahmacharin secured him ready welcome everywhere. He moved about unsuspected, gained all the necessary information and met Yudhishthira in the Dvaita forest.

Word-notes.

श्रियः—श्रि + क्विप् = श्री । 6/1. Alt. form श्रियाः । "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी । श्री 1/1 ("अवी-लक्ष्मी-तरी-तन्त्री-श्री-ह्री-धीनामुणादितः । स्त्रीलिङ्गानाम् अमीषान्तु न सुलोपः कदाचन ।")

Bharavi begins his poem with the auspicious word श्री and uses the word लक्ष्मी in the last sloka of each canto.

कुरूणाम् (of the country of the Kurus)—कुरु + अण् in the sense of "तस्य निवासः" ४।२।६९ So the meaning is कुरूणां निवासाः. Then अण् is elided by the rule "जनपदे लुप्" (४।२।८१) । कर्मणि षष्ठी ।

[Chitrabhanu proposes an alternative derivation. कुरोरपत्यं पुमान् इति कौरव्यः । कुरु + ण्य (कुर्वादिभ्यो ण्यः ४।१।१७२) In the plural the ण्य is dropped by the rule तद्राजस्य बहुषु तेनैवास्त्रियाम् २।४।१७२)। So we get कुरवः क्षत्रियाः तेषां कुरूणाम् (of the Kurus). यत्तु "कुर्वादिभ्यो ण्यः" इति वक्ष्यते तस्य तद्राजत्वात् बहुषु कुरवः क्षत्रियाः इति भवति । तत्त्वबोधिनी on IV. 1. 51]

अधिपस्य—अधि + पा + क (कर्तरि)। "आतश्चोपसर्गे" (३।१।१३५) इति क । शेषे षष्ठी ।

पालनीम् 2/1.—पाल्यते अनया इति पा + णिच् + करणे ल्युट्। स्त्रियां ङीप् ।

प्रजासु—प्र + जन् + ड (कर्तरि)। "उपसर्गे च संज्ञायाम्" ३।२।९९ (उपसर्गे च उपपदे जनेर्डप्रत्ययो भवति संज्ञायां विषये)। स्त्रियां टाप् । 7/3 विषयाधिकरणे सप्तमी ।

वृत्तिं 2/1—वृत्+क्तिन् obj. to वेदितुम्।

अयुङ्क्त—युज्+लङ् 3 1, used in the sense of न्ययुङ्क्त; nom. युधिष्ठिरः understood. कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

N. B. 1 युज् by itself is generally used in the sense of 'to yoke', 'to join' &c In the sense of 'to appoint' it is generally preceded by the *upasarga* नि. But as the meanings are all implicit in the root, the *upasargas* serving only to make them explicit, this use of the root without the उपसर्ग does not amount to a defect. For a similar use, cf. बन्धुप्रिया बन्धुजनो जुहाव (कुमार १।२६) where the root ह्वे is used in the sense of आ ह्वे, जुहाव standing for आजुहाव॥ "धातूनाम् उपसर्गेण ये अर्थाः प्रतीयन्ते ते सर्वेऽपि तेषां स्वार्थाः एव। उपसर्गाणां पुनः अभिव्यञ्जकत्वम्। यदाह माघ १०।१५—'धातुलीनम् उपसर्गो द्योतयेत्।' तस्मात् युक्त एव अत्र उपसर्गेण विना अपि प्रयोगः।"—Narayana on Kumara I 26

2. The root युज् by itself is used in both the *padas* but is exclusively Atm. when preceded by प्र and उप or any उपसर्ग which either begins with or ends in a vowel (except when referring to a sacrificial vessel) प्रयुङ्क्ते। तम् अन्वयुङ्क्त &c. Rules :—प्रोपाभ्यां युजेरयज्ञपात्रेषु (पा. १।३।६४), स्वराद्यन्तोपसर्गात् इति वक्तव्यम् (वा.)।

वेदितुम्—विद्+तुमुन्। तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३।३।१०।

Panini and his early followers insist on समानकर्तृकत्व between the finite verb and the infinitive only when the finite verb is an इच्छार्थक root. Hence though the nom of वेदितुम् is वनेचर and that of अयुङ्क्त is युधिष्ठिर, वेदितुम् has been quite correctly used here (So also गोपितुं भुजामस्मा मन्त्रलता शैल-वासमनुनीय लम्भिता—किरात १ ३।४२, यदपस्तु न ददात्यनया द्रष्टुं चिरगतामपि—शकुन्तला ६।१७ तेषां यदि प्रविशतुम् अस्ति काम—रघु ६।४२, &c.) It is clear that Mallinatha holds the same view, for he explains वनाय (गां मुमोच) in रघु २।१ by वनं गन्तुम् and uses such an expression as तर्हि वक्तुमेव कथं न ददाति in his commentary on कुमार ५।८३।

Many grammarians, however, regard such uses as objectionable. Similarly स निरौषितु नोपररास वसुधैः Kirat IV 17 विरमन्ति न ज्वलतुमोशवय V. 24 etc are also doubtful examples.

वर्णिलङ्गी—वर्णः (प्रशस्तिः or ब्रह्मचर्यम्) अस्य अस्ति इति वर्णिन् । वर्ण+इन् (rule—व्रीह्यादिभ्यश्च) । वर्णिनो लिङ्गम् (६ तत्) । वर्णिलिङ्गम् अस्य अस्ति इति वर्णिलिङ्ग + इन् ।

विदित —(i) विद् + कर्तृवाच्ये + क्त ; विद् though generally transitive is used here intransitively, hence कर्तरि क्त by the rule गत्यर्थाकर्मक &c. Predicative adj to वनेचरः ।

(ii) विद् + कर्मवाच्ये क्त , the object वृत्तान्त has been dropped, because it can be easily gathered from the context Here विदित =विदितवृत्तान्तः ।

(iii) विद् + भाववाच्ये क्तः विदितम् , विदितम् अस्ति अस्य इति अर्थे अच् प्रत्यय (अर्शआदित्वात्) । विदित+अ (च) = विदित ।

(iv) विद् here does not mean 'to know but has the sense of वेदि 'to cause to know', hence विदित (=वेदित) means 'who has been informed'. विद् + कर्मवाच्ये क्त । In this case, वनेचर is the object, the subject being प्रतिहारादिना understood

N B The root विद् 'to know' is used in the Atm when preceded by the उपसर्ग 'सम्' provided that it is used intransitively "के न संविद्रते वायोर्मनाक्साद्रिया सखा'—भट्टि ।

युधि स्थिर (७ तत्) तम् । An instance of अलुक्

वने चरति इति वनेचर । वने + चर् + ट । Fem. वनेचरी । Another instance of अलुक् Alt form वनचरः ।

Remark In the very first verse the nom. is not stated, which, whatever the commentators might say, is not creditable for the poet

पदटीपथ:—"श्रिय " इति । (1) आदित 'श्री'शब्दप्रयोगात् वर्ण-गणादिशुद्धि' नात्र अतीव उपयुज्यते । तदुक्तम्—

(2) "देवता-वाचका शब्दा ये च भद्रादि वाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ *

---

* Attributed to Bhamaha by Narayanabhatta.

इति। (3) कुरुषु निवासा: 'कुरव' जनपदा:। "तस्य निवास" [पा. ४।२।६९] इति अण्, जनपदे लुप् [पा ४।२।८१]। तेषाम् [कुरूणाम्] 'अधिपस्य' दुर्योधनस्य सम्बन्धिनीम्। (4) श्रेषे षष्ठी। 'श्रियः' राजलक्ष्म्याः "कर्त्तृ-कर्म्मणोः कृति" [पा. २।३।६५] इति कर्म्मणि षष्ठी। पाल्यते अनया इति पालनी तां [पालनी] प्रतिष्ठापिकाम् इत्यर्थः (5) प्रजारागमूलत्वात् सम्पदः इति भाव.। (6) "करणाधि-करणयोश्च" [पा. ३।३।११७] इति [सूत्रेण अत्र] करणे ल्युट्, "टिड्ढाणञ्—"[पा ४।१।१५] इत्यादिना ङीप्। 'प्रजासु' जनेषु विषये। (7) "प्रजा स्यात् सन्ततौ जने" इत्यमर। इति 'व्यवहार' 'वेदितुं'ज्ञातुं 'यं' वनेचरम् 'अयुङ्क्त' नियुक्तवान्। वर्णं प्रशस्ति: अस्ति इति वर्णी ब्रह्मचारी। तदुक्तम्—

"स्मरणं कीर्त्तनं केलि: प्रेक्षणं गुह्यभाषणम्।
सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च॥
एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिण:।
विपरीतं ब्रह्मचर्य्यमेतदेवाष्टलक्षणम्॥"*

एतदष्टविधमैथुनाभाव, प्रशस्ति। "वर्णाद् ब्रह्मचारिणि" [पा ५।२।१३४] इति 'इनि'-प्रत्यय.। तस्य 'लिङ्ग' चिह्नम् अस्य अस्ति इति 'वर्णिलिङ्गी' ब्रह्म-

---

* The first three lines are found in the Agni-purana (372 9 10), Daksha Samhita (VII 31 32), Brahmavaivarta Purana (Ganeshakhanda IV 75) &c For क्रियानिर्वृत्तिरेव च in the second line some manuscripts read क्रियानिर्वृतिरेव च (which is the reading of the Agni purana) whilst others क्रिया निष्पत्तिरेव च। The following passage from the Mahabhashya [on I 1 32] however, seems to set up a strong presumption in favour of क्रियानिर्वृत्तिरेव च :—

इह य एष मनुष्य: प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत् कञ्चिदर्थं पश्यति, सन्दृष्टे प्रार्थना, प्रार्थनायाम् अध्यवसाय, अध्यवसाये आरम्भ, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलावाप्तिः। (Kielhorn Vol I. pp 330-331).

चारि-वेशगान् इत्यर्थः । 'स' नियुक्तः 'वने-चरः' किरातः । (8) "भेदाः किरात-शबर-पुलिन्दा म्लेच्छजातयः" इत्यमरः । (9) "चरेष्टः" [पा. ३।२।१६] इति ट-प्रत्ययः । "तत्पुरुषे कृति बहुलम्" [पा. ६।३।१४] इत्यलुक् । (1) विदित वेदनम् अस्य अस्ति इति विदितः परवृत्तान्त ज्ञानवान् इत्यर्थः । अर्श-आदिभ्योऽच प्रत्ययः [ref. पा. ५।२।१२७] (ii) अथवा कर्तरि कर्म्म-धर्म्मोपचारात् विदित-वृत्तान्तो 'विदितः' इत्युच्यते । उभयथापि "पीता गावः" ["भुक्ता ब्राह्मणाः"] "विभक्ता भ्रातरः" इत्यादिवत् साधुत्वं, न तु कर्त्तरि क्तः—सकर्म्मकेभ्यः तस्य विधानाभावात् । अत एव भाष्यकारः "अकारो मत्वर्थीयः । विभक्तम् एषाम् अस्ति इति विभक्ताः, पीतम् एषाम् अस्ति इति पीताः इति । अथवा उत्तरपदलोपोऽत्र द्रष्टव्यः । विभक्त-धना विभक्ताः, पीतोदकाः पीता इति ।" [महाभाष्य under पा ३।४।६७ Kielhorn Vol. II p 176 ll 23 25] अत्र लोपशब्दार्थमाह कैयट—"गम्यार्थस्याप्रयोग एव लोपोऽभिमतः । 'विभक्ता भ्रातरः' इत्यत्र धनस्य यद् विभक्तत्वं तत् भ्रातृषु उपचर्य्यते । 'पीता गावः' इत्यत्रापि उदकस्य पीतत्वं गोषु आरोप्यते" इति । तद्वत् अत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचरे उपचर्य्यते । एतेन "वनाय पीत-प्रतिबद्धवत्साम्" [रघु २।१] 'पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या" [अभिज्ञान-शाकुन्तल ४।८] एवमादयो व्याख्याताः । अथवा (iii) 'विदितः' विदितवान्—सकर्म्मकाद् अपि, अविवक्षिते कर्म्मणि, कर्त्तरि क्तः । "आश्रित. कर्त्तरि" [पा. ६।१।२०७] इत्यादौ यथा । यथाहुः—

"(a) धातोरर्थान्तरे वृत्तेः (b) धात्वर्थेनोपसंग्रहात् ।
(c) प्रसिद्धेः (d) अविवक्षातः कर्म्मणोऽकर्म्मिका क्रिया ॥"

इति [वाक्यपदीये ३।७।८७] । (iv) प्रतिहारादिना ज्ञापितः इति वा ।

'द्वैतवने' द्वैताख्ये तपोवने । यद्वा 'द्वि' 'द्वे' गते यस्मात् तत् 'द्वीतम्' । द्वीतम् एव द्वैतम् । तच्च तद्वनं च [द्वैतवनं] तस्मिन्—(10) शोकमोहादिरहिते इत्यर्थः । 'युधि' रणे स्थिरम् युधिष्ठिरं धर्म्मराजम् । "हलदन्तात् सप्तम्याः संज्ञायाम्" [पा. ६।३।९] इत्यलुक् । "गवि-युधिभ्यां स्थिरः" [पा. ८।३।९५] इति षत्वम् । समाययौ सम्प्राप्तः ।

(11) अत्र 'श्रियं' 'वनेचरः' इति द्वयोः स्वर-व्यञ्जन-समुदाययोः एकधैव आवृत्त्या वृत्त्यनुप्रासो नामालङ्कारः। (12) अस्मिन् सर्गे वंशस्थ-वृत्तम्। तस्य लक्षणम्—"जतौ तु वंशस्थमुदीरितं जरौ" [वृत्तरत्नाकर ४६ कारिका]।

Ghantapatha Explained

(1) and (2) explained on p. 17-18

कुरूणाम्—In the sense of कुरूणां निवासः we add अण् to कुरु by the rule :

तस्य निवासः (पा ४।२।६९ सि ११८१)।

'तस्य' इति षष्ठी समर्थात् "निवास" इत्येतस्मिन् अर्थे यथाविहितं प्रत्ययो भवति, देशनामधेये गम्यमाने—काशिका। To a word ending in the genitive an affix is added in the sense of 'his dwelling place', the whole word representing the name of a country

So we get कुरु+अण्। But this अण् is elided acc to the rule ·

जनपदे लुप् (पा ४।२।८२ सि. ११९३)

देशे तन्नामेति यथातुर्थिकः प्रत्ययो भवति, तस्य देशविशेषे जनपदे अभिधेये लुब् भवति। ग्रामसमुदायो जनपदः। कुरूणां निवास जनपद कुरवः। पञ्चालाः। मत्स्याः। अङ्गाः। वङ्गाः। मगधाः। सुह्माः। पुण्ड्राः। The name of a kingdom is formed by the लुप् elision of these affixes, (when the name of the people without the change of number and gender, is at the same time the name of the kingdom) —Vasu

So we get back the original form कुरु which in 6/3 yields कुरूणाम्

N. B. For the plural in कुरूणाम् note the following rule :

लुपि युक्तवद् व्यक्ति-वचने (पा १।२।५१ सि. ११९४)

लुपि सति प्रकृतिवत् लिङ्ग-वचने स्त। सि कौ।

When a Taddhita affix is elided by using the word लुप्, then the derivative word retains the *gender* and *number* of the primitive word Note the difference between the rejection of a Taddhita by saying "let there be a लुक्" and "let there be a लुप्" The direct action of both words is

the rejection of the suffix, but derivatives formed by लुक्-rejection may not retain the number and gender of the original word, while a derivative formed by लुप् rejection does retain the number and gender of the original word. The word पञ्चाल.. is masculine plural in form though applicable to a single province.—Vasu

[According to the predecessors of Panini कुरवः is formed by the addition of the suffix अण् to the word कुरु in the sense कुरूणां निवास and then by the elision of the affix in the sense of जनपद The masculine gender and plural number of the original word कुरूणाम् in कुरूणां निवासः have been retained, though made applicable to a single province (लुपि युक्तवद् व्यक्ति वचने) Panini himself, however, dissents from this view He holds that no hard and fast rules for the regulation of the number and gender of such words as कुरव, पाञ्चाला &c, can be laid down inasmuch as they are सञ्ज्ञावाचक words Words like पाञ्चाला, कुरव &c, according to Panini, should not be considered as derivative words formed by the elision (लुप्) of the तद्धित affix, but they must be regarded as proper nouns and appellatives of certain countries, consequently the gender and number of such words are fixed by the nature of such words and not by any rules of grammar]

षष्ठी शेषे (पा २।३।५० सि ६०६)

उक्तादन्य शेष। "कर्म्मणि द्वितीया" इत्यादि-सूत्रेषु द्वितीयादि-विधिषु हि कर्म्म-कर्त्तृ-करण-सम्प्रदानापदानाधिकरण-कारकाणि अनुक्रान्तानि। प्रथमाविधौ प्रातिपदिकार्थ अनुक्रान्त। एभ्य अन्य, स्व-स्वामिभावादि-सम्बन्ध शेष तत्र षष्ठी स्यात्।

शेष means relations other than case relations, such as those between the part and the whole, the owner and the thing owned &c. So शेषे षष्ठी comes to mean the same thing

as the more popular सम्बन्धे षष्ठी or सम्बन्धसामान्ये षष्ठी Bhashyakara, however, holds that in every instance of the genitive the word in the genitive is connected with some action expressed or understood Even in such cases as राज्ञः पुरुषः, वृक्षस्य शाखा &c राजा is कर्ता and पुरुष सम्प्रदानम्, वृक्ष is the अधिकरण of शाखा and so on He comments thus :—

शेषे इत्युच्यते। कः शेषो नाम ? कर्मादिभ्यो येऽन्येऽर्थाः स शेषः। यद्येवम्, शेषो न प्रकल्पते। न हि कर्मादिभ्य अन्येऽर्थाः सन्ति। इह तावद्राज्ञः पुरुष इति राजा कर्ता, पुरुषः सम्प्रदानम्। वृक्षस्य शाखा इति वृक्षः शाखाया अधिकरणम्। तथा यद्येतत् स्वं नाम चतुर्भिरेतत् प्रकारैर्भवति —(i) क्रयणात, (ii) अपहरणात्, (iii) याच्ञायाः, (iv) विनिमयात् इति। अत च सर्वत्र कर्मादय सन्ति। एवं तर्हि कर्मादीनाम् अविवक्षा शेषः। कथं पुनः सतो नाम अविवक्षा स्यात् ? सतोऽप्यविवक्षा भवति। तद् यथा अलोमिका एडका (ewe), अनुदरा कन्या इति। असतश्च विवक्षा भवति। तद् यथा - समुद्रः कुण्डिका [= कमण्डलुः], विन्ध्यो वर्धितकम् [= मूले स्थूलम् अग्रे सूक्ष्मम् विशिष्ट संस्थानयुक्त अन्नम्] इति।

Thus we see that some sort of case relation is present in every case When we do not lay particular stress on the कर्म-relation, करण relation &c, but imply simply relation in general, we use षष्ठी, as न मातापित्रोः अशुश्रूषा, अनुकरोति भगवतो नारायणस्य, मातुः स्मरति &c.

(5) प्रजारागमूलत्वात् &c Since the attachment of the subjects is the source of all prosperity. An echo of "जनानुरागप्रभवा हि सम्पदः"।

पालनी—पा + णिच् + करणवाच्ये ल्युट् by the rule :

करणाधिकरणयोश्च (पा ३।३।११७ सि ३२६८)

करणे अधिकरणे च कारके धातो ल्युट्प्रत्ययो भवति। The suffix ल्युट (अन) is added to a root in the करण and अधिकरण, वाच्य's n addition to the भाववाच्य (for which the rule is "ल्युट् च"—पा. ३।३।११५ सि. ३२६४) ।

गौरं अते चस्मात् इति गोदोहनी स्थाली ।

[Besides these three वाच्यs – भाव, करण and अधिकरण, लुट् is sometimes used in other senses also by the rule कृत्य-ल्युटो बहुलम् (पा. ३।३।११३ सि. २८४१)। The suffixes technically known as कृत्य viz, तव्य, अनीय, यत् ण्यत्, क्यप् &c. and the suffix ल्युट् are used in some cases in senses other than those prescribed. करणाधिकरणयो भावे च ल्युट् विहित:। अन्यत्रापि भवति। प्रपतति अस्मात् इति प्रपतन.। अपादाने ल्युट्। आच्छाद्यन्ते इति आच्छादनानि। कर्मणि ल्युट्। राज्ञ आच्छादनानि राजाच्छादनानि।

टिड्ढाणञ् &c.—The full rule is :

टिड् - ढाण् - अञ् - द्वयसज् दघ्नञ् मात्रच् - तयप् -ठक् - ठञ्-कञ् क्वरप् ख्युनाम् (काशिका ४।१।१५ सि. ४७०)

The affix ङीप् is added in the feminine to a nominal stem ending in (short) अ, if it does not become subsidiary and if the affix with which it ends has an indicatory ट्, or if the affix is अण्, अञ्, द्वयसच् दघ्नच्, मात्रच्, तयप्, ठक्, ठञ्, कञ्, क्वरप् or ख्युन्

Now since the affix ल्युट् has an indicatory ट् the feminine of पालन is formed by adding ङीप् (of which ई remains) So we get पालन+ई. Now the final अ of पालन is elided before this ई by the rule यस्येति च (पा. ६।४।१४८ सि. ३११) which means. "The final i and a (both short or long) of a भ stem are elided before a तद्धित-affix and before the feminine affix ई. So we get पालन्+ई=पालनी।

ढ—सौपर्णेयी। अण—कुम्भकारी। अञ्—औत्सी। द्वयसच —ऊरु-द्वयसी। दघ्नच्—जानुदघ्नी। मात्रच्—जानुमात्री। तयप्—पञ्चतयी। ठक्—आक्षिकी। ठञ—लावणिकी। कञ्—यादृशी। क्वरप्—इत्वरी। ख्युन्—आढ्यङ्करणी।

[In the अष्टाध्यायी—this rule is read as कञ्-क्वरप: instead of कञ्-क्वरप्-ख्युनाम्।]

प्रजा means (1) Progeny and (2) Subject.

प्रजाः प्रजाः स्वा इव तन्त्रयित्वा निषेवते शान्तमना विविक्तम्। [अक ५।५]

वर्णिन् ।

[Amara gives the following different meanings of वर्ण— वर्णौ द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे] । Mallinatha paraphrases this स्तुति by प्रशस्ति—Praise, hence excellence. Here of course the excellence consists in abstinence from the eightfold मैथुन viz, स्मरण (remembering with longing), कीर्तन (describing to another with relish), केलि (sporting , प्रेक्षण (gazing on with longing), गुह्यभाषणम् (whispering words of love in private), सङ्कल्प. (imagination), अध्यवसाय (resolution, determination) and क्रियानिर्वृत्ति (consummation or the crowning of love).

वर्णाद् ब्रह्मचारिणि (पा. ५।२।१३४ सि १९४०)

The suffix इनि is added to the nominal stem वर्ण to denote ब्रह्मचारिन् । [Cf रघु ५।१९—वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुत माचचक्षे, कुमार ५।६५—अथाह 'वर्णी' विदितो महेश्वर., also ५।५२ ।

M's learned explanation of the word वर्णिन् seems to be out of place here. For, here the spy had merely assumed the external appearance of a Brahmacharin, so details as to the dress, girdle, &c , of a Brahmacharin would have been more relevapt. M. might have quoted स्मरणं कीर्तनम् &c in his commentary on कुमार ५।५२ Chitrabhanu says the same thing : 'वर्णिनो हि सर्वत्र बालत्वात् अशङ्कनीयाः, द्विजत्वात् अप्रतिषेध्याश्च । * * वर्णिनो लिङ्गं कृष्णाजिन-दण्ड-मेखलादि बाह्यमेवाधौ अपश्यद्, न तद्-भावनाम् । मनसा तु सङ्कल्प एव स्थित इत्यर्थः ।'']

(8) किरात, शबर and पुलिन्द—these three are different म्लेच्छ tribes.

(9) ट is added to the root चर् preceded by the अधिकरण 'वने' by the rule :

चरेष्टः (पा. ३।२।१६ सि. २९३०) ।

चरेर्धातोरधिकरणे सुबन्ते उपपदे ट-प्रत्ययो भवति। The root चर् admits ट in the कर्तृवाच्य when preceded by an अधिकरण as उपपद. कुरुषु चरति कुरुचरः। So we get वने चरतीति वनेचरः (उपपद-तत्पुरुष). The सप्तमी in वने is not dropped. The rule is

तत्पुरुषे कृति बहुलम् (पा. ६।३।१४ सि ९७१)

तत्पुरुषे समासे कृदन्ते उत्तरपदे सप्तम्या बहुलम् अलुग् भवति। In a तत्पुरुष compound when the second member is a word formed with a कृत् affix, सप्तमी is optionally retained. बहुलम् is thus defined—

(i) "क्वचित् प्रवृत्ति (ii) क्वचिद् अप्रवृत्तिः (iii) क्वचिद् विभाषा (iv) क्वचिद् अन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति॥"

In some cases the rule applies, in some cases the rule does not apply, in some cases the rule applies optionally, in some cases something quite different from what is prescribed by the rule takes place The rule here applies in the case of कर्णेजपः (a secret traducer), स्तम्बेरमः (an elephant) &c It does not apply in the case of कुरुचरः, मद्रचर &c. It applies optionally in the case of वनेचर· (opt. form वनचरः), सनसिजः &c.

विदितः।

[This word has rather puzzled M The difficulty arises thus. विदित has evidently been formed from the root विद् 'to know' by the addition of the affix क्त Put in which वाच्य has क्त been added here ? We cannot say that क्त has been added in the कर्तृवाच्य, because विद् being transitive does not admit क्त in the कर्तृवाच्य. Nor can we say क्त has been added here in the कर्मवाच्य because no कर्म is discernible here and besides in कर्मवाच्य the meaning of विदित will be 'he being known' which is absurd. Still less can we say that क्त has been added in the भाववाच्य, for then the form will be विदितम् (by नपुंसके भावे क्तः पा. ३।३।११४) and the meaning

"knowledge." Mallinatha successively shows that क्त can be said to have been added in भाववाच्य, कर्मवाच्य or कर्तृवाच्य. The easiest and most natural solution is—(ii) **कर्म्माविवक्षायाम् अकर्म्मकस्य विदेः "गत्यर्थाकर्म्मक—"(पा. ३।४।७२) इत्यादिना कर्त्तरि क्त-प्रत्ययः।**

(i) Mallinatha first of all shows that विदित can be derived in the भाववाच्य. विद्+नपुंसके भावे क्तः = विदितम् (an abstract noun meaning 'knowledge'). Then we add the तद्धित suffix अच् to विदित in the sense of अस्ति i. e 'possessed of' so that we have विदित+अ i. e. विदित (the final अ of विदित being dropped by the rule यस्येति च) meaning 'possessed of knowledge' (of the affairs of the enemy). The rule for अच् is

अर्श आदिभ्योऽच् (पा. ५।२।१२७ सि १९२२)

अर्शस इत्येवमादिभ्य प्रातिपदिकेभ्यः अच्-प्रत्ययो भवति **मत्वर्थे।** अर्शांसि अस्य विद्यन्ते अर्शसः (one suffering from piles). पापम् अस्य विद्यते पाप (sinful) आकृतिगणोऽयम्। **"यत्राभिन्नरूपेण शब्देन तद्वतोऽभिधानम् तत् सर्व्वम् इह द्रष्टव्यम्।"**

(ii) M. now shows that क्त can be added in the कर्म्मवाच्य also He says विदितः stands for विदितवृत्तान्तः [(विदित. वृत्तान्त येन स) where वृत्तान्त is the object and येन the nom. of the root विद्] by the super-imposition of the attribute of the object on the subject.

In both the above cases (i) and (ii), the expression विदितः is justified like the expressions पीता गावः, [भुक्ता ब्राह्मणाः], विभक्ता भ्रातरः &c., but not by क्त in the कर्तृवाच्य, for it (क्त) has not been prescribed in the कर्तृवाच्य in the case of transitive roots. Hence the author of the Mahabhashya says : The suffix अ is the one having the sense of मतु ; विभक्ताः means those possessed of division &c. Or, in such cases the last member is to be

regarded as having been dropped. विभक्ताः stands for विभक्तधनाः those whose patrimony has been divided, पीताः stands for पीतोदकाः those who have drunk water, [भुक्ताः stands for भुक्तान्ना those who have eaten their food]. Kaiyata explains the meaning of लोप in this connexion. By लोप is here meant the suppression (lit. non-statement) of what is quite evident (from the context) &c

Similarly in the present instance विदितत्व or 'the state of being known' which evidently refers to the conduct of Duryodhana towards his subjects is transferred to the hunter who learnt about it.

आदि includes समाश्रितैरप्युपविष्टपितसत. पद इमः स्या कदमीय !
माइयाम्—श्रियपाल १।३७।

(ii) Or विदित = विदितवान् । क्त has been added in the कर्तृवाच्य to the root विद् which though transitive is used intransitively, the object being not intended to be mentioned; As in आश्रित कर्त्ता and such other expressions [आश्रित कर्त्ता (पा ६।१।२०७ सि ३६९५) "आश्रितः शब्दः कर्तृवाची आद्युदात्तो भवति। अशेरयमाङ्पूर्व्वात् अविवक्षित कर्म्माच्च कर्त्तरि क्तः" काशिका]. The sutra आश्रितः कर्त्ता lays down that the first syll. of the word आश्रित will take the acute (उदात्त) accent, when it is in the कर्तृवाच्य. Now, the root श्रि is transitive; so how can it get क्त in the कर्तृवाच्य * ? The answer is that the object being not intended to be expressed, the root

* By the rule—गत्यर्थाकर्म्मक-श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह जीर्य्यतिभ्यश्च (पा ३।४।७२ सि. ३०८६).

गत्यर्थेभ्यो धातुभ्योऽकर्म्मकेभ्यः श्लिषादिभ्यश्च य. क्तः स कर्त्तरि भवति। चकाराद् यथाप्राप्तं च भाव-कर्म्मणो। श्लिषादय. सोपसर्गा. सकर्म्मका भवन्ति तदर्थमेषाम् उपादानम्।

The affix क्त is added in the कर्तृवाच्य (as also in कर्म्म

[illegible] intransitive root [illegible] is added in कर्तृवाच्य. Thus [illegible] himself indirectly lends support to this third explanation. *

It has been said : A [transitive] root becomes intransitive when (*a*) the meaning of the root undergoes a change, as भारं वहति (carries) and नदी वहति (flows); 'निरावारा वा 'रोदिति' [illegible] — [illegible]. "[illegible]" — [illegible]। The thief *ran* away and he *ran* a thorn into his finger ; (*b*) when the meaning of the object is included in that of the root, as जीवति meaning प्राणान् धारयति, स्वपिति meaning प्राणान् [illegible], शब्दायते meaning शब्दं करोति, (*c*) when the object is so well-known as not to require separate mention, as मेघो वर्षति but रुधिरं वर्षति, लाजान् वर्षति &c., Does he *drink* ? and he *drinks* a cup of tea, (*d*) when the speaker does not intend to mention the object, as दीक्षितो न ददाति, न पचति, न जुहोति, हरि कथयति &c A new born child *sees*, but a kitten is born blind.

(iv) Or विदितः = वेदितः। It is अन्तर्भूत ण्यर्थ, that is, the sense of णिच् is implied in it. The nom is प्रतिहारादिना understood. The object is वनेचरः. The meaning is : he was informed [about the affairs of D.] by the gate-keepers and others.

[A fifth explanation has been proposed by सुवर्णरेखा (quoted in the दुर्घटवृत्ति)। विद् + क्विप् (भावे) = विद् (= वेदनम्)। विद् + (इतच् तारकादित्वात्)।]

(10) Free from grief and infatuation

हलदन्तात् सप्तम्याः संज्ञायाम् (पा. ६।३।९ सि. ९६६)।

---

and भाष्यकार's) to verbs implying motion, intransitive roots and to the roots श्लिष्, शी, स्था, आस्, वस्, जन्, रुह् and जॄ।

* See also p. 20 f. n.

हलन्तात् अदन्ताच्च उत्तरस्याः सप्तम्याः संज्ञायाम् अलुक् भवति। The locative-ending is not elided after a stem ending in a consonant or अ, when the compound is a name.

Here युधिष्ठिर is a संज्ञा, because it does not refer to any body and every body who is 'firm in battle' but to the particular person (the son of Pandu) who goes by that name. Hence the सप्तमी in युधि is not dropped.

So we get युधिस्थिर. Now the स of स्थिर is changed into ष by the rule.

गवि युधिभ्यां स्थिरः (पा ८।३।९५ सि ९९७)।

गवि-युधिभ्याम् उत्तरस्य स्थिर शब्दस्य 'स'कारस्य मूर्धन्यादेशो भवति। गविष्ठिर (the name of a sage, lit firm in speech), युधिष्ठिरः।

The स् of स्थिर is changed into ष् after the words गवि and युधि. As soon as the स् is changed into ष, the थ् is changed into ठ् acc to the rule ष्टुना ष्टुः (पा. ८।४।४१) which means स् and त-वर्ग are cerebralised in contact with ष् and ट वर्ग.

(11) M. says—"In this Sloka, the Figure of speech is वृत्त्यनुप्रास because in the expression वने वनेचरः the group of vowels and consonants has been repeated only once."

Similarly, in his commentary on Sisupalavadha I. 1, M. remarks तकारसकारादेः केवलस्य असकृदावृत्त्या जगज्जगदिति सकृद्व्यञ्जनद्वय-सादृश्याच्च वृत्त्यनुप्रासभेदौ शब्दालङ्कारौ।

The साहित्यदर्पण defines अनुप्रास thus—

"अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्' (साहित्यदर्पण १०।२). Alliteration is the similarity of sounds (i. e consonants) in spite of the dissimilarity of vowels, "वर्ण-साम्यम् अनुप्रासः."—काव्यप्रकाश ९।२। "सरूपवर्णविन्यासम् अनुप्रासं प्रचक्षते"—भामह २।५। In English similarity of vowel-sounds also constitutes Alliteration; Cf "Apt alliteration's artful aid." But Sanskrit rhetoricians hold there is no charm in the similarity of

mere vowel-sounds. According to them it is the similarity of letters i. e. consonants that constitutes this अलङ्कार.

अनुप्रास is divided into छेकानुप्रास, वृत्त्यनुप्रास and लाटानुप्रास.

Prataparudra defines them thus :

> भवेद् अव्यवधानेन ययोर्व्यञ्जन-युग्मयो ।
> आवृत्तिर्यत्र स बुधैश्छेकानुप्रास इष्यते ॥

When two pairs of consonants are repeated without any intervening consonant, they constitute छेकानुप्रास

> एक-द्वि-प्रभृतीनां तु व्यञ्जनानां यदा भवेत् ।
> पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥*

When (1) one consonant is repeated more than once, (2) two consonants without any intervening consonant are repeated once only, but more than once if there be any intervening consonant, (3) more than two consonants once or more than once, with or without intervening consonants, the figure of speech is known as वृत्त्यनुप्रास.

> शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदवत् ।
> स काव्य-तात्पर्य-विदां लाटानुप्रास इष्यते ॥

यत्र शब्दार्थयोस्तात्पर्यभेदमात्रं तु स्वरूपभेदः तत्र लाटानुप्रासः ।

लाटानुप्रास is the repetition of the same word in the same sense but with a different import or in a different construction. "Though in अनन्वय, there is a similar repetition of

---

* प्रभृति-शब्दात् त्रि-चतुरादि-संग्रहः । अत्र एकस्य व्यञ्जनस्य सकृदावृत्तौ वैचित्र्याभावात् सामर्थ्यात् असकृदावृत्तिर्लभ्यते । द्वयोस्तु सकृदेव । अन्यथा छेकानुप्रासः स्यात् । व्यवधाने तु असकृदावृत्तावपि न विरोधः । त्र्यादीनां तु सकृत् असकृद् वा व्यवधानेन अव्यवधानेन वा आवृत्तिर्द्रष्टव्या । इतिशब्देन वैदर्भ्यादयो विवक्षिताः । तद्रूपवक्षितानुप्रासो वृत्त्यनुप्रासः ।

word and sense, the object of the poet (there) is simply to show that the उपमान and the उपमेय are the same while there was no such object in the लाटानुप्रास "

तात्पर्य्यम् is explained in the अलङ्कार-सर्व्वस्व as अन्यपरत्वम् which is explained by Jayaratha thus—एकस्य वाच्यविश्रान्तत्वेऽन्यस्य तदर्थे व्यङ्ग्ये वार्थे वाच्यविश्रान्तिः इत्यर्थः। The author of the Kavya-pradipa explains it as अन्वयभेदः or difference of syntactical construction. If the second meaning be accepted, then वने वनेचर is clearly a case of लाटानुप्रास and not of छेकानुप्रास Mallinatha seems to accept the first meaning So according to him—

तदा जायन्ते गुणा यदा ते सहृदयैर्गृह्यन्ते।
रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि॥

is an instance of लाटानुप्रास (एकः कमलशब्दः वाच्यपर्य्यवसितः, अन्यस्तु सौरभ्यसम्पुरत्वाद्यनेकधर्म्मनिष्ठ इति तात्पर्य्यभेदः इति जयरथः), whereas—

ब्रूम. कियच्चिरं कथञ्चन कालमल्पम्
अन्तःजनयने नयने निमील्य।
हेमाम्बुजं तदपि तत्परतापचय
दैवद्विषोऽयमहमागत इत्यवेहि॥

is not a case of लाटानुप्रास because there is no difference of import, the two नयन's connoting the same thing. *

'वने वनेचराः' cannot be regarded as an instance of यमक, because the two वने's have the same meaning here and a यमक is the repetition in the same order of a group of vowels and consonants without a meaning or having different meanings

---

* Cf. जयरथ—अत्र हि द्वयोरपि नयनशब्दयोर्वाच्यविश्रान्तत्वात् अन्यपरत्वाभावात् नास्ति तात्पर्य्यभेदः। स एव हि अस्य जीवितम्। अन्यथा

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।

Thus गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः [काव्यादर्श II. 141] is an instance of यमक because the group of vowels and consonants ग्, च्, छ् and स has been repeated, the first group having a meaning and the second being meaningless Again,

"यातु यातु किमनेन तिष्ठत
सुख सुख सखि सादर वच."

cannot be placed under either यमक or लाटानुप्रास for the meaning and import are the same in both cases

The definitions of वृत्त्यनुप्रास and छेकानुप्रास given above from the Prataparudra of Vidyanatha agree in the main with those of the अलङ्कारसर्वस्व, एकावली &c The views of मम्मटभट्ट, विश्वनाथ and others are quite different Mallinatha remarks in

सितकर कर-रुचिरविभा विभाकराकार धरणिधर कीर्तिः ।
पौरुषकमला कमला सापि तवैवास्ति नान्यस्य ।

इत्यादावपि सर्वम् । चमत्कारस्तु न अनुप्रासकृतोऽस्तीति । (Alankara sarvasva, N. S. Press Ed pp 23 24).

his commentary on एकावली (VII. 3) "सोऽनेकस्य सकृत्पूर्वः"- [काव्यप्रकाश ९।२) इत्यादिना सकृद् व्यञ्जनयुग्मसाम्यं छेकानुप्रासः असकृत्

हि अनुप्रासमात्रत्वं स्यात् न अलङ्कारत्वम्। अथापि केवलनयनशब्दस्य स्वार्थविश्रान्तिः संसर्गपदान्तर्गतस्य पुनः स्वार्थमुपसर्जनीकृत्य सन्निनमभिदधतश्च स्वार्थत्यागात् परार्थे च वृत्तेरस्त्येव लाक्षणिकत्वम् इति चेत्, नैतत्। लक्षणासामग्र्यभावात्। अत्र हि अन्यपदार्थप्रधानत्वात् नयनशब्दस्य गुणीभावः, न मुख्यार्थबाधः, स्वार्थ एव विश्रान्तिः। न च गुणीभावमुख्यार्थबाधयोरैकात्म्यम्, यतो हि मुख्यार्थस्य कथञ्चिदपेक्षया गुणीभावः। बाधः पुनः सर्वथैव अविश्रान्तिरित्यनयोर्महान् भेदः। तस्मात् किञ्चित् प्रयोजनं, न वा रूढिरित्येतत् पौनरुक्त्यमेवम्। एवम्

सदृशत्वेऽनुप्रासः इत्याह काव्यप्रकाशकारः। अलङ्कारसर्वस्वकारस्तु तद्विपरीतं सिद्धान्तयाञ्चकार।

विश्वनाथ defines छेकानुप्रास and वृत्त्यनुप्रास thus—

(1) छेको व्यञ्जनसङ्घस्य सकृत् साम्यम् अनेकधा।

(2) अनेकस्यैकधा साम्यम् असकृद् वाप्यनेकधा।

एकस्य सकृद् अप्येष वृत्त्यनुप्रास उच्यते ॥ S. D. X 45.

i. e. (1) the repetition of a group of consonants in the same form and order only *once* constitutes छेकानुप्रास and

(2) (a) the repetition of a number of consonants (two or more) in form only (but not in the same order) once or more than once, (b) the repetition of a number of consonants in the same form and order more than once; (c) the repetition of a single consonant once or more than once constitute वृत्त्यनुप्रास

(12) In this canto the metre is वंशस्थ (विल) It is defined thus: "जतौ तु वंशस्थम् उदीरितं जरौ" i. e. the *ganas* ज त ज र constitute a वंशस्थविल

ज			त			ज			र		
⏑	—	⏑	—	—	⏑	⏑	—	⏑	—	⏑	—
ज	तौ	तु	वं	श	स्थ	मु	दी	रि	तं	ज	रौ
श्रि	यः	कु	रू	णा	म	धि	प	स्य	पा	ल	नीं

Remember

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत्।

वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा।

" A syllable is लघु (short) or गुरु (long), according as its vowel is 'short' or 'long.' The vowels अ, इ, उ, ऋ and ऌ are short , आ, ई, ऊ, ॠ, ए, ऐ, ओ and औ are long. But a short vowel becomes long when it is followed by an अनुस्वार or विसर्ग, or by a conjunct consonant. [Hence 'श'

सितकर-कर-रुचिरविभा विभाकराकार धरणिधरकीर्त्ते।

पौरुषकमला कमला सापि तवैवास्ति नान्यस्य॥

इत्यादावपि छेकोऽयम्। चमत्कारस्तु अनुप्रासकृतोऽवसेयः। (Alankara-sarvasva, N S Press Ed pp. 23-24).

in शिवः and 'प' in अधिपस are long]. So also the last. vowel of a पाद is either long or short, according to the exigence of the metre, whatever be its natural length".—Apte

अलुक्-समासः।

हितात्—"आख्यातोपयोगे" इति अपादानत्वात् पञ्चमी। धा + कर्मणि क्त हितम्।

शृणुते—सम् + श्रु लट् ते Atm by समो गम्यृच्छि-प्रच्छि-स्वरत्यर्तिश्रुविदिभ्य because it is used here intransitively, the object being not intended to be expressed. The roots गम्, ऋच्छ प्रच्छ स्वृ, ऋ, श्रु and विद् are Atm when preceded by सम् and used intransitively. संशृणोति न श्रोतानि Bhatti V 19. लुङ् अश्रौषीत् but समश्रोष्ट

किम्प्रभुः—कुत्सितः प्रभुः (कर्मधा. नित्यसमास)। 'किं क्षेपे' इति समास'।

सर्वदा—सर्व + दा (कालार्थे) "सर्वैकान्यकिंयत्तदः काले दा" पा ५।३।१५ इति दाप्रत्ययः। Alt form सर्व्वदा।

अनुकूलेषु—pred. adj to नृपेषु and अमात्येषु. अनुगता कूलं (तटम्) इति अनुकूलम् —प्रादिसमास ; following the bank or slope, with the current, hence favourable

कुर्व्वते—कृ लट् अन्ते nom सर्वसम्पदः obj. रतिम् कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

रतिम्—रम् + क्तिन् 2-1 declined like मति, obj. to कुर्वते । 'रति. कन्दर्पभार्य्यायां सुरतोत्कण्ठयोरपि । रागेऽपि परमप्रीतौ'—केशव ।

नृपेषु—नॄन् पान्ति इति नृपाः नृ + पा + क (कर्त्तरि) भावे सप्तमी or अधिकरणे सप्तमी ।

अमात्येषु—अमा सह भवन्ति इति अमात्याः । अमा + त्य(प्)—"अव्ययात् त्यप्" । यस्य च भावेन भाव-लक्षणम् इति सप्तमी or अधिकरणे ७मी ।

सर्व्वसम्पदः—सर्वाः सम्पदः कर्मधा 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पुंवद्भा । सम् + पद + भावे क्विप सम्पत् । 1/3 fpm

घण्टापथः—तर्हि तूष्णीम्भाव एव वरम् (1) इत्याशङ्का आह—'सः' इति । 'स' सखा अमात्यादि 'अधिप' 'तं' 'हित' 'न' 'शास्ति' न उपदिशति (2) 'दुहि-शासि—" [महाभाष्य unde १।४।५१] इत्यादिना शासेर्द्विकर्मकत्वम् । 'स' हितानुपदेष्टा । कुत्सित सखा 'किंसखा' दुर्मन्त्री इत्यर्थ । (3) "किम क्षेपे" [पा ५।४।७०] इति समासान्त-प्रतिषेध. । तथा 'य' प्रभु. निग्रहानुग्रहसमर्थ स्वामी 'हितात्' आप्तजनात् हितोपदेष्टु सकाशात् (4) "आख्यातोपयोगे" [पा १।४।२९] इति अपादानत्वात् पञ्चमी । 'न' मृणुते, न शृणोति—'हितम्' इति शेषः । (5) "समो गम्यृच्छि—" [पा १।३।२९] इत्यादिना सपूर्व्वाच्छृणोतेः **अकर्म्मकत्वात्** आत्मनेपदम् । अकर्म्मकत्वं वैवक्षिकम् । 'स' हितम् अशृोता प्रभु । 'किम्प्रभु' कुत्सितस्वामी । पूर्व्ववत् समास । सर्व्वथा सचिवेन वक्तव्य श्रोतव्य च स्वामिना, एवं च राजमन्त्रिणाः ऐकमत्य स्यात् इत्यर्थं । ऐकमत्यस्य फलम् आह—'सदा' इति । 'हि' यस्मात् 'नृपेषु' स्वामिषु । अमा सह भवा अमात्याः तेषु [अमात्येषु] च । (6) 'अव्ययात् त्यप्' [पा ४।२।१०४] 'अनुकूलेषु' परस्परानुरक्तेषु सत्सु 'सर्व्वसम्पदः सदा' 'रतिम् अनुरागं 'कुर्व्वते कुर्व्वन्ति' न जातु जहति इत्यर्थं । अतो मया वक्तव्य त्वया च श्रोतव्यम् इति भावः ।

(7) अत एव राज-सन्निधौ हितानुपदेश-तदश्रवण-निन्दा-सामर्थ्यसिद्धे * ऐकमत्य-लक्षणकारणस्य निर्दिष्टस्य सर्व्व-सम्पत्-सिद्धि-रूप-कार्य्येण समर्थनात् कार्य्येण कारण-समर्थन-रूप, अर्थान्तरन्यासोऽलङ्कारः। तदुक्तम्—"सामान्य-विशेष—कार्य्य-कारण-भावाभ्यां निर्दिष्टप्रकृतसमर्थनम् अर्थान्तरन्यास." [अलङ्कारसूत्रम् २५]।

Ghantapatha Explained.

(1) In that case, it would be better to remain silent

(2) The full कारिका is—

दुहि-याचि-रुधि-प्रच्छि-भिक्षि-चिञाम् उपयोगनिमित्तम् अपूर्व्वविधौ।
ब्रुवि-शासि-गुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना॥

दुहि-याचि चिञाम् उपयोगनिमित्तम् प्रधानकर्म्मसंज्ञ भवति। ब्रुव शास्यो-र्गुण साधनं प्रधान कर्म्म धर्मादिकं तेन यत् सम्बध्यते तत् अकीर्त्तितम्' अकथितम् 'आचरितं कथित' 'कविना' सूत्रकारेण। अपूर्व्वविधौ—कर्म्मसंज्ञापेक्षया पूर्व्वसंज्ञाना विधिविषयाभावे i. e provided they do not come within the scope of any rule enjoining अपादान, सम्प्रदान, करण or आधार.

शास् is a द्विकर्म्मक root, as it has been read (or enumerated) in the list of roots beginning with दुह्, thus, ब्रुवि, शासि &c Here the two objects are साधु (मुख्य) and अधिपम् (गौण).

(3) **किमः क्षेपे** (पा. ५।४।७० सि. ९५५)।

क्षेपे (= निन्दायां) य. किम्-शब्दः, तत. परस्य समासान्तो न भवति।

The समासान्त (टच्, अच् &c. as the case may be) is not applied to a word preceded by किम् in the sense of reproach

---

* This is the reading in all Mss. as well as printed editions. The meaning is not quite clear One feels strongly tempted to read *सामर्थ्यसिद्धस्य for *सामर्थ्यसिद्धे·। We can, however, read हितानुपदेश-तदश्रवण-निन्दाऽसामर्थ्यसिद्धेः and explain अन्वय. हितस्य अनुपदेशेन, राज्ञः हितस्य अश्रवणेन च निन्दा जायते, उभयोः असामर्थ्यं i. e. ऐकमत्याभावम् सिध्यति

कुत्सितः सखा किंसखा । Here किम् is compounded with सखि by the rule किं क्षेपे (पा. २।१।६४ सि. ७४३) 'किम्' इत्येतत् क्षेपे गम्यमाने सुपा सह समस्यते, तत्पुरुषश्च समासो भवति । The word 'किम्' implying reproach or censure is compounded with a सुबन्त word and the compound thus formed is तत्पुरुष [This is an instance of नित्यसमास, since the non compounded form कः सखा cannot convey the sense of censure or reproach. 'वाक्येन निन्दानवगमात् नित्यसमासोऽयम् ।"'] So we get किं सखि Now a समासान्त affix टच् is added to a तत्पुरुष compound (including कर्मधारय and द्विगु) ending in सखि by the rule राजाहःसखिभ्यष्टच् (पा. ५।४।९१ सि ७८८) । टच् (of which अ remains) is added to तत्पुरुष compounds ending in राजन्, अहन् and सखि, as महाराज, उत्तमाह, वायुसख &c In the present case the समासान्त टच् is barred by the rule किम क्षेपे. समासान्त is barred in two other cases also, viz, (1) न पूजनात् i. e. A तत्पुरुष comp preceded by सु and अति, in the sense of 'praise', does not admit any समासान्त and (2) नञस्तत्पुरुषात् i e a तत्पुरुष preceded by नञ् does not admit any समासान्त.

(4) आख्यातोपयोगे (पा. १।४।२९ सि ५९२) ।

आख्याता—वक्ता, प्रतिपादयिता । उपयोग.—नियमपूर्वकविद्यास्वीकारः, तस्मिन् वक्ता अपादानसंज्ञः स्यात् ।

The noun denoting the *teacher* is called अपादान in relation to the action signifying formal teaching In the present case, however, the rule, strictly speaking does not apply as he does not acquire knowledge through regular lessons from his well-wishers But Mallinatha does not interpret the rule in this narrow sense but extends the scope of the rule by taking आख्याता and उपयोग in their ordinary senses He, therefore, often cites this rule as enjoining the ablative case-ending after any source from which anything is heard. (Cf. Pandit Isvara

Chandra Vidyasagara's rule—श्रुत्यर्थानां श्रावयिता). Cf. इति तेभ्यः स्तुतीः शुश्रुवा—कुमार ११९, आख्यायकेभ्यः शुश्रूषुरुच्चि—भट्टिः ३१४४ वैखानसेभ्यः श्रुतवानवगां—भट्टि ३१४६ कौशिकादिदितश्रवया—रघु. 'न केवलं यो महतोऽपभाषते' शृणोति तस्मादपि यः स पापभाक्—कुमार ५।८३। Those who insist on the conventional interpretation of the rule will parse छिनात् &c. as अपादान by the rule 'ध्रुवम् अपाये अपादानम्' regarding अपाय here as *mental* and not physical

(5) समो गम्यृच्छि-प्रच्छि-स्वरत्यर्त्ति-श्रु-विदिभ्यः (काशिका १।३।२९)

सपूर्वेभ्यो गमि, ऋच्छि, प्रच्छि, स्वरति, अर्त्ति, श्रु विदि इत्येतेभ्य' अकर्मकेभ्य. धातुभ्य आत्मनेपद भवति। The roots गम्, ऋच्छ, प्रच्छ, स्वृ ऋ, श्रु and विद—preceded by the उपसर्ग सम् are used in the Atm provided they are intransitive The root सम् + श्रु though generally transitive has been used here intransitively, because the कर्म-relation is not intended to be conveyed here Cf. सङ्गच्छस्व रुपे। मत्कैः सङ्गच्छस्व वने शुभे'—Bhatti VIII 16.

(i) धातोरर्थान्तरे वृत्तेर (ii) धात्वर्थेनोपसंग्रहात्।

(iii) प्रसिद्धेर् (iv) अविवक्षात कर्मणोऽकर्मिका क्रिया॥

"अत्र स्वरिते स्य वस्तुत' कर्मत्वेऽपि तदविवक्षया अकर्मकत्वम्।" बालमनोरमा।

[The Sutra is found in the form given above in the Kasika. The अष्टाध्यायी reads समो गम्य च्छिभ्याम् (१।३।२९) which is supplemented by the Varttikas—विदि-प्रच्छि-स्वरतीनाम् उपसंख्यानम् and अर्त्ति श्रु-दृशिभ्यश्च इति वक्तव्यम्]।

(6) अव्ययात् त्यप् (पा. ४।२।१०४ सि. १३२४)।

अव्ययात् त्यप्-प्रत्ययो भवति शैषिकः। अमेहक्वतसित्रेभ्य एव। The affix त्यप् is added to अव्यय's (in the remaining senses).

This rule is too wide त्यप् should be restricted to the following अव्यय's—अमा (समीपे, सह), इह, क्व, words ending in तस (पा. ५।३।७ सि, १९५२) and त्र (पा. ५।३।१० सि' १९५७) अमात्य,

इहत्य, क्वत्य, इतस्त्य ततस्त्य &c. (cf. तनयं ततस्त्या विनियन्तुम् अक्षमा, —किरात २।२७)। Acc to western scholars अमा = at home, hence अमात्य lit. dwelling in the same house, hence companion

(7) Here the fig of speech is अर्थान्तरन्यास, because the cause viz the agreement between the king and the minister being established by the disparagement of not offering wholesome advice and not listening to such advice on the part of the minister and the king respectively is strengthened by the effect viz., the attainment of prosperity of every sort

It is said (अलङ्कारसूत्रम् ३५) —

सामान्यविशेष-कार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनम् अर्थान्तरन्यासः ।

निर्दिष्टस्य अभिहितस्य समर्थनीयस्य प्रकृतस्य, समर्थकात् पूर्वं पश्चाद् वा निर्दिष्टस्य यत् समर्थनम् उपादानं, न तु अपूर्वत्वेन प्रतीतिः । अतो न अनुमानरूपोऽसौ अर्थान्तरन्यासः । तत्र सामान्यं विशेषस्य, विशेषो वा सामान्यस्य इति द्वौ भेदौ । तथा कार्यं कारणस्य, कारणं वा कार्यस्य समर्थकम् इति द्वौ भेदौ । तत्र भेदचतुष्टये प्रत्येकं साधर्म्य-वैधर्म्याभ्यां भेदद्वये अष्टौ भेदाः ।

When (i) a particular statement which is प्रस्तुत is strengthened by a general statement, or (ii) a general statement which is प्रस्तुत is strengthened by a particular statement, and (iii) when an effect which is प्रस्तुत is justified by a cause, or (iv) a cause which is प्रस्तुत is justified by an effect—the Figure of speech is अर्थान्तरन्यास

Modern rhetoricians (with the exception of Visvanatha) hold that when an effect is strengthened by a cause or vice-versa, the Fig. of speech is Kavyalinga and not अर्थान्तरन्यास.

Extracts from other Commentaries.

स किंसखा—यथा, किं-शब्दः क्षेपे । स किं सखा ? सखैव न भवति इत्यर्थः.—SARAVALI.

अनुजीविनः प्रभुणा सह निर्व्याज-व्यवहारान्वयिनः. सख्यस्य असम्भवात्, सखि-शब्दस्तस्मिन्नर्थे लक्षणया गतिः स्वार्थान्वितं च विश्वास-हितमित्यादि लक्षयति। कि-शब्दः क्षेपे। सः अनुजीवी नैव सखादियुक्त इत्यर्थः।

शासनीय एव अनुजीवी शासकानामपि प्रभूणां कल्पवृक्षनादौ अनुशासनम् अकुर्व्वन् अपि दुष्यति। रिपुवृत्तान्तं यथावत् अवगम्य "निवेदय" इति प्रभुणा नियुक्तस्तद्विष-प्रतिभासभयादनृतम् दुष्यतितराम्। चाटुकारतया हितविरोधि प्रियं वदन् दुष्यतितमाम् इत्यभिप्रायः। **न संशृणुते**—सम्यक् सतात्पर्य्यावधानं न शृणोति, अवधारणेनावगम्य नावधारयति इति तात्पर्य्यार्थः।

हितवादिन एव अनुजीविनः स्वामिकृता रक्षा भवति इति द्योतयितुं पूर्व्वत्र अधिप-शब्दप्रयोगः हितवादिन एव स्वामिनः प्रभुत्वं भवति इति प्रकाशयितुम् उत्तरत्र प्रभुशब्दप्रयोगः इत्यर्थभेदोपपत्तेः प्रक्रमभङ्गदोषो न शङ्कनीयः। **अमात्य**— यथा, अमात्य-शब्दो मन्त्रीऽवधानादिभिर्गुणैरनुजीविनो लक्षयति।

कर्त्रभिप्राये क्रियाफले विहितं कुरोतेरात्मनेपदं सम्पत्तमस्य निक्रमोपभयरूप प्रयोजनं सूचयति। **रतिं कुर्व्वते** अप्रयत्नलभ्याः प्रियतमेव कामिन्य इव रमन्ते।

अयं तु श्लोकः सामान्याभिधायी विशेषपर्य्यवसाने सति अन्यम् अप्यर्थं द्योतयति। कृतिमसौहृदः कर्णादिवर्गः सखित्वेनाभिमतः, कुरूणामधिप सुयोधन सम्यक् न शास्ति। यस्तु हितैषी विदुरादिवर्गः सम्यग् अनुशास्ति, तद्वचनं नासौ बहुमन्यते। तस्मादस्य प्रभुत्वं नास्ति स्थिरम्, यस्मात् नृपेषु अमात्येषु च अनुकूलेषु सम्पदः स्थिरा भवन्ति इति। सोऽयम् अजय्य इति मतिर्मा भूद् इति।—CHITRABHANU.

University Questions Explain clearly the connexion of the above sloka with what follows. Give the senses of सखि, अधिप, हित, प्रभु, अनुकूल, रति, नृप and अमात्य. Turn into passive. किंसखा—S ; give other similar examples. किंसखा, संशृणुते—Gr N. Exp. संशृणुते Conjugate शास् in लङ् 3/1, लोट् 2, 1, लृट् and शतृ fem. Distinguish bet. किंसखा and किंसखः. Parse हितात्.

Remarks. The second line is open to the defect known as अस्थानस्थपदता, as the particle न which is syntactically con-

nected with समग्रवृत्ते and should therefore have been placed immediately before it has been placed before च. Another example occurs in VIII. 37.

निसर्ग-दुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः।
तवानुभावोऽयमवेदि यन्मया
निगूढ तत्त्वं नय वर्त्म विद्विषाम् ॥६॥

English Equiv.—निसर्ग—nature. विक्लव —distracted, overwhelmed. अनुभाव —greatness वर्त्मन्—path

Analysis (i) भूपतीनां चरितं क्व (मादृशाः) जन्तवः क्व where is the conduct of kings and where creatures like me ? Adj to चरित—निसर्ग-दुर्बोधम् naturally very difficult to understand. Adj to जन्तु —अबोध-विक्लवा overwhelmed with ignorance. (ii) अयं तव अनुभाव —This is your greatness What ? यत् मया विद्विषां नय-वर्त्म अवेदि—that the line of policy of the enemy has been ascertained by me. Adj. to नय-वर्त्म—निगूढ-तत्त्वम् the essence of which is carefully hidden

Prose-order निसर्गदुर्बोधं (स्वभावदुर्ज्ञेयं) भूपतीनां चरितं क्व, अबोध-विक्लवा (अज्ञानोपहता.) जन्तवः (मादृशा पामरजना) क्व ? यत् मया विद्विषां (शत्रूणां) निगूढतत्त्वं (सवृत-याथार्थ्यम्) नय-वर्त्म (षाड्गुण्यप्रयोग) अवेदि (ज्ञातम्) अयं तव अनुभावः (सामर्थ्यम्) ।

Bengali স্বভাবতঃ দুর্ব্বোধ রাজচরিত্র কোথায়, আর আমার ন্যায় মোহান্ধ জীবই বা কোথায় ? অর্থাৎ আমার ন্যায় সামান্য জ্ঞানহীন ব্যক্তির পক্ষে স্বভাবতঃ দুজ্ঞেয় নৃপতি-চরিত্র জ্ঞাত হওয়া সম্পূর্ণ অসম্ভব। (তবে)আমি যে শত্রুগণের সুগুপ্ত নীতিমার্গ জানিতে পারিয়াছি তাহা আপনারই মহত্ত্ব অর্থাৎ আপনার মহত্ত্বেরই পরিচায়ক।

English How far apart stands the conduct of kings naturally too deep to fathom from poor creatures (like myself) distracted by (our own) ignorance It has been your prowess indeed through which the intricate mazes of the diplomacy pursued by your enemies have been revealed to me.

Elucidation A few short months' court life has converted the rough hunter into an accomplished courtier How delicately he flatters the king! How skilfully he disclaims all credit for the success of his mission! He says Your Majesty must not think that I deserve any credit for fathoming the policy of the enemy. I am one of the most insignificant creatures under the sun—ill mannered, foolish and illiterate And it needs the finest intellect to penetrate into the mysteries of royal motives For me to aspire to be a consummate diplomat would be almost as reasonable as for a lame man to climb up a mountain No doubt I have been successful in my mission. But this only demonstrates your greatness. A born leader of men, you know how to infuse your spirit into your dependants. I have been, if I may say so, merely a tool in your Majesty's hands and so my success only redounds to your credit.

सिध्यन्ति कर्म्मसु महत्स्वपि यन्नियोज्याः,
सम्भावना-गुणमवेहि तमीश्वराणाम् ।
किं वाभविष्यदरुणस्तमसां विभेत्ता
तं चेत् सहस्रकिरणो धुरि नाकरिष्यत् ॥ Sak VII 4

Word-Notes.

निसर्ग-दुर्बोधम्—निसर्गेण दुर्बोधम् (३या तत्)। निसर्ग—नि + सृज् + घञ् (भावे)। "संसिद्धि-प्रकृती त्विमे, स्वरूपञ्च स्वभावश्च निसर्गश्च"—अमरः। [The

स of निसर्ग is not changed into ष, because it is neither a substitute (आदेश) nor a part of a प्रत्यय The rule न रपर-सृपि-सृजि-स्पृशि-स्पृहि सवनादीनाम् bars cerebralisation in the Vedas only] दुर्बोध—दुर्+बुध+खल् (कर्मणि)। Adj. to चरितम्.

अबोध-विक्लवा.—न बोध (बुध्+घञ् भावे) अबोध., तेन विक्लवा (३या तत्), adj to जन्तव "नलोपो नञ." ६।३।७३ इति न्-लोप.।

चरितम्—चर्+(गपु सके) भावे क्त.। प्रातिपदिकार्थे प्रथमा।

जन्तव —जन्+तुन् (कर्तरि)। "प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिण.।" प्रातिपदिकार्थे प्रथमा।

अनुभाव —भू+घञ्=भाव, अनुगत. भाव' अनुभाव (प्रादि-समास)। 'अनुभाव प्रभावे च सता च मतिनिश्चये।'

अयम्—though it refers to the whole clause and should have been neut is yet masc. because the predicate अनुभाव is masculine विधेयप्राधान्यात् पुंलिङ्ग-निर्देश।

अवेदि—विद कर्मणि लुङ् 3rd sing Nom. मया, obj नय-वर्त्म.

निगूढ-तत्त्वम्—नि+गुह्+क्त (कर्मणि)। निगूढं तत्त्व य स्य तत् (बहु)।

नय—नी+भावे अच् (['एरच्'—अच् is added to roots ending in इ or ई] The rule श्रिणीभुवोऽनुपसर्गे ३।३।२४ does not apply here क्वचिद् अपवादविषयेऽपि उत्सर्गोऽभिनिविशते—In some cases the general rule applies even though they clearly come under the scope of the exception] The form with घञ् is नाय.

वर्त्मन्—वृत्+मनिन् (करणे or अधिकरणे) वर्त्तन्ते अनेन or वर्त्तन्ते अत्र।

Syn अयन वर्त्म-मार्गा-ऽध्व-पन्थान पदवी सृति.
सरणि: पद्धति पद्या वर्त्तन्येकपदीति च॥

विद्विषाम्—वि+द्विष्+कर्तरि क्विप् विद्विष् 6.3 शेषे षष्ठी। नय इत्यनेन सम्बन्ध.। लट् द्वेष्टि, द्विष्ट, लोट् द्वि—द्विड्ढि, लङ् अद्वेट् अद्विष्टाम् अद्विषु: and अद्विषन्; लुङ् अद्विक्षत्.

घण्टापथः—स्वसम्मति शङ्काम् परिहरति—निसर्गेति। 'निसर्ग-दुर्बोधं' स्वभावदुर्ज्ञेयम्। (1) 'ईषद्दुःसु—' [पा. ३।३।१२६] इत्यादिना खल्-प्रत्ययः। 'भूपतीनां चरितं क्व'। 'अबोध-विक्लवाः' अज्ञानोपहताः 'जन्तवः' मादृशाः पामर-जना इत्यर्थः 'क्व'—(2) नोभयं सङ्घटत इत्यर्थः। तथापि 'निगूढ-तत्त्वं' गूढ-याथार्थ्यं 'विद्विषां नय-वर्त्म' (3) षाड्गुण्य-प्रयोगः।

सन्धि-विग्रह-यानानि संस्थाप्यासनमेव च।
द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्॥

इत्यादिरूपो 'यत्' मया 'अबोधि' ज्ञातम् इति यावत्। बुधेः कर्मणि लुङ्। 'अयम्' इदं वेदनम् इत्यर्थः (4)। विधेय-प्राधान्यात् पुंलिङ्गनिर्देशः। तव 'अनुभावः' सामर्थ्यम्। (5) अनुगतो भावः अनुभाव इति अत्यन्त प्रादिसमासः, न तूपसृष्टाद् घञ्-प्रत्ययः। "श्रि णी-भुवोऽनुपसर्गे [पा. ३।३।२४] इत्यनुपसर्गाद् भवतेर्घञ् विधानात्। अत एव काशिकायां—"कथं प्रभावो राज्ञाम्? प्रकृष्टो भावः इति प्रादिसमासः।" (6) दोष-परिहारौ सम्यग् ज्ञात्वैव विज्ञापयामि, न तु वृथा कर्णकठोरं प्रलपामि इति भावः।

Ghantapatha Explained

(1) **ईषद्-दुः-सु-षु कृच्छ्राकृच्छ्रार्थेषु खल्** (पा. ३।३।१२६ सि ३३०५)।

A root preceded by ईषत्, दुर् or सु admits खल् in the कर्म or भाववाच्य in the sense of difficulty or ease. In दुर्बोध the root बुध् is preceded by दुर्, hence खल् is added to it in the कर्मवाच्य in the sense of difficulty.

(2) The two cannot meet or come together i e there is an impassable gulf between the two [Mallinatha says under Raghu I 2. "द्वौ क्व-शब्दौ महदन्तरं सूचयतः।"] In other words, it is impossible for ignorant men like myself to comprehend the conduct of kings which is naturally unfathomable. Cf Ki. XIV. 22 :

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीविनश्छिदः।
सहापकृष्टैर्महतां न सङ्गतं भवन्ति गोमायुसखा न दन्तिनः॥

(3) नय-वर्त्म (literally the path of polity) means the application of the six political expedients viz. सन्धि (peace), विग्रह (hostility), यान (march or expedition), संस्थाप्य [संस्थाप्य—सम् + स्था + णिच् + यत् (भावे)] i. e. आश्रय (alliance), आसन (inaction) and द्वैधीभाव (duplicity i. e resorting to सन्धि and विग्रह at the same time , in other words, he makes a feint of yielding to the enemy but carries on war in secret—बलवता अभियुक्तस्य वाचिकम् आत्मसमर्पणम्).

Cf Kautilya—'पणबन्धः सन्धि , अपकारो विग्रह , उपेक्षणम् आसनम्, अभ्युच्चयो यानम् परार्पणं संश्रयः, सन्धि-विग्रहोपादानं द्वैधीभाव । परस्मात् हीयमान सन्दधीत, अभ्युच्चीयमानो विगृह्णीयात्, 'न मां परो नाहं परम् उपहन्तुं शक्त' इत्यासीत, गुणातिशय-युक्तो यायात्, शक्तिहीनः संश्रयेत, सहाय साध्ये कार्य्ये द्वैधीभावं गच्छेत् ।" (कौ ७।१।९८)

(4) [Here अयम् has for its antecedent the whole clause यत् मया अवेदि &c. in other words अयम् means इदं वेदनम् so it should have been in the neuter gender and not in the masculine In answer to this M. says:] Here अयम् is represented as masculine because (it refers to अनुभाव which is the predicate here and) the predicate predominates Cf. शैत्यं हि यत् सा प्रकृतिर्जलस्य [रघु ५।५४] यन्मरणं सोऽस्य विश्राम. [हितोपदेश १ ।] नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीत: [रघु. १४ ६७], मत् तस्य किमपि द्रव्यं यो हि यस्य प्रियो जन: [भवभूति]। The subject is more or less known to us, but the predicate generally conveys some new information about the subject, hence the predicate is the more important of the two. *

Kaiyata, commenting on 'किं यत्तत् सास्ना-लाङ्गूल ककुद-खुर-विषाण्यर्थरूपं स शब्दः [महाभाष्य पस्पशायाम्] says —

---

* See Calcutta Oriental Journal Vol. I. No. 3 pp 90 f.

उद्दिश्यमानप्रतिनिर्दिश्यमानयोर् एकत्वम् आपादयन्ति सर्वनामानि पर्य्यायेण तल्लिङ्गम् उपाददते इति कामचारात् स शब्द इति पुंलिङ्गेन निर्देशः ।

(ननु यादृत्वस्य नपुंसकत्वेन तच्छब्देऽपि नपुंसकलिङ्गम् एव उचितम् अत आह—उद्दिश्यमानेति । सिद्धवत् कीर्त्तनम् उद्देशः । प्रतिपाद्यतया विधेयतया वा कीर्त्तनं प्रतिनिर्देशः । यथा "शैत्य हि यत् सा प्रकृतिर्जलस्य इत्यादौ स्त्रीलिङ्गनिर्देशः । तल्लिङ्गम् तयोर्लिङ्गम् इत्यर्थः ।—उद्योत. ।

Pronouns referring to the subject and the predicate at the same time take by turns the gender of each of them Hence such expressions as "कर्म्मणा यमभिप्रैति स सम्प्रदानम्" (पा. १।४।३२) &c beside शेत्रयौ यत कर्म्म शौ चैव स कर्त्तानाव्याने ।

[As in Greek and Latin, a demonstrative pronoun agrees with a predicate noun in gender and number Macdonell]

(5) अनुभाव has evidently been formed by the addition of घञ् to the root भू preceded by the उपसर्ग 'अनु' But this derivation would be wrong acc to Panini He lays down that the roots श्रि, नी and भू admit घञ् only when they are not preceded by any उपसर्ग So we get भाव, श्राय and नाय but not अनुभाव, प्रभाव etc. How are we then to justify such forms as अनुभाव, प्रभाव &c ? The answer is that they are to be regarded as प्रादि compounds. भू+घञ्=भाव । अनुगतो भावः अनुभावः । प्रकृष्टो भावः प्रभाव । So says the Kasika The rule, however, is honoured more in the breach than in the observance.

[When the first member of a तत्पुरुष compound is an उपसर्ग, the compound is known as प्रादिसमास]

(6) I am not going to indulge in idle ranting (most) unpleasant to your ears, but I report to you knowing full well what the fault of an adviser is and how to avoid it.

Extracts from other commentaries

निसर्गदुर्बोधम्—प्रत्यक्ष-दृश्योऽपि वस्त्वादयो गूहन-वेष्टनादिना क्वचित् हेतुना दुर्बोधो भवति। भूपतीनां तु चरितं गूहनादिना विना अपि स्वत एव दुर्बोधम्। पुरोहितामात्य-सेनापति-दूत-चार-पौर-जानपदादीन् आश्रय-विषय-देश-काल-वस्थादिभिन्नैरुपायैः अविजिगीषतां भूपतीनाम्, तथाविधैरेव उपायैः भूपतीन् अभिराधयतां पुरोहितादीनां च चरितम् अविषय एव मानुषमनीषायाः। अबोधेन विज्ञवा मानसादिप्रवृत्तिषु जडा प्राग्जन्म पुण्यकृत-सत्त्वोन्मेष शून्या. | **जन्मव** जन्म-मात्रसत्कारा. बुद्ध्यादिपाटव-निमित्तसत्त्वोन्मेष कारिणैहिकेन पुण्येन च शून्या इत्यर्थः। तस्मात्तस्मादृशे वनेचरादिभि अतिसङ्कुचितमनोवृत्तिभिः चतुरुदधि-परिधिभूमण्डलावस्थित वर्णाश्रमादिभिन्न-मनुष्यजात्यधिष्ठायिनां भूपतीनां चरितम् अवश्यानुष्ठेयन्याय्यकर्मातिविस्तृत कुतो ज्ञायेत इत्यभिप्राय.।

विदिताम् इति विशेषण नय-वर्त्म तत्त्वस्य गूढतरत्वे हेतु। **त्वनुदभावः** भूपति-चरितमपि मया ज्ञातु न शक्यते यतस्ततस्तादृशा द्विषा तादृश नय-वर्त्म ईदृशेन मया विदितं यत्, तत्र भवदनुभाव एव एक कारणम्, वर्षे पर्जन्या इव—इति तात्पर्य्यार्थ.। **अनुभावः**—दुर्घटन घटना-पटीयसी शक्तिः। तदनुभावस्य आदित्यप्रकाशादेरिव अपरोक्षतया विस्पष्टता द्योतयितुम् अयम् इत्युक्त न स * इति। यन्मम रिपुचरितविषय वेदन तत् अपरोक्षतया विस्पष्ट नवसत्कारतया अप्रमुषित च इति द्योतयितुम् अपरोक्षाद्यतन-भूतकालविषय लुङ् प्रयुक्त—**अवेदि**—इति।—CHITRABHANU.

University Questions. अवेदि—P अनुभाव—D. Gr N नयवर्त्म—Technical meaning अयम्—Acc. for gender. निसर्ग—why not ष? [Ans सृज् is not a षोपदेश धातु,hence 'आदेश प्रत्यययोः' does not apply]. Conjugate विद् in लुङ् and लिट् active

* इदमस्तु सन्निकृष्ट समीपतर वर्त्ति चैतदो रूपम्।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्॥

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्म-जितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७ ॥

N. P. **English Equivalents :** विशङ्कमानः—apprehending पराभव—defeat. दुरोदर—dice छद्म—fraud समीहते—tries, strives, endeavours

Analysis· Principal sentence : सुयोधन जगतीं जेतुं समीहते—Suyodhana is trying to win the world How ? नयेन—by means of policy. Adj. to जगतीं—दुरोदरच्छद्मजितां—which was won by fraud at the game of dice. Adj to सुयोधन —(i) भवतः पराभवं विशङ्कमानः—apprehending defeat from you , (ii) नृपासनस्थोऽपि—though seated on the royal-throne. Adj. to भवत — वनाधिवासिनः—living in the forest

Prose-Order नृपासनस्थोऽपि वनाधिवासिनः भवतः पराभवं विशङ्कमानः सुयोधनः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते ।

Bengali দুর্য্যোধন রাজসিংহাসনাধিরূঢ়, আপনি বনবাসী তথাপি আপনার নিকট পরাজয় আশঙ্কা করিয়া যে পৃথিবী কপট দ্যূতচ্ছলে জয় করিয়াছেন উহা নীতিপ্রয়োগদ্বারা জয় করিতে চেষ্টা করিতেছেন।

English· Suyodhana strives hard to win over by skilful diplomacy the world (which he has already) acquired by fraud in the game of dice, (because he is,) though seated on the throne, dreading defeat from you exiled in the forest

Elucidation· Duryodhana had no doubt succeeded in wresting by fraud the kingdom from Yudhishthira, the embodiment of moral excellence. But by this very act he

had alienated the sympathy of his subjects who had never been enamoured of him. So Duryodhana was in perpetual dread of Yudhishthira's coming back and inflicting condign punishment on the usurper. His own subjects, he doubted not, would flock to Y's banner in their thousands and tens of thousands as soon as Y declared his intention of coming back. So he tried his best to win the sympathy of his subjects, to make his throne secure by the judicious application of policy

Word-Notes.

वि-शङ्क-मान —वि+शङ्क् (शकि)+शानच्। शङ्कते, शशङ्के, अशङ्किष्ट।

भवत.—(i) "ध्रुवम् अपाये अपादानम्" इति अपादाने पञ्चमी। (अपायस्तु अत न वास्तव, पर बुद्धि-कृत)। Cf विशङ्कसे भीरु यतोऽवधीरणाम् (Sak III) [The rule भीत्रार्थानां भयहेतु: does not apply here for the very simple reason that वि+शङ्क is not a भयार्थक root at all. M explains विशङ्कमान as तर्कयमाण, Chitrabhanu as सम्भावयमानः. Moreover all भयार्थक roots are intransitive but विशङ्कमान is transitive here When, however, शङ्क with or without उपसर्ग is a भयार्थक root it governs पञ्चमी, acc to भीत्रार्थानाम्; as, तृणबिन्दो परिशङ्कित पुरा (रघु VIII 79), अशङ्किष्ट विवस्वत: (भट्टि XV. 39)]।

Or, (ii) "कर्तृकर्मणो: कृति" इति कर्तरि षष्ठी।

पराभव—परा+भू+अप् (भावे)। ऋदोरप् (पा. ३।३।५७)—the suffix अप् is added to a root ending in ऋ or उ (ऊ).

नृपासनस्थ —नृपस्य आसनम् (६तत्) तस्मिन् तिष्ठति इति (उपपदतत्)। नृपासन+स्था+क (कर्तरि)। "सुपि स्थ:" इति क-प्रत्यय:।

वनाधिवासिन:—वनम् अधिवसति य: स: (उपपदतत्) वनाधिवासी तस्मात्। वन+अधि+वस्+णिनि (कर्तरि)। लिट् उवास, लुङ् अवात्सीत् अवात्ताम् &c.

N.B. वस् by itself is intransitive; but it is transitive when preceded by the उपसर्ग उप, अनु, अधि and आ. So वनं अधिवसति

would be wrong. उप+वस् is intransitive, however, in the sense of 'observing a fast.' "उपान्वध्याङ्वसः" १।४।४८ अभुक्त्यर्थस्य न)।

दुरोदर कृदर्पजिताद्—दुर (दुष्टम्) उदर यस्य तत दुरोदरम् (निपातनात् सिद्धम्)। The form expected is दुरुदरम् but by निपातन we get दुरोदरम्. The process is known in Philology as Dissimilation. Other examples are नेपुर (in Bengali) for नूपुर, पुरिस in Prakrit for Sans. पुरुष &c. Or better, दुर दुष्टम् आ समन्तात् उदरम् अस्य इति—Kshirasvamin and Bhanuji (So also M under Raghu IX 7. न मृगयाभिरतिर्न दुरोदरम्)। तत् एव कृत्म or तस्य कृत्म तेन जितम्, adj to जगतीम्.

समीहते—सम्+ईह्+लट् 3/1 nom सुयोधन। लिट् ईहाञ्चक्रे &c. लुङ् ऐहिष्ट।

नयेन—करणे तृतीया। नी+अच् (भावे)। 'एरच' इति अच्।

Though the special rule निवृत्तौ भुवोऽनुपसर्गे applies here and the form expected is नाय still by the dictum क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते, we apply the general rule एरच् and get the नय

जेतुम्—जि+तुम्। The root जि to conquer is Atm. when preceded by वि or परा. (वि-पराभ्यां जे.)। अजैषीत्, व्यजेष्ट, जिगाय, विजिग्ये। जापयति, जिगीषति, जेजीयते।

जगती—गम्+क्विप्—जगत्। शतृ-वद्भावात् स्त्रियां ङीप्। Or, गा (to go जिगाति)+शतृ+ङीप्—Macdonell

सुयोधन.—सु+युध्+(कर्मणि) युच्। With all his wickedness, D was an excellent fighter So it would hardly be correct to derive it with युच् in the कर्मवाच्य It seems preferable to explain it thus—सु सुष्ठु योधनं यस्य स. (बहु). Bharavi never uses the word दुर्योधन but allways calls him सुयोधन.

घण्टापथः—सम्प्रति यद् वक्तव्य तदाह—"विशङ्कमान" इति। (1) सुखेन युध्यते 'सुयोधनः' "भाषायां शासि-युधि-दृशि-धृषि-मृषिभ्यो युज् वाच्य."। 'वनान्तवासः' अपि वनम् अधिवसति इति 'वनाधिवासिन.' वनस्थात् राज्यभ्रष्टादपि इत्यर्थ.। 'भवत' त्वत्तः 'पराभव' पराजय 'विशङ्कमानः' उत्प्रेक्षमाणः सन् (2) दुष्टम् उदरम्

चस्य इति दुरोदरम् द्यूतम् पृषोदरादित्वात् साधु। "दुरोदरो द्यूतकारे पणे, द्यूते दुरोदरम्" इत्यमरः। तस्मै छद्मना मिषेण जिता लब्धा [दुरोदर-छद्म-जिता] दुर्नयार्जिता 'जगती' मही (3) "जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयो." इति वैजयन्ती। 'नयेन' नीत्या जेत्या' वशीकर्तुं 'समीहते' व्याप्रियते —न तूदास्ते इत्यर्थः। (4) बलवता स्वामिकम् अविग्रहागम च धन भुञ्जानस्य कुतो मनस समाधि. इति भाव' भाव.।

N P (5) अत्र 'दुरोदर-छद्म-जिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासात् द्वितीय-काव्यलिङ्गम् अलङ्कार। तदुक्तम्—हेतोर्वाक्य-पदार्थत्वे काव्यलिङ्गम् उदाहृतम् (Pratapa-rudra, p 448)।

Ghantapatha Explained

(1) सुखेन युध्यते One who is fought with ease. सु + युध + युच् (कर्मणि) by the Varttika—भाषायां शासि-युधि-दृशि-धृषि-मृषिभ्यो युच् वाच्य (under पा ३।३।१३० सि. ३३००)।

[ईषद्दुः सु &c prescribes that roots preceded by ईषत्, दुर् and सु admit खल् in कर्म and भाववाच्यs This rule says ·] In classical Sanskrit युच् is added to the root शास् (to govern), युध् (to fight), दृश् (to see), धृष् (to dare) and मृष् (to forget, to forgive when they are preceded by ईषत्, दुर and सु. This supersedes the rule ईषद्दु . &c. So दुःशासनः, दुर्योधनः, सुदर्शनः, दुर्धर्षणः, अमर्षणः &c According to Kalapa, Mugdhabodha &c this rule is optional. Hence such expressions as दुर्दर्श, दुर्धर्ष &c

(2) दुरोदरम् is a बहुव्रीहि compound composed of दुर् and उदरम्, consequently the form expected is दुरुदरम् and not दुरोदरम्. M justifies the formation by including it under the group पृषोदरादि. पृषन्ति (बिन्दव.) उदरे यस्य स.=पृषोदरः (मेघ) instead of पृषदुदरः Similarly, बलाहकः (for वारिवाहकः), सिंहः (for हिंसः), [by Metathesis, just as the Bengali बरफ् comes from the Persian *bafra*] हंसः for हसः, गूढोत्मा for

गूढात्मा . The rule is— 'पृषोदरादीनि यथोपदिष्टम्' (पा. ६।३।१०९)। पृषोदरप्रकाराणि शिष्टैर्यथा उच्चारितानि तथैव साधूनि स्युः। "

The different possible anomalous cases are enumerated in the following Karika :

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
' धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं' निरुक्तम्॥

The examples of the first four cases are given in the following Karika—

(i) भवेद् वर्णागमाद्धंसः (ii) सिंहो वर्णविपर्ययात्।
(iii) गूढोऽत्मा वर्णविकृतेः (iv) वर्णनाशात् पृषोदरम्॥

(3) जगती means (i) a world, (ii) the earth, (iii) the site of a house, (iv) a kind of metre (containing 12 sylls. in each quarter)

(4) How can he possess peace of mind when he is enjoying a kingdom which belongs by right to a powerful man and which has been gained by unfair means ?

(5) Here the Figure of speech is the second variety of काव्यलिङ्ग, since by means of the adj दुरोदरच्छद्मजिताम् the meaning of a word is put forward as the reason of the meaning of the fourth line [viz (समीहते) नयेन जेतुं जगतीं सुयोधनः]. For it is said, "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गम् उदाहृतम्"— यत्र हेतुः (1) वाक्यगतत्वेन (2) पदगतत्वेन वा प्रतिपाद्यते तत् काव्यलिङ्गम्— when a reason is implied (1) in a sentence or (2) in a word, the figure of speech is *Kavyalinga.*

Examples :

(1) तत् साधुकृतसन्धानं प्रतिसंहर सायकम्।
आर्तत्राणाय वः शस्त्रं न प्रहर्तुम् अनागसि॥ Sak. I. 10.

---

* अत्र धातोरर्थः प्रसिद्धः तस्माद्वर्णान्तरेण योगः तदर्थातिशयेन योगः इत्येतत् पञ्चविधं निरुक्तं' निर्वचनप्रकारः शब्दानाम्—पदमञ्जरी।

Here the sense of the sentence आर्त्तत्राणाय वः शस्त्रं न प्रहर्तुम् &c. is represented as the cause of the withdrawal of the weapon.

(2) प्रस्निग्धाः क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः। Sak. I. 13.

Here the reason of their being इङ्गुदीफलभिद is implied in the word प्रस्निग्धाः.

N B "It should be carefully remembered that to constitute the figure काव्यलिङ्ग the हेतु must be *implied* and not expressed by the Instrumental or Ablative case Therefore the verse प्रजानां विनयाधानाद् रक्षणाद् भरणादपि। स पिता पितरस्तासां केवलं जन्महेतवः (रघु 1 24) is not an example of काव्यलिङ्ग as the हेतु is mentioned directly by the Ablative case. Cf तेन "भयानकत्वात् परिवर्ज्जनीयो दयाश्रयत्वाद् भव देव सेव्यः." इत्यादौ नायमलङ्कारः। गम्यमानहेतुत्वकस्यैव हेतोः सुन्दरत्वेन आलङ्कारिकैः काव्यलिङ्गताभ्युपगमात्।—R G. 466"—Kane.

Extracts from other Commentaries.

Context —स तु निसृष्टार्थः प्रणिधिः आत्मनऽवञ्चकत्वं शिथिलं कृत्यावधानं क्रियाफलसिद्धिं विनयं च निवेद्य अभ्यर्थ्येण जिगीषुणा राज्ञा जिज्ञासितं रिपुवृत्तान्तं क्रमेण वर्णयति—विशङ्कमान इत्यादिना पद्यसन्दर्भेण।

ननु पूर्व्वमेव तेन जिता [जगती], तत् किं जितां जेतुं चेष्टा पिष्टपेषणकल्पा इति? तत्राह—*दरोदरच्छद्मजिताम् इति। युद्धच्छलं बलधर्म्मयोर्न्यूनताभावज्ञापकं द्यूतच्छलं तु बलाभावस्य लिङ्गम् इति तत्कृतो जयः निन्द्यतरः इति द्योतयितुं दरोदरेति विशेषणं कृतम्।

ननु जनापवादनिदानं दुष्कुलदुर्बलोचितं द्यूतच्छलं न जयसाधनम् इति मन्यमानः तमात्मनः परिवादं प्रमार्ष्टुं पुनर्धर्मेण बलेन वा जगतीं जेतुं समीहते इति? नेत्याह—नयेन इति। सुयोधनपदेन बलाभावो द्योत्यते, दरोदरच्छद्मपदेन धर्म्माभावः।

---

* Chitrabanu reads दरोदर which is another form of दुरोदर,

विशङ्कमानः विविध सम्भावयमानः इत्यर्थः। आत्मानिनम् आत्मीयम् इति अर्थात् सिध्यति। युधिष्ठिरः किं नीतिबलेन अपतर्षम् अप्रतिक्रियं न. पराभव विदध्यात् धर्मात्मजः किम् अपध्यानेन (cursing mentally) अस्मान् धक्ष्यति, स महेष्वासो भीमार्जुनाग्रजः किं पराक्रमेण नः समुन्मूलयेत्, कि वा तस्य अजातशत्रो प्रियचिकीर्षया शक्रादयोऽस्मान् उपहन्युः, इत्यादयो विकल्पभेदा विशब्देन द्योत्यन्ते। विशङ्कमान इति लटा विशङ्कायाः सातत्यं व्यज्यते।

नृपासनस्थ इत्यनेन तस्य परिभाव्यत्वासम्भावना द्योत्यते। वनाधिवासिनः इति युधिष्ठिरस्य परिभवनक्षमसम्भावना द्योत्यते। अपिशब्दः कुवराजकर्मकस्य तापसकर्तृकस्य परिभवस्य विरोधं द्योतयति। CHITRABHANU

दुर्योधने दु शब्दोच्चारणं युधिष्ठिरस्य दुःखावहम् इति तद्गुणैर्जीविन सुशब्द प्रक्षिपन्ति।—Saravali.

Substance "आधिराज्यस्थितोऽपि सुयोधनो भवत्कर्तृक परिभव विशङ्कमानः स्वीकृतं भूमण्डल न जितं मन्यते, पुनस्तद्विजयाय सततम् अवहितश्चेष्टते। तस्मात् स्वसाम्राज्यप्रत्यापत्तये भवता प्रयत्नो विधेय इति तात्पर्यार्थः।"

Questions. दुरोदरच्छद्मजिता M and S भवतः, महीन P जगतीं —D दुरोदर—Gr. N Conj जि and इह लट् 3/1. वनाधिवासिन —S. अपि—Force

> तथापि * जिह्मः स भवज्जिगीषया
> तनोति शुभ्रं गुणसम्पदा यशः।
> समुन्नयन् भूतिम् अनार्यसङ्गमाद्
> वरं विरोधोऽपि समं महात्मभिः॥ ८॥

---

* Chitra bhanu reads तथा विजिह्मः and explains 'तथा' तेन प्रकारेण गढविषाग्निदानादिना। 'विजिह्म,' 'विशेषेण जिह्मः कुटिलः विगतकुटिलभावो वा। He notices our reading also : तथापि जिह्मः इति पाठे तथा जिह्मोऽपि

English Equivalents. जिह्मः—crooked. भूतिम्—Prosperity.

Analysis. (i) तथापि स शुभ्रं यशः तनोति—Yet he spreads pure fame. How? गुणसम्पदा—by means of the excellence of his qualities. Why? भवज्जिगीषया—to gain victory over you i e to excel or eclipse you Adj to स—जिह्मः crooked. (ii) अनार्य्य-सङ्गमाद् महात्मभिः समं विरोधोऽपि वरम्—Better hostility with the high-souled than the company of the wicked or unrighteous Why? भूतिं समुन्नयन् (adj to विरोध)—Because such hostility is conducive to prosperity.

Prose-Order तथापि (साशङ्कोऽपि) जिह्मः (वञ्चकः) स (दुर्य्योधन) भवज्जिगीषया गुणसम्पदा शुभ्रं (निर्म्मल) यशः तनोति (विस्तारयति)। भूतिम् (उत्कर्षम्) समुन्नयन् (आपादयन्) महात्मभिः समं (सह) विरोधोऽपि अनार्य्यसङ्गमाद् (दुर्ज्जनसंसर्गात्) वरम् (ईषत्प्रियम्)।

Bengali এইরূপ ভীত হইলেও সেই কুটিল (দুর্য্যোধন) আপনাকে জয় করিতে ইচ্ছুক হইয়া স্বীয় গুণরাজিদ্বারা বিশুদ্ধ যশঃ বিস্তারিত করিতেছেন। কারণ নীচ ব্যক্তিগণের সহিত মিত্রতা অপেক্ষা মহাপুরুষগণের সহিত বিরোধও ভাল, কেননা এই বিরোধের ফলে নিজেরই উন্নতি হইয়া থাকে।

English. But still he, crooked as he is, spreads far and wide his spotless fame through his numerous virtues (which he has acquired) through his desire of outrivalling you. Better than friendship with the low is enmity with the great inducing as it does) greatness in ourselves

इति अन्वय . M's explanation of तथापि as साशङ्कोऽपि is inconsistent with his introductory remarks : नयेन जेतुं जगतीं सुयोधनः इति उक्त तत्प्रकारम् आह। One cannot but feel that "तथाहि" is the right reading here

Elucidation. Duryodhana has turned over a new leaf. He wants to strike you with your own weapon. You are regarded as the embodiment of all that is good and noble and virtuous. He is showing himself as possessed of all these qualities in a far greater degree. He wants to eclipse your spotless fame and thus conquer you. So enmity with you instead of doing him any harm has done him a lot of good by impelling him to do justly and walk humbly. Thus preferable as it always is to be friends with the magnanimous, it is better to be at enmity with them than to be friends with the low and vulgar. (The society of the low cannot but draw one down to their own level, whereas even hostility with noble souls prompts us to have scrupulous regard for truth, honour and justice, develops all our latent talents and thereby confers prosperity on us.)

Duryodhana, past master in the art of dissimulation, is now trying to win over the subjects to his side by simulating all the virtues of Yudhishthira. Once securely established on the affections of the people he would have nothing to fear.

Cf. वर पण्डितशत्रुश्च न मूर्खो हितकारकः ।
वानरेण हतो राजा विप्राश्चौरेण रक्षिता ॥ Hi.

Word-Notes.

विज्ञः—ज्ञा + क (कर्तरि)। जानाति सरलमार्गम् इति। Adj. to सः.

भवज्जिगीषया—भवतः जिगीषा (६ तत्), जि + सन् + अ + स्त्रियां टाप् तया। इति तृतीया। जिगाय, जिगिग्ये। अजैषीत्, अजेष्ट। णिच् जापयति।

तनोति—तन् + लट् 3/1. nom—सः. obj.—यशः लुङ् अतनीत्, अतानीत्, अतत, अतनिष्ट।

शुभ्र—शुभ्+रक् औणादिकः Poets always represent fame as white "मालिन्य व्योम्नि पापे, यशसि धवलता वर्ण्यते हासकीर्त्योः।" S. D. Cf येषा यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् Ki. XI. 64

गुणसम्पदा—गुणानां सम्पत् (६तत्) तया। करणे तृतीया। सम्+पद+क्विप् (भावे)=सम्पत।

यश—अश्+असुन् (औणादिक) अश्नुते व्याप्नोति इति। obj to तनोति-

समुन्नयन्—सम्+उत+नी+शतृ—"लक्षण-हेत्वोः क्रियायाः." (पा: ३।२।१२६ सि. ३१०१) इति हेतौ शतृ 1/1 Pres Part adj. to विरोध। [The present participle is used to denote an (1) attendant circumstance or attribute and (2) the cause of an action; is (1) शयाना भुङ्क्ते यवना, (2) हरिं पश्यन् मुच्यते by (reason of) seeing Hari Similary here also hostility with the magnanimous is slightly better than association with the vulgar, because it brings on prosperity.

भूतिम्—भू+क्तिन् (भावे) 2/1 भूति means (1) ashes (2) prosperity स्फुटापम भूतिसितेन शम्भुना—शिशुपाल १।४। "भूतिर्भस्मनि सम्पदि।"

अनार्य सङ्गमात्—'पञ्चमी विभक्ते' इति पञ्चमी। अनार्याणां सङ्गम (६ तत)। ऋ+ण्यत् (कर्मणि)=आर्य। न आर्य अनार्य। सम्+गम्+(भावे) अप्=सङ्गम.।

वरम्—is always neuter in the sense of मनाक्-प्रिय Some lexicographers have gone farther and held it to be an indecl in that sense Hence the predicate is neuter though the subject विरोध. is masculine.

विरोध—वि+रुध्+घञ् (भावे) lit. to obstruct seriously, hence quarrel

महात्मभि:—महान् आत्मा येषा ते (बहु) तै.। सहार्थक-सम-शब्द-योगे तृतीया।

देवराजीयम् । विपक्षस्य नीतिप्रधानतां श्रुत्वाऽनुयोगमाशङ्क्याऽऽह—तथेत्यादि । यद्यप्यसौ प्रयोजनार्थं तथा नयमाश्रयते तथाऽपि तत्त्वतो जिह्म पापिष्ठ एव, खलो हि प्रकृतिरन्यथा भवति । इदानीन्तु भवज्जिगीषया भूतिं समुन्नयन् श्रियं वर्द्धयितुकाम गुणसम्पदा निर्मलं यशस्तनोति दाक्षिण्यादिगुणशालिनिति जगति यशः प्रथयितुं तेन गुणानुरागिता समाश्रिता । अन्ये त्वाहुः—किञ्च भवत्स्पर्द्धयाऽयं सुजनः सञ्जात इत्याह—तथाऽपीत्यादि । तेन प्रकारेण यथाजनानुरञ्जनादिना जिह्म कुटिलवर्तिरपि भवज्जिगीषयेदानीं शुभं यशस्तनोति । किं कुर्वन् ? गुणानां सख्यादीनां सम्पदा समग्रतया भूतिं समुन्नयन्निति प्रकृत्या पापिष्ठोऽप्ययं समाचरतीत्यहो विस्मयमनोऽर्थान्तरं प्रयुङ्क्ते—अनार्यसङ्गमाद् जनसमर्गान्महात्मभिः सह विरोधोऽपि वरं ज्यायान् । उत्कर्षहेतुत्वात् । अनार्यसंसर्गमहात्मविरोधयोर्विरोधो निर्वार्यते । तेन पञ्चमी विभक्तिः । सामान्यविशेषयोर्भिन्नलिङ्गयोरपि सामानाधिकरण्यं दृश्यते । यथा "विगुरेकवचनम्" । [२।४।१] "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" [मेघदूत १।६] भवज्जिगीषयेति हेतौ तृतीया । गुणसम्पदेति करणे ॥ ८ ॥

माधवीयम् । तथा यथा लोको जानाति तथा । जिह्मः कुटिलः वक्रभन्योऽपि [वक्रप्रकृतिरपि ?] स राजा भवज्जिगीषया भवन्तं जेतुमिच्छया निश्रिता या गुणसम्पत् गुणानामुत्कर्षः तया गुणसम्पदा यशः शुभं तनोति स्वयशो धवलं प्रकाशं करोति । कीदृशः सः ? भूतिं समुन्नयन् ऐश्वर्यं वर्द्धयन् । भूतेर्जनानुरागजन्यत्वात् । "जनानुराग प्रभवा हि सम्पदः" इति । जिह्मस्यापि तस्य त्वज्जिगीषया जगद्रञ्जनादिकमाचरतो महती कीर्तिरभूदित्यर्थः । यतस्त्वद्विरोधात् स गुणवानभूत् तस्मात् इदमव निश्चितमित्याह—महात्मभिः सम महापुरुषैः सह विरोधोऽपि अनार्यसङ्गमात् वरम् सज्जनविरोधोऽपि दुर्जनसङ्गमादुत्तम इत्यर्थः । वरमिति विशिष्टार्थवाचकमव्ययम् । "वरमिष्टविशिष्टयोः" इति । भूतिं समुन्नयन्निति विरोधपदस्य विशेषणमिति केचिदाहुः । तन्न युक्तम् ।

"अनुचितकर्मारम्भः स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥"

इति । "महद्विरोधिता पुंसां श्रियमायुश्च कृन्तति" इत्यादिवचनविरोधात् । अतो

मह्वद्विरोध. ख्यातेरेव कारणम्। रावणादयो हि रामादिविरोधेन नष्टा अपि चिरस्थायिनीं ख्यातिं प्राप्ताः। "कार्यं स्नेहो विरोधो वा महद्भिः सह कीर्तये" इति ॥ ८ ॥

घण्टापथः—(1) 'नयेन जेतुं जगती सुयोधनः' [१।७] इत्युक्तम्। तत्-प्रकारम् आह— 'तथापि" इति। 'तथापि' साम्रज्योऽपि 'जिह्म.' वक्रः, वञ्चक इति यावत्। 'स.' दुर्योधनः 'भवज्जिगीषया' गुणैः भवन्तम् आक्रमितुम् इच्छया इत्यर्थ। "हेतौ" [पा. २।३।२३] इति तृतीया। 'गुणसम्पदा' दान-दाक्षिण्यादि-गुणगरिम्णा करणेन। 'शुभ्र' 'यश.' 'तनोति'। (2) स खलो गुण-लोभनीया त्वत्सम्पदम् आत्मसात् कर्तुं त्वत्तोऽपि गुणवत्ताम् आत्मन प्रकटयति इत्यर्थं। ननु एव गुणिन. सतोऽपि सज्जनविरोधो महान् अस्ति अस्य दोष, इत्याशङ्का सोऽपि सत्ससर्गालाभे * नीचसङ्गमाद् वरम् उत्कर्षावहत्वात् इति आह—"सम्" इति। तथाहि 'भूति समुन्नयन्, उत्कर्षम् आपादयन्। (3) "लटः शतृ-शानचौ—" [पा. ३।२।१२४] इत्यादिना शतृ-प्रत्यय', पुनर्लङ् ग्रहणसामर्थ्यात् प्रथमासामाना-धिकरण्यम्। 'महात्मभि.' 'समम्' सह इत्यर्थ.। "साक सत्रा सम सह" इत्यमर'। 'अनार्य-सङ्गमात्' दुर्जन-ससर्गात् 'पञ्चमी विभक्ते' [पा २।३।४२ सि ६३९] इति पञ्चमी। विरोधोऽपि 'वर'' मनाक्-प्रिय'। (5) "देवाद् वृते वरः, श्रेष्ठे त्रिषु, क्लीवे मनाक्-प्रिये" इत्यमर। अत्र मैत्र्यपेक्षया मनाक्-प्रियत्व विरोधस्य।

(6) 'भूति समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये, समाप्तस्य वाक्यार्थस्य पुनरादानात् समाप्त-पुनरात्ताख्यानदोषापत्तिः। तदुक्त काव्यप्रकाशे [? प्रतापरुद्रीये] †— 'समाप्त-पुनरादानात् समाप्तपुनरात्तकम्" इति। न च वाक्यान्तरम् एतत्, येन उक्तदोष-

---

* The other different readings are सज्जनससर्गालाभे (B.) विनीतससर्गलाभ (A, C) तत्ससर्गलाभ and सत्ससर्गलाभे

† M is evidently quoting from memory a line of the Prataprudra and not of Kavyaprakasa The Prataparudra reads समाप्य पुनरादाने समाप्तपुनरात्तकम् (Trivedi's edition p. 311).

परिहारः स्यात् ॥ (7) अर्थान्तरन्यासोऽलङ्कारः । स च भूतिसमुन्नयनस्य पदार्थस्य* विशेषणद्वारा विरोधवरत्वं † प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ।

Ghantapatha Explained·

(1) *It has (already) been said that Duryodhana* is trying to conquer the world by means of policy. (Now the poet) speaks of the way (in which he did so)

(2) With a view to appropriate your greatness tempting on account of the noble qualities of head and heart, the envious Duryodhana is showing off his merits as far greater than yours Well, meritorious as he thus [undoubtedly] is, he labours under a great disadvantage viz, hostility with the good—anticipating this objection, the poet says even that is better than the company of the vulgar when the society of the good is not available since it (raises one up i e) makes one nobler or better

(3) लटः शतृ-शानचावप्रथमासमानाधिकरणे (पा ३।२।१२४ सि ३१००)।

लटः शतृ शानचौ इत्येतौ आदेशौ भवतः, अप्रथमान्तेन चेत् तस्य सामानाधिकरण्यं भवति । लट् इति वर्तमाने पुनर्लड्ग्रहणम् अधिकविधानार्थम् । क्वचित् प्रथमासमानाधिकरणेऽपि भवति । The suffixes शतृ aud शानच् are substituted for लट् [in the case of परस्मैपदी and आत्मनेपदी roots respectively] if the root is not in apposition with a प्रथमान्त word ; पचन्तं चैत्रं पश्य, पचमानेन चैत्रेण कृतम् &c but देवदत्तः पचति and not पचन् देवदत्तः. The use of the word लट्, however, in this sutra though it was obtained by अनुवृत्ति from the previ-

---

* पदार्थविशेषणद्वारा—All except A.

† It is significant that both the Mss. consulted by us, the Asiatic Society Ms in Bengali script and the Sanskrit College Ms. in Deva-nagari script, read विरोधवत्वं with त्व instead of रत्व. Madanapala's printed edition reads विरोधपरत्व This leaves no doubt in one's mind that the correct reading is विरोध-परत्वम्. .

ous sutra (कर्मणि मष्) shows that this rule applies sometimes even when the word is in agreement with a प्रथमान्त word, hence मूर्तिं सहुद्भवन् विरोधः is quite correct.

(4) पञ्चमी विभक्ते (पा. २।३।४२ सि ६२८)।

निर्धार्यमाणस्य यत्र भेदः एव तत्र पञ्चमी स्यात् (न तु षष्ठी-सप्तम्यौ)। पञ्चमी is used when the thing separated is different from, i e, not included in that from which *its separation is intended* In other words, "words in the comparative degree or such as have the sense of comparison are used with the Ablative of that with reference to which the comparison is made" (APTE).

N B When the thing to be separated and that from which it is to be separated stand in the relation of genus and species, or species and individual to each other as, नराणां नापितो धूर्त, छात्रेषु मैत्र पटु &c. षष्ठी or सप्तमी is used; but when both these are genera or both are species or both individuals पञ्चमी is used, as वैश्येभ्य क्षत्रिया शूरा', चैत्रात् मैत्रः पटु' In other words when the thing to be separated is included in that from which it is separated, षष्ठी or सप्तमी is used, but when it not so included, we use पञ्चमी.

(5) (i) वर.—m noun वृ + कर्मणि अप्—that which is chosen from the gods, a boon; cf Eng *well*, lit. according to one's wish. "तपोभिरिष्यते यस्तु देवेभ्य स वरो मत" इति कात्य.।

(ii) Adj m. f. n like Eng choice or select, most excellent or fair, best

(iii) Conj n. slightly better, most excellent as distinguished from i. e., better than Some lexicographers hold it to be an indecl in this sense. वरं कूपशताद् वापी।

(6) If भूति वसुवयन् is construed with the previous sentence (i. e. as an adj. to स: in the first line), it will constitute the defect known as समाप्तपुनरात्तता because of the re-opening of the sentence which has been already completed *[This construction will also constitute the defect known as* अर्थान्तरैकपदता] For it has been said in the Kavya prakasha(?) when a statement is re opened after being already completed, it constitutes the defect समाप्तपुनरात्तता. समाप्तस्य वाक्यस्य विशेषणद्वारा पुनरुपादाने समाप्तपुनरात्तम्। The Kavyapradipa says : "समाप्तपुनरात्तम्। समाप्तं सत् पुनरुपात्तं वाक्ये समाप्ते पुनस्तदन्वयिशब्दोपादानं यत्र इत्यर्थः।' The Sahitya-Sara defines it thus :

समाप्तपुनरात्तं तत् पूर्णं यद् गृह्यतेऽन्वये।
चन्द्रार्धशेखरः शम्भुर्मां पातु गिरिजाधिपः।

(अत्र 'पातु' इत्यन्तं यथाश्रुतम् एव अन्वये परिसमाप्तेऽपि गिरिजेत्यादिपदकदम्बकं तदन्वयि एव पुनर्गृहीतम् इति लक्षणसमन्वयः]।

"In a period, the meaning is suspended until the close Sentences where this is not the case are termed loose.

'Every man, however humble his station or feeble his powers, exercises some influence on those who are about him for good or for evil', better, 'exercises for good or for evil'.

'Beauty gains little, and homeliness and deformity lose much by gaudy attire' would be much improved by the periodic form attained by beginning with the phrase 'by gaudy attire'.

In a period the sense being incomplete till the end, the listener is bound to hold in mind all the particulars throughout under pain of losing the thread of discourse". BAIN, English Composition and Rhetoric Part I.

See also Calcutta Oriental Journal Vol. I. No 3,

Of course, after having finished one sentence we can take up the same thing in a different sentence and add as many epithets as we like, but here it is the same sentence viz. तथापि स जिष्णु भवज्जिगीषया गुणसम्पदा युध यश तनोति । This expresses a complete idea. Should we now add an epithet to स and place it after the predicate that epithet will hang very loosely and the sentence will be defective, being a loose sentence instead of a periodic one. 'भवो भवतु भव्याय लीलाताण्डवपण्डित' is also an instance of समाप्तपुनरात्तता The defect may by remedied by reading लीलाताण्डवपण्डित before भव. Another example :

> मानयन्तो घनध्वान तापयन्तो वियोगिन' ।
> पतन्ति शशिन. पादा भासयन्त. क्षमातलम ॥

Acc. to Mammata, where the epithet or epithets added after the sense has been grammatically completed, constitutes a different sentence, समाप्तपुनरात्तता is not to be regarded as a defect. समाप्तपुनरात्त क्वचिन्न गुणो न दोष', यत्र न विशेषणदानार्थं पुनर्ग्रहणम्, अपि तु वाक्यान्तरम् एव क्रियते । The Sahitya-Sara holds समाप्तपुनरात्तता in such cases, adds grace to the composition :

> समाप्तपुनरात्त स्याद् गुणो वक्रान्तरोदये ।
> रामापि स्यादुपादेया महागुणवती सती ॥*

---

* रमयति यौवनमाहृत्य क्रीडापरवश करोति इति तथा तरुणीत्यर्थः । अपि वा तथा

> यस्य स्त्री तस्य भोगा. स्यु निःस्त्रीकस्य क्व भोगभू: ।
> स्त्रियं त्यक्त्वा जगत् त्यक्त जगत् त्यक्त्वा सुखी भवेत् ॥

इति अभियुक्तोक्ते' ससारनिदानत्व ध्वनितम् । उपादेया विधिवत् पाणौ ग्राह्या स्यात् इति सम्बन्ध । इह वाक्य तु समाप्तमेव, अत अभिमतार्थे समाप्तवाक्यार्थे एव अन्वितत्वेन अस्य तत्त्वेऽपि किमिति निरुक्तसंहतिहेतुरपि युवतिरुपादेया इति हेत्वाकाङ्क्षायां यतोऽसौ महागुणवत्त्वेन सती पतिव्रता अस्ति इति तत्-समाधायक-वाक्यान्तरम् उदेति तस्माद् गुण एव तत् इत्याकूतम् ।

(7) Here the figure of speech is, अर्थान्तरन्यास which is enlivened by the काव्यलिङ्ग constituted by भूतिमुन्नयन assigning a reason for विरोध वरत्व through being an attribute (of विरोध:).

Extracts from other Commentaries.

Context : ननु विनयस्तन्त्रावापरूपस्य नयस्य मूलम्। विनयो नाम त्रिवर्गशास्त्रविहितस्य आचरणं वश्येन्द्रियता च। आस्तिक्य-धैर्य-माधुर्यादिगुणगणस्य कारणम्। स तु कौरवभागिनेयस्य कुतः स्यात् इति शङ्काम् अनूद्य स तु धृतराष्ट्रसुतस्य स्वभावः प्रयत्नेन हेतुना परिवर्तितः इत्याह।

तस्य महाराजस्य यशःसम्पादनस्य पौरजानपदसम्बन्धो यशसो व्यापारः फलम् इति तनोति इति परस्मैपदेन द्योत्यते। गुणसम्पदा यशस्तनोति इत्यनेन तद्गुणानां प्रभूतत्वं प्रख्यातत्वं च द्योत्यते। तस्य यशः भवति प्रथते इति वा यशः कर्तृतया नोक्तं, किन्तु यशस्तनोति इति कर्मतया। तेन तस्य तदीप्सिततमम् इति द्योत्यते। तस्य सुयोधनस्य गुण-यशः-सम्पादने तदिच्छाया वा को हेतुः इत्याह—भवज्जिगीषया। भवच्छब्द प्रशस्ततम गुणार्थम् आह—भवज्जिगीषया। प्रशस्य गुणं त्वा जेतुम् इच्छा तस्य गुणसम्पादने हेतुः, न स्वभावः इत्यर्थः। सम्पदिच्छाहेतुका तस्य भवज्जिगीषा, न धर्मरुचिहेतुका इत्याह—भूतिं समुन्नयन्।* भूतिं हस्त्यश्वधनधान्यादिसम्पदम्। समुन्नयन् सन्ततम् ऊर्ध्वं नयन् उपचयं प्रापयन् इत्यर्थः। भूतिसमुन्नयनमेव दृश्यमानतया तस्य त्वज्जिगीषाहेतुर्न धर्मरुचिः इत्यर्थः।

ननु शकुन्यादिसंसर्गिणस्तस्य सुयोधनस्य युधिष्ठिरजिगीषामात्रेण कथं स्वभावपरिवर्तनम् इति चेत् तत्राह—अनार्यसङ्गमात् इत्यादि। अनार्यैः सङ्गमात् सख्यरूपात् सम्बन्धात् महात्मभिः सह विरोधरूपोऽपि सम्बन्धो वरम्। अविरोध स्वानुगुण-वासनाधानशक्त्याधिक्यम् अत्र वरत्वं विवक्षितम्, न प्रशस्ततरत्वम्। अन्यथा महात्मसम्बन्धो वरं न अनार्यसङ्गम इति वाच्यम्। * * * सज्जन.

Chitrabhanu evidently construes भूतिं समुन्नयन् with स.

प्रख्यातगुणगण' सकलविश्वास-बहुमानविषय' समुपनतसकलाभिमतस्पृहणीयशील' कदाचित् केनापि स्वसम्बन्धेन यत्र कुत्रापि स्वसंसर्गिणि सद्य एव स्वशीलमुन्मीलयति पुनरपि तद्बहुमानस्य अनपायात् अधाधिन तत्र तदुदचीयते एव इत्येतत् सर्वम् अनेन वाक्येन द्योत्यते ।

University Questions. Tr. into English. जिगीषा and यश—D गुणसम्पदा—P. Conj तन् in लुङ् 3/1. Acc. for शद in समुन्नयन् Acc for the diff of gender bet विरोध and वरम् Name the figures of speech. Discuss the question of the rhetorical fault raised by Mallinatha. (1912).

कृतारिषड्वर्गजयेन मानवीम्
अगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

Analysis. Princ. Sent. तेन नयेन पौरुष वितन्यते—He extends valour (lit. manliness) with policy or diplomacy Adjs to तेन (i) कृतारिषड्वर्गजयेन—who has conquered the group of six enemies (passions) (ii) अगम्यरूपा मानवी पदवी' प्रपित्सुना—who is desirous of attaining the path laid out by Manu which is of unattainable nature. (iii) अस्ततन्द्रिणा—shaking off all drowsiness i. e always on the alert. How ? नक्तन्दिव विभज्य—having allotted day and night to different duties

Prose-Order कृतारिषड्वर्गजयेन अगम्यरूपां (पुरुषसामान्दुष्प्रापां) मानवीं (मनूपदिष्टसदाचाररूपां) पदवीं (lit. पन्थानम् here प्रजापालन-पद्धतिं) प्रपित्सुना (प्राप्तुम् इच्छुना) अस्ततन्द्रिणा (अनलसेन) तेन (दुर्योधनेन) पौरुष (पुरुषकारः, उद्योगः) नक्तन्दिवम् (अहोरात्रयोः) विभज्य ('अस्यां वेलायाम् इदं कर्म' इति विभागं कृत्वा) नयेन (नीत्या) वितन्यते (विस्तार्यते) ।

Bengli. কামক্রোধাদি ষড়্ রিপু জয় করিয়া অনন্যসুলভ মনুপদিষ্ট পথে বিচরণ করিতে ইচ্ছুক হইয়া দিবারাত্র নিরলসভাবে এই সময়ে এই কার্য্য করা উচিত এইরূপ বিভাগ করিয়া দুর্য্যোধন নীতির সহিত পুরুষকারের প্রয়োগ করিতেছেন।

English. The (path of) heroic-virtue (coupled) with diplomacy is being followed by him (Duryodhana), who has conquered his six enemies (Kama and others), (and who) shaking off all lethargy and dividing (his) nights and days (for the discharge of his kingly duties), seeks to attain the unattainable ideal set up by Manu

Elucidation. Duryodhana had realised the truth of the saying the greatest conqueror is he who has conquered himself. * He therefore first of all established perfect control over his own passions. (Then he set about ruling his subjects not according to his whims and caprices but according to the rules laid down by Manu. Manu has set up a very high ideal and ordinary kings find it difficult—nay impossible—to act up to it But Duryodhana tried his best to attain the ideal and with this end in view he shook off all sloth and divided his days and nights into parts performing in each part the duties allocated to it) Ever watchful he resorted to valour but his valour was tempered with diplomacy, for diplomacy is the

---

* जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः ।
जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥ Ki. XI. 32.
अनित्याः शत्रवो बाह्या विप्रकृष्टाश्च ते यतः ।
अतः सोऽभ्यन्तरान् नित्यान् षट्पूर्वान् अजयद्रिपून् ॥ Raghu XVII 45.
आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।
अजितात्मा नरपतिर्विजयेत कथं रिपून् । [शान्ति ६९।४] ।

handmaid of valour and without the aid of the former the latter would be reduced to impotency

As Machiavelli says : There are two ways of contending, by law and by force, the first is proper to men, the second to beasts, but because many times the first is insufficient, recourse must be had to the second It belongs therefore to a prince to understand both, when to make use of the rational and when of the brutal way and this is recommended to princes, though abstrusely, by ancient writers, who tell them how Achilles and several other princes were committed to the education of Chiron the Centaur, who was to keep them under his discipline, choosing them a master, half man and half beast, for no other reason but to show how necessary it is for a prince to be acquainted with both, for that one without the other will be of little duration Seeing, therefore, it is of such importance to a prince to take upon him the nature and disposition of a beast, of all the whole flock he ought to imitate the lion and the fox, for the lion is in danger of toils and snares, and the fox of the wolf, so that he must be a fox to find out the snares, and a lion to fright away the wolves, but they who keep wholly to the lion have no true notion of themselves. *The Prince*, Chap XVIII

Cf वायविन्द्रिव विभागेषु यदादिष्ट महीक्षिताम् ।
तत् सिषेवे नियोगेन स विकल्प पराङ्मुखः । Raghu XVII 49,
कातर्य्यं केवला नीति शौर्य्यं श्वापद-चेष्टितम् ।
अत सिद्धि समेताभ्याम् उभाभ्याम् अन्वियेष स. ॥ Ibid. 47.

Word-Notes.

कृतारिषड्वर्गजयेन—षण्णां वर्गः (६ तत्) षड्वर्ग, अरीणां षड्वर्गः (६ तत्) अरि-षड्वर्गः, तस्य जयः (६ तत्) कृतः अरिषड्वर्गजयः येन सः (बहु), तेन

adj to तेन Bharavi has borrowed the exp अरिषड्वर्ग, from Kautilya

The compound is irregular and formed on the analogy of द्विषभागवत (see Ghantapatha explained) The grammatically regular form is षडरिवर्ग. षड्वर्ग or अरिषड्वर्ग refers to काम (lust), क्रोध (wrath), लोभ (covetousness), हर्ष (overjoy), मान (pride), and मद (haughtiness)

Cf. कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेन तस्मिंस्त्यक्ते सुखी नृप ॥ K N, I. 50

The Sukraniti reads मोह for हर्ष.

मानवीम्—मनोः इमाम् इति मनु + अण् (तस्येदम्)—मानव, then स्त्रियां ङीप् by टिड्ढाणञ् &c , adj to पदवीम्

अगम्यरूपाम्—न गम्यम् (गम् + कर्मणि यत्) अगम्यम्, अगम्य रूप यस्या ताम् (बहु), adj. to पदवीम् [Rule for यत्—पोरदुपधात् ३।१।९८ । A root ending in any letter of the पवर्ग with अ as its penult admits यत् instead of ण्यत् in the कर्म and भाव वाच्य's] , or, (ii) न गम्या अगम्या, अगम्या + रूपप् (प्रशंसायां रूपप् ५।३।६६) तसिलादिष्वाकृत्वसुच. (६।३।३५) इति पुंवद्भावः । Here the first exposition is preferable

पदवीम्—meaning पन्थानम् obj. to प्रविवत्सुना. 'न लोकाव्यय-निष्ठाखलर्थ-तृनाम्' । (पा. २।३।६९ सि. ६२७) इति षष्ठीप्रतिषेधात् द्वितीया ।

'न लोकाव्यय-निष्ठा-खलर्थ-तृनाम् ।'*

उ + उक = उक । ल + उक + अव्यय = लोकाव्यय । कर्तृकर्मणोः कृति इति

---

* The general rule is कर्तृकर्मणोः कृति i e in connexion with a कृत् प्रत्यय, the कर्ता or the कर्म takes षष्ठी, as, शिशु शेते but as soon as we add the कृत् प्रत्यय 'ल्युट्' to शी and change it to शयनम्, शिशु. is changed to शिशोः. Similarly, अन्नं भुङ्क्ते but अन्नस्य भोजनम्.

प्राप्ता षष्ठी प्रतिषिध्यते । ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन् इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति ।

The कर्ता or कर्म does not take षष्ठी in connection with (1) ल [i. e शतृ, शानच्, क्वसु, कानच्, स्यतृ, स्यमान, क्त and क्तवत् (which are the substitutes for ल i e लादेशा.)] a word ending in the suffixes (2) उ (पा. ३।२।१६८) or (3) उक (पा. ३।२।१५४) or (4) an अव्यय formed with a कृत् affix such as तुम्, क्त्वा &c. or (5) a past participle, (6) a word ending in an affix having the sense of खल् (पा ३।३।१२६ i e खल्, युच् &c) or (7) an agent noun ending in तृन् In such cases the कर्ता takes तृतीया and the कर्म द्वितीया

(1) पराभव विशङ्कमान 1 7., समुन्नयन् भूतिम् Ki. 1 9., अर्जयन् गतरी श्रिय Ki X I 21, अनुयास्यन् मुनितनयाम् Sak., सत्यम् ईयिवान् Ki I 11 महीभुजे मही निवेदयिष्यत Ki I 3 (2) पदवीं प्रपित्सुना, मुक्ति प्रपित्सो. Ki XI 16 (3) जयम् अभिलाषुक Ki XI 18 (4) अनुग्राम अधिगम्य 1. 3. जगती जेतु समीहते 1 7 (5) ग्राम गत· &c. (6) रामेण किं दुष्करम् ? (7) सम्भावयिता बुधान्, न्यग्भावयिता शत्रून् &c.

प्रपित्सुना—प्र + पद् + सन् + उ = प्रपित्सु then 3/1 adj to तेन

विभज्य—वि + भज् + ल्यप् । (i) transitive verb used intransitively—M or, (ii) transitive, obj. नक्तन्दिवम्

नक्तन्दिवम्—नक्तञ्च दिवा च (द्वन्द्व)। "अचतुर-विचतुर—" इत्यादिना अच् समासान्त । नक्तन्दिवा + अ = नक्तन्दिव + अ ("यस्येति च" इति आकार-लोप:) = नक्तन्दिवम् (neut.) because it is an अव्यय. नक्तम्—night, at night (cf *nocturnal*) दिवा—day, at day (cf *diurnal*). Both नक्तम् and दिवा are अव्यय's used in the sense of सप्तमी. The compounds नक्तन्दिवम्, अहर्दिवम् and रात्रिन्दिवम् are also formed in the sense of सप्तमी. Hence the comp. means by night and day [Those who regard it as an object to विभज्य maintain that we come across cases where नक्तम् and दिवा are used in senses other than those of सप्तमी , as, दोषामन्यम् अह:, दिवामन्या रात्रि. &c. Therefore नक्तम् and दिवा are used here in the

sense of the प्रातिपदिक So the comp means—night and day Hence नक्तन्दिवम् is a द्वितीयान्त word, obj to विभज्य.]

असक्तन्द्रिणा—असता तन्द्रिः यस्य [or येन] स' (बहु), तेन। adj to तेन.

वितन्यते—वि+तन्+कर्मणि लट्, ते। nom तेन, obj. पौरुषम्। Alt form वितायते। [Rule तनोतेर्यकि (पा• ६।४।४४). Similarly जन्—जायते, जन्यते. खन्—खायते, खन्यते, सन् (to give)—सायते, सन्यते।]

नयेन—सहार्थे तृतीया।

पौरुषम्—पुरुष+अण्। उक्ते कर्मणि प्रथमा, verb वितन्यते।

घण्टापथः—(1) 'ननु कातर्यं केवला नीतिः' [रघु॰ १७।४७] इत्याशङ्क्य नीतियुक्तं पौरुषम् अस्य इत्याह—"क्रत" इति। अथो वर्गे षड्वर्गे। अरीणाम् अन्तःप्रवृत्तां कामक्रोधादीनां षड्वर्गः अरि-षड्-वर्गः। (2) श्रिवभागवत-वत् समासः। तस्य जय' कृतो येन तेन तथोक्तेन [कृतारिषड्वर्गजयेन] विनीतेन इत्यर्थः (3) विनीताधिकारं * प्रजापालनम् इति भाव.। 'अगम्यरूपा' पुरुषमात्रदुष्प्राप्याम्। मनोक्तां 'मानवीम्'। (4) मनुपदिष्ट-सदाचार-युक्ताम् इत्यर्थः। पदवी प्रजापालन-पद्धति' 'प्रपित्सुना' प्रपत्तुम् इच्छुना, प्रपद्यते' सन्नन्तात् उ-प्रत्यय। (5) "सनि मीमा—" [पाः ७।४।५४] इत्यादिना इसादेशः। (6) "अत्र लोपोऽभ्यासस्य" [पाः ७।४।५८] इत्यभ्यासलोपः। (7) तदिः सौत्रो धातुः। तस्मात् "वङ्क्रादयश्च" [उ ४।६६] इत्यौणादिकः क्रिन्-प्रत्यय'। (8) 'कृद् इकारादक्तिन" [गणसूत्र पा. ४।१।४५] इति वा ङीष्। "वन्द्री षटी-तरी तन्द्री इति ङीषन्तोऽपि" इति चीरस्वामी। तथा रामायणे प्रयोग'—

निस्तन्द्रिरप्रमत्तश्च स्व-दोष-परदोष-वित् [२।१।२४]

इति। 'नेन' दुर्गोधनेन। पुरुषस्य कर्म पौरुष पुरुषकारः उद्योग इति यावत्। (9) युवादित्वात् अण् प्रत्ययः (10)। "पौरुष पुरुषस्योक्त भावे कर्मणि तेजसि"

विनीतानाम् अधिकारम्—A. विनीताधिकारम्—All except A.

इति विश्वः । नक्तं च दिवा च 'नक्तन्दिवम्' अहोरात्रयोः * इत्यर्थः "अचतुर—" [पा. ५।४।७७] इत्यादिना (11) सप्तम्यर्थवृत्त्योः अव्यययोर्द्वन्द्वनिपाते † 'अच्' समासान्तः । "विभज्य' अस्यां वेलायाम् इदं कार्यं ✝ इति विभागं कृत्वा नीत्या वितन्वते विस्तार्यन्ते ।

Ghantapatha Explained

(1) Anticipating the objection that mere policy ted altogether from valour) is cowardice, the poet says his valour was accompanied by policy.

(2) अरिषड्वर्ग means the collection of six enemies So we should expect the compound to be षडरिवर्ग (षट् अरय, तेषां वर्ग) instead of अरिषड्वर्ग. But we must defend the expression अरिषड्वर्ग as this expression occurs very frequently in literature, the grammatically regular form षडरिवर्ग being hardly ever used So M first compounds षट् with वर्ग and gets षड्वर्ग Then he compounds अरीणाम् with षड्वर्ग M defends such compounds on the analogy of शिवभागवत. As in the case of शिवभागवत, भगवत् though connected with शिव is taken separately and the affix अण् added to it and शिव is compounded with the word भागवत with which it has no direct connection, so in the case of अरिषड्वर्ग the word षष् which is, strictly speaking, connected with अरि is taken separately and compounded with वर्ग and then अरि is compounded with षड्वर्ग Just as in the case of शिवभागवत the form acc. to strict rules of grammar should be भागवच्छिव which is never met with in literature, similarly in the present case, the

---

* अहोरात्रम् इत्यर्थः—All except C and N S Press ed.

† निपातसामर्थ्यात्—A.

✝ A, C and N. S. Press ed The Bengal editions read इ कार्यम् अकार्यम् इति which is absurd on the face of it.

regular form ought to be षड्रिवर्ग which is hardly ever used. Other instances of such compounds are :°भयैकप्रवणम् (Ki. III. 19), वसुधैकगत्या (Naishadha I 33), मनोभवाज्ञैकवशंवदम् (Ibid III. 15)

(3) Protection of the subject is the function of one who has gained control over his senses [विनीतस्य अधिकार यस्मिन् तत् इति व्यधिकरण-बहुव्रीहि. । The difficulty may be avoided by reading कार: for कारम्] How can one who cannot control himself control others (स्वयम् अशिक्ष कथम् अन्यान् साधयेत्) ?

Cf Kamandaka : ' विनयो हीन्द्रियजय "—K N. I. 22.

आत्मानं प्रथम राजा विनयेनोपपादयेत् ।
ततोऽमात्यांस्ततो भृत्यांस्तत पुत्रांस्तत' प्रजा ॥ K N I.25

(4) (Track) which has been beaten (i e marked out) by the rules of good conduct laid down by Manu

(5) सनि मी मा-घु-रभ-लभ-शक-पत-पदाम् अच इस् (पा ३।४।५४. सि २६२३)
एषाम् अच इस् स्यात् सकारादौ सनि परे। मित्सति, प्रमित्सति, दित्सति, धित्सति, आरिप्सते, आलिप्सते, शिक्षति, पित्सति, प्रपित्सते।

इस् is substituted for the root-vowel of मी, मा, घु (i. e roots दा and धा) रभ्, लभ्, शक्, पत् and पद् (when सन् beginning with स (i. e. not taking the augment इ) follows. Thus पद् + सन् = पद् पिसद् + स. The first पद is then elided by the rule :

(6) "अत्र लोपोऽभ्यासस्य" (पा ७।४।५८ सि २६२०) "सनि मी-मा—" इत्यारभ्य यत् उक्त तत्र अभ्यासस्य लोप स्यात्। The अभ्यास (reduplicate) is dropped under the circumstances mentioned in the foregoing sutras, (viz, 1 सनि मी &c 2, आप् ज्ञप्य् धाम् ईत् 3. दम्भ इच 4. मुचोऽकर्मकस्य गुणो वा. So we get पिसद् स. Now the स् of इस् is elided by the rule :

स्को' संयोगाद्योरन्ते च (पा ८।२।२९ सि. ३८०)।
पदान्ते झलि च परे य संयोग, तदाद्यो' सकार-ककारयोर्लोप: स्यात्।

or क् forming the first member of a conjunct consonant standing at the end of a word or before झल् (any consonant except nasals and य, व, र, ल) is dropped So we get पित्स् the द् being changed to त् by the rule खरि च (पा. ८।४।५५)—चर्

(i. e च. ट, त, क, प, श, ष and स) is substituted for झष् (1st four letters of a *varga* together with ह, ष and स) when खर् (1st two letters of a *varga* or श, ष and स) follows. Any consonant except a nasal or a semi-vowel is changed to the first of its class when followed by a hard consonant. Then the affix उ is added by the rule :

सन् आशंस-भिक्ष उः (पा ३।२।१६८ सि ३१४८)।

The affix उ is added in कर्त्तृवाच्य to roots ending in सन् and to the roots आ शंस् and भिक्ष्, प्रपितसुः, जिगमिषुः, आशंसुः, भिक्षुः,

(7) The root तन्द् is not enumerated by Panini in his धातुपाठ But it is referred to in the sutra वङ्क्र्यादयश्च Hence it is called a सौत्र root क्रिन् is added to it by the rule :

वङ्क्र्यादयश्च (उणादि ५०९ or ४।६६)।

The words वक्रि &c. are irregularly formed with the affix क्रिन्. So तदि + क्रिन् = तद् + रि (न comes in by the rule इदितो नुम् धातो which means a root read with an indicatory इ adds न् after its last vowel The root तद् is read as तदि with an इ. Hence it becomes तन्द्.

(8) कृदिकारादक्तिनः (गणसूत्र under पा ४।१।४५)।

कृदन्त [words ending in इ (except those formed with क्तिन्) form their feminine by adding ङीष् optionally. So we have two forms तन्द्री and तन्द्रि 'वन्द्री, घटी, तरी, तन्द्री —these four words end in ङीष् also'—so says Kshirasvamin. [This is not found in Kshirasvamin's commentary on Amarakosha] So also the use in the Ramayana—नितन्द्रिर् अप्रमत्तश्च स्वदोष-परदोषवित् [Nagojibhatta and other commentators of the Ramayana read नितन्द्री., Govindaraja reads नितन्द्रिः and explains the passage thus—नितन्द्रिः आलस्यरहित. सर्वदा शास्त्रपरिशीलनपरः इत्यर्थः। अत एव अप्रमत्तः शास्त्रार्थेषु अनवधानतहितः। स्वदोषपरदोषवित्—लोके कश्चित् पश्यति परदोषम् आत्मदोष न पश्यति, अयं तु न तथा परदोषवत् स्वदोष' च पश्यत्येव।)

[The word तन्द्री is much more frequently used than the

other form तन्द्रि. Hence M. quotes from Kshirasvamin and the Ramayana to show that though Amara reads "तन्द्री निद्राप्रमीलयोः", तन्द्रि is also used by good writers and supported by lexicographers. Chitrabhanu explains अस्ततन्द्रिणा thus —अस्ता तन्द्री अलसता येन सः अस्ततन्द्रिः तेन ; स्वाभाविकीं तन्द्रीं विवेकधैर्यादिगुणैः निरस्तवता इत्यर्थः। 'गौस्त्रियोरुपसर्जनस्य' (पा. १।२।४८) इति ह्रस्वत्वम्। He evidently bars the samasanta कप् by the dictum समासान्तविधिरनित्यः]।

(9) हायनान्तयुवादिभ्योऽण् (पा ५।१।१३० सि १७९५)।

अण् is added in the sense of भाव or कर्म to compounds ending in हायन and the words युवन् &c. The group युवादि includes पुरुषासे i.e. पुरुष when not compounded, द्विहायनस्य भावः कर्म वा द्वैहायनम्, पुरुषस्य भावः कर्म वा पौरुषम्. Similarly, नैपुणं, हार्द्दं, स्थाविरं, कौमारम् &c.

(10) पौरुष means (1) पुरुषस्य भावः (the state of man) (2) पुरुषस्य कर्म (human effort or exertion) (3) पुरुषस्य तेजः (heroism, prowess). It also means 'the full height of a man'.

(11) The two अव्यय's having the sense of सप्तमी have been irregularly compounded and the समासान्त अच् has been added acc to the rule अचतुर &c (पा. ५।४।७७). The full rule is—

"अचतुर-विचतुर-सुचतुर-स्त्रीपुंस-धेन्वनडुहर्क्साम वाङ्मनसाऽक्षिभ्रुव-दारगवोर्वष्ठीव-पदष्ठीव-नक्तन्दिव-रात्रिन्दिवा-ऽहर्दिव-सरजस-निःश्रेयस-पुरुषायुषद्व्यायुषत्र्यायुष-ऋग्यजुष-जातोक्ष-महोक्ष-वृद्धोक्षोपशुन गोष्ठश्वाः।"

The following twenty five words are irregularly formed by adding the समासान्त affix अच्:—

(1) अचतुरः (2) विचतुरः (3) सुचतुरः (4) स्त्रीपुंसौ (5) धेन्वनडुहौ (6) ऋक्सामे (7) वाङ्मनसे (8) अक्षिभ्रुवम् (9) दारगवम् (10) ऊर्वष्ठीवम् (11) पदष्ठीवम् (12) नक्तन्दिवम् (13) रात्रिन्दिवम् (14) अहर्दिवम् (15) सरजसम् (16) निःश्रेयसम् (17) पुरुषायुषम् (18) द्व्यायुषम् (19) त्र्यायुषम् (20) ऋग्यजुषम् (21) जातोक्षः (22) महोक्षः (23) वृद्धोक्षः (24) उपशुनम् (25) गोष्ठश्वम्।

M. regards विभजन् as a transitive verb used intransitively (cf. I. 11). Other commentators, however, take the comp. नक्तंदिवम् to mean 'night and day' and not 'by night and day' and regard it as the object of विभजन्. Though नक्तंदिवम्, रात्रिंदिवम् &c, as a rule, mean 'by day and night', still in certain rare cases they are used in senses other than those of सप्तमी; cf. अस्तरात्रिंदिवस्य (Ku II. 8) where M remarks : यद्यपि 'अचतुर' इति सूत्रे च रात्रौ च दिवा च रात्रिंदिवम् इति सप्तम्यर्थे द्वन्द्वो इष्ट इत्युक्तम्। तथापि 'दोषामन्यम अहः', 'दिवामन्या रात्रिः' इत्यादौ कर्माथवत् अत्रापि प्रातिपदिकार्थमात्रत्व कथंचित् प्रयोगबलादाश्रयणीयम्। Again, under Raghu XVII. 49 रात्रिंदिवविभागेषु M observes. रात्रौ च दिवा च रात्रिंदिवम्। 'अचतुर—' इत्यादिना अधिकरणार्थे द्वन्द्वे अच्-प्रत्ययान्तो निपातः। अव्ययान्तत्वाद् अव्ययत्वम्। अत्र षष्ठ्यर्थलक्षणया रात्रिंदिवम् इति अहोरात्रयो. इत्यर्थ.।

अरिषड्वर्गः।

अरिषड्वर्ग evidently means a group of six enemies In this sense the form acc. to strict rules of grammar would be षडरिवर्ग षट् being first compounded with अरयः acc to the rule दिक्संख्ये संज्ञायाम्, the whole then forming a षष्ठी तत्पुरुष with वर्ग, षट् अरय. तेषां वर्ग. But षडरिवर्ग is hardly ever met with in literature, the irregular forms अरिषड्वर्ग, मत्रषड्वर्ग being very common * Similarly, we come across अर्थैकप्रवणम् (Ki III 19) मनोभवाज्ञैकवशंवदम् (Naishadha I 33). वसुधैकगत्या (Ibid. III 15) भक्त्यैकगम्यः अर्थः, मद्रैकजीवितः &c These forms are grammatically indefensible but sanctioned by usage, Patanjali the greatest authority on Grammar himself having used the expression भिक्षभागवत in the sense of भिक्षव

* Vide Kautilya (1. 6) K. N. (I, 59, 60), S N (I 183, 146), D K (Ucchvasa VIII p 133), Nitivakyamrita IV.

भक्तिमतः (भगवान् भक्तिः i. e. शिवः भर्गः), in other words शिवो भगवान् भक्तिर्यस्य सः.

It must be carefully borne in mind that in Sanskrit any word cannot be compounded with any other word in a sentence. Thus we can say वक्त्री चरन्ती कन्यायाः but not कन्यावक्त्री चरन्ती, because here कन्या has connexion not with वक्त्री but with चरन्ती Thus in order that two or more words may be compounded together there must exist some definite necessary connexion between them

Again, Sanskrit grammarians hold that a compound always expresses some meaning different from that of the separate words "The components signify their sense separately and then establish a mutual connexion (व्यपेक्षा) The compounded word conveys one united sense based upon the union of the two" (एकार्थीभाव) Hence after two words have been compounded together, we cannot, as a rule, add any epithet exclusively connected with one of the members of the compound , in other words when three or more words are connected together we cannot compound together two of them leaving the rest uncompounded. Hence such expressions as ऋद्धस्य राजमातङ्गाः are wrong When, however, the meaning can be easily gathered, such connexions with parts are admissible Hence such expressions as देवदत्तस्य गुरुकुलम्, सुरैअंनितत्त्वयम् (Nai. IV 61) मृद्वीकया तुल्यरसाम् (Ibid. III 60) उल्लङ्घितशासनं हरेः (Si 1. 73) प्रज्ञया सदृशागमः (Raghu 1 15) अवेदनाज्ञं कुलिशक्षतानाम् (Ku. 1 20), बन्धुभिः समानमानाम् (Ki. 1. 10), मृगद्विजालूनशिखेषु बर्हिषाम् (Ki 1. 40) ज्ञाताशयस्तस्य (Bhattı I 11) are defended by the dictum सापेक्षत्वेऽपि गमकत्वात् समासः

Let us now apply the general principles stated above to the expression षण्णाम् अरीणां वर्गः. Here षण्णाम् is primarily connected with अरीणाम् Hence we must first compound षण्णाम् अरीणाम् into षडरीणाम् (by the rule दिक्संख्ये संज्ञायाम्) and

because षण्णीनाम् is definitely connected with वर्ग: a further compound is formed of the two so that the resulting word is षड्रिवर्ग But षड्रिवर्ग is hardly ever met with in literature. On the other hand, such expressions as अरिषड्वर्ग and अत्र षड्वर्ग are very common esp. in political literature

It must be admitted that अरिषड्वर्ग:, अत्र षड्वर्ग:, भयैकप्रवणम्, वसुनैकगत्या, मनोभवाज्ञैकवशंवदम् भास्त्रैकगम्योऽर्थ:, मदेकजीवित तात: cannot be grammatically defended , but they are sanctioned by usage

षण्णा though an attribute to अरीणाम् and as such definitely connected with it, is compounded not with अरीणा but with वर्ग on the analogy of such uses as किमोदन. शालीनाम् (for केषां शालीनाम् ओदन:), सक्त्वाढकम् आपणीयानाम् (for आपणीयानां सक्तूनाम् आढकम्) Once we have got अरीणां षड्वर्ग. the next step is taken and we get अरिषड्वर्ग

The formation of अरिषड्वर्ग is exactly parallel to that of शिवभागवत which means शिवो भगवान् भक्तिर्यस्य Here अण् has been added in the sense of भक्ति (i e सेव्य) to भगवत् and simultaneously शिवस्य is compounded with it Now since भगवत् is connected with शिव as its adj it cannot admit अण्, nor can शिवस्य be compounded with भागवत, since it is connected not with भागवत but with भगवत् which is a part of it. Both these processes are justified because the Bhashyakara himself, the greatest authority on grammar, uses the word शिवभागवत while commenting on the rule अय.शूल दण्डाजिनाभ्यां ठक्ठञौ (पा. ५।२।५६)

अय:शूल-दण्डाजिनाभ्यां ठक्-ठञौ (पा ५।२।७६ सि १७७६)।

भाष्यम्। किं योऽय:शूलेन अन्विच्छति स आय:शूलिक. ? किं चात: ? शिवभागवते प्राप्नोति। एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्य:। अय:शूलमिव अय:शूलम्। यो मृदुना उपायेन अन्वेष्टव्यान् अर्थान् रभसेन अन्विच्छति स उच्यते आय:शूलिक:।

प्रदीपः। "शिव-भागवत" इति। भगवान् भक्तिरस्य भागवतः। शिवस्य भागवत इति षष्ठीसमासः। अत्र सम्बन्धशब्दादेव समुदायार्थविशेषणात् शिवो भगवान् भक्तिविषय प्रतीयते।

उद्योतः। *शिवभागवतः। एतद्भाष्यप्रामाण्यादेव गमकत्वात् वृत्तिः*, अन्यथा भगवत्पदार्थस्य शिवरूप-विशेष्य-सापेक्षत्वेन असामर्थ्याद् वृत्तिर्न स्यात्। ननु, शिवस्य भगवता सामर्थ्येऽपि भागवतेन असामर्थ्यात् कथं समासः? अत आह—अवयवेति। भक्तिः सेव्यः—कर्मणि क्तिन्। शिवभागवताः कापालिकाः, ते हि शूलहस्ताः प्रायेण भिक्षां चरन्ति इति।

In the following passage from the Bala-manoroma, the whole thing has been very lucidly explained ·

सामर्थ्यं द्विविधम्। व्यपेक्षालक्षणम्, एकार्थीभावलक्षणञ्च। (1) तत्र स्वार्थपर्यवसायिनां पदानाम् आकाङ्क्षादिवशाद् यः परस्परान्वयः तत् व्यपेक्षाभिधं सामर्थ्यम्। विशिष्टा अपेक्षा व्यपेक्षा इति व्युत्पत्तेः। सम्बन्धार्थः समर्थः इति व्युत्पत्तेश्च। इदञ्च राज्ञः पुरुष इत्यादिवाक्ये एव भवति। तत्र च एकैकस्य शब्दस्य यो यः सन्निहितो योग्यश्च तेन तेनान्वयो भवति। यथा राज्ञः पुरुषः अश्वश्च इति, राज्ञो देवदत्तस्य च पुरुष इति, ऋद्धस्य राज्ञः पुरुष इति च। (ii) एकार्थीभावलक्षणसामर्थ्यन्तु प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन पृथग् गृहीतानां पदानां समुदायशक्त्या विशिष्टैकार्थप्रतिपादकतारूपम्। सङ्गतार्थः समर्थः, संसृष्टार्थः समर्थः इति व्युत्पत्तेः। सङ्गतिः संसर्गश्च एकीभाव एव। यथा सङ्गतं घृतं तैलेन इति, एकीभूतम् इति गम्यते। यथा वा संसृष्टोऽग्निरिति एकीभूत इति गम्यत इति भाष्याच्च। इदञ्च सामर्थ्यं राजपुरुष इत्यादिवृत्तावेव। अत एव ऋद्धस्य राजपुरुष इत्येवं राज्ञि पुरुषविशेषणे ऋद्धस्यविशेषणं नान्वेति। विशिष्टस्य एक-पदार्थतया राज्ञः पदार्थैकदेशत्वात्। देवदत्तस्य गुरुकुलम् इत्यत्र तु उपसर्जनस्य नित्यसापेक्षत्वात् समासः। यदा गुरुवत् देवदत्तोऽपि विशेष्ये प्रधाने कुले एव अन्वेति, तत्र गुरुणा कुलस्य उत्पादकत्वसम्बन्धेन अन्वयः। देवदत्तेन तु कुलस्य तदीय-गुरूत्पादकतया अन्वयो गुरुगर्भः। उक्तञ्च हरिणा--

समन्त्रिमञ्चः सापेक्षः नित्यं सर्वः प्रवर्तते ।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते ॥ इति ।
समुदायेन सम्बन्धो येषां गुरुकुलादिना ।
संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सह ॥ इति च ।

एतेन 'अथ मूल' इति सूत्रभाष्ये शिवस्य भक्त. इत्यर्थे शिवभागवत इत्यादि व्याख्यातम् ।

In the Laghusabdendusekhara Nagesa remarks :

गमकत्वात् एव शिवस्य भगवती भक्त, इत्यर्थे शिवभागवत इति अयःशूलेति सूत्रभाष्ये प्रयोगः । परं तु तत्र वृत्तिरेव, न तु शिवस्य भागवतः इति वाक्यं साधु । अत्र भगवच्छब्दादण् शिवपदेन भगवच्छब्दस्य समासश्च युगपदेव इति बोध्यम् ।

Extracts form other commentaries.

मक्तन्त्रिव विभज्य रात्रिं दिनं च अष्टधा विभज्य प्रथमे दिवसभागे भूपति- रात्मनो रक्षाविधानम् आयव्ययौ च चिन्तयेत् । द्वितीये पौरजानपदानां कार्याणि आस्थानगतः पश्येत् । तृतीये स्नानस्वाध्यायभोजनानि कुर्वीत । चतुर्थे स्वबुद्ध्यौचित्यानुसारेण स्वमन्त्रिभिर्निर्वर्तितेषु पौरजानपदकार्येषु न्याय- लभ्यानि हिरण्यादिधनानि प्रतिगृह्णीयात्, कोशाद्याधिकृतांश्च स्वकृत्येषु विनि- युञ्जीत । पञ्चमे मन्त्रिपरिषदा सह पत्रसम्प्रेषणेन वा मन्त्रयेत, चार गुप्त-चोर- गौयानि च बुध्येत । षष्ठे सुहृदादीनां भावविशेषं पश्यन् स्वैरविहारं कुर्यात्, स्वबुद्ध्या मन्त्रतन्त्रं विवेचयेद्वा । सप्तमे हस्त्यश्वरथान् आयुधीयांश्च पश्येत् । अष्टमे हृष्टस्य सैन्यस्य सेनापतीनां तत्सुहृदां भक्तिशक्त्युत्साहादि चिन्तयेत्, प्रतिष्ठिते अहनि सन्ध्याम् उपासीत ।

प्रथमे रात्रिभागे चारादीन् गूढपुरुषान् पश्येत् । द्वितीये स्नान-भोजनं कुर्वीत । तृतीये गीतवाद्यनृत्याद्यभिनन्देत् । चतुर्थे प्रियाभिः पत्नीभिः सह रमेत । पञ्चमे शयीत । षष्ठे तूर्यघोषेण प्रबुद्धः शास्त्रम् इतिकर्तव्यतां च चिन्तयेत् । सप्तमे गूढमन्त्रं कुर्यात्, गूढपुरुषान् प्रेषयेद् वा । अष्टमे ऋत्विगाचार्य-पुरोहित-मन्त्रि-

प्रख्यापनादीनि प्रतिष्ठाप्येत्यात्, चिकित्सक-माहामात्रिक-मौहूर्तिकांश्च पश्येत्, ततः सन्ध्यामुपासीत इत्यादि मन्त्रिभिर्विभागी नीतिशास्त्रेषु विंशते। *

प्रकृतविद्या — स्वाभाविकी तन्द्री विवेकधैर्यादिगुणैर्गैरिक्षवता। अरिषड्-विजाम् अरिभूतानां वा षण्णां वर्गाणां जयः कृतो येन स तथोक्तः तेन।

मानवीं — मनुना निर्दिष्टां प्रकाशितां वा पद्वीं मार्गं धर्मस्य इत्यर्थाद् गम्यते। प्रपित्सुना — प्रपत्तुं जिगमिषुणा। धर्मस्य धर्ममार्गस्य वा मनुसम्बन्धित्व-कथनेन मुख्यमार्गिकत्वेन धर्मं स प्रपित्सते इति द्योत्यते।

अजितेन्द्रियैरपि धर्मैकदेशो धर्मप्रतिनिधिर्वा यद्यपि प्राप्तुं शक्यते, तथापि साक्षाद् धर्मस्य स्वरूपं तैः प्राप्तुं न शक्यते इति द्योतयितुम् अगम्यरूपाम् इत्युक्तम् न मागम्याम् इत्येव।

प्रयत्नकृतारिजयी नवं धर्मं प्रपित्सुः अर्थशास्त्रानुसारेण पौरुष वितन्वन् सुयोधनः स्वयमेव अजातशत्रुणा निसर्गाचरितमुख्य-धर्मेण धर्मशास्त्रानुरूपया विनयमाचरन्नधर्मेणा भवता जेतुं शक्यते इति अनेन श्लोकेन द्योत्यते।

University Questions Substance in Sanskrit. Explain the significance of each word. पद्वीम्—P. प्रपित्सुना—D Show how diff उपसर्गs change the meaning of the root पद्. अरिषड्वर्ग —M Gr. N मन्त्रिवत्—Parse fully Expound the samasa in all the compound words

> सखीनिव प्रीतियुजोऽनुजीविनः
> समानमानान् सुहृदश्च बन्धुभिः।
> स सन्ततं दर्शयते गतस्मयः
> कृताधिपत्यामिव साधु बन्धुताम् ॥ १० ॥

Eng. Equivalents. प्रीतियुजः—affectionate. गत-स्मयः—free from pride. बन्धुता (बन्धूनां समूहः)—collection of friends.

Analysis (1) सः अनुजीविनः सखीनिव दर्शयते—He makes his retainers seem like friends Adj to सखीन्—प्रीतियुजः Adj. to

---

* Vide Kautilya (I. 19), and Dasakumaracharita VIII.

स-गतस्मयः। (2) सुहृदः बन्धुभिः समानमानान् दर्शयति—He makes his friends seen equally honoured with his kinsmen स बन्धुतां कृताधिपत्याम् इव दर्शयति—he makes his kinsmen seen as if possessed of royal power

Prose-Order गतस्मयः (निरहङ्कारः) सः सन्ततं साधु अनुजीविनः प्रीतियुजः सखीन् इव दर्शयते, सुहृदश्च बन्धुभिः समान-मानान् (तुल्यसत्कारान्) दर्शयते, बन्धुतां कृताधिपत्याम् इव दर्शयते।

Bengali দুর্য্যোধন অভিমানশূন্য হইয়া সর্ব্বদাই ভৃত্যবর্গকে প্রিয়মিত্রের ন্যায় দেখান অর্থাৎ তাহাদেব সহিত এরূপ ব্যবহার করেন যে লোকেব প্রতীতি জন্মে উহারা তাঁহার প্রিয়মিত্র, সুহৃদ্‌গণকে আত্মীয়ের সহিত সমানসমাদরবিশিষ্ট দেখান অর্থাৎ আত্মীয়গণেব যেরূপ সমাদর করা উচিত, সুহৃদ্‌গণেরও ঠিক সেইরূপ সমাদর কবিয়া থাকেন, তাহাতে প্রজাবর্গ মনে করে তাঁহার মিত্রগণই তাঁহার আত্মীয, আব আত্মীয়গণকে তাঁহারা রাজত্ব করিতেছেন এইরূপ দেখান অর্থাৎ জ্ঞাতিগণের সহিত সমানভাবে রাজ্যভোগ কবেন, কখনও অনুজীবী বা সুহৃদ্ বা জ্ঞাতি কাহারও প্রতি কোনরূপ গর্ব্বিত ব্যবহাব কবেন না, ইহার ফলে তাঁহারা সকলে ত অনুরক্ত থাকেনই, অধিকন্তু প্রজানুরাগও বিশেষরূপে বর্দ্ধিত হয়।

English Devoid of (all) pride, and frankly he always treats (lit shows to the world) his attendants like friends possessing his affection, and his friends (he treats) with the respect due to his relations and his kinsmen (he treats) like ruling sovereigns.

Elucidation. A king cannot be too circumspect in his treatment towards his attendants and friends Nothing alienates the sympathy of people like superciliousness on the part of a superior Duryodhana takes particular care to

please those about him—his servants, friends and relations, by treating them with a courtesy and consideration beyond their fondest expectations He gives them more than their due and thus secures their unflinching devotion to his cause. He treats his attendants with the courtesy and affection due to beloved friends, his friends be treats with the respect due to his own kinsmen He is also careful not to create jealousy in the minds of his brothers and other relatives by giving himself airs, and lest they should murmur at the honour bestowed on his friends, he puts them (his brothers and other relatives) "on a footing of equality with himself with respect to honours, powers and enjoyments"

Cf. पृथग्भावो विनाशाय राज्यस्य च कुलस्य च।
अतः स्वभोगसदृशान् दायादान् कारयेन्नृपः॥ Sukraniti II 345.
सोदरेषु च सर्वेषु स्वस्याधिक्यं न दर्शयेत्।
मानाद्भ्रातृणा नष्टो ह्यवमानात् सुयोधन.। Ibid. II. 40

Word-Notes.

प्रीति-युजः—प्रीतिं युञ्जन्ति इति (उपपद तत्) प्रीति+युज्+क्विप् (कर्त्तरि) प्रीति—प्री+क्तिन्। प्रीणाति &c Caus प्रीणयति, प्राययति।

अनुजीविनः, सुहृदः and बन्धुताम्—obj to दर्शयते by the rule "कर्तुरीप्सिततमं कर्म (acc. to M).

बन्धुभिः—बन्ध्+उ। तृतीया in connection with समान in समानमानान् which is तुल्यार्थक. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्। Optional form बन्धूनाम्. Or say सहार्थे तृतीया।

समान-मानान्—समानः (तुल्यः) मान. (सत्कारः) येषां तान् (बहु) 2/3 मान generally means 'pride' or 'self-respect' in Sanskrit. Here, of course, respect, honour सापेक्षत्वेऽपि गमकत्वात् समासः। Of प्रजया सदयागमः Raghu I. 10.

सन्ततम्—सम्+तन्+क्त। "समो वा हित-ततयोः।" The म of सम् is optionally dropped before हित and तत. Thus we get सहित, संहित। सतत सन्तत।

दर्शयते—दृश् + णिच् लट् ते ।। 'णिचश्च' इति आत्मनेपदम् (M.)

गतस्मयः—गतः स्मयः (गर्व्वः) यस्य सः (बहु) । स्मयः—स्मि + भावे अच् । 'एरच्'—अच् is added to roots ending in इ short or long

कृताधिपत्याम्—कृतम् आधितत्य यस्याः सा (बन्धु)ताम् Adj to बन्धुताम्

आधिपत्यम्—अधिकः पतिः अधिपतिः (प्रादिसमासः) अधिपति + यक्— "पत्यन्तपुरोहितादिभ्यो यक्"(पा ५।१।१२८ सि १७८३) पत्यन्तेभ्यः पुरोहितादिभ्यश्च षष्ठ्यन्तेभ्यः भाव-कर्मणोर्यक् स्यात् । The affix यक् is added to words ending in पति (as सेनापति, अधिपति &c) and to पुरोहित &c in the sense of भाव or कर्म्म अधिपतेर्भावः कर्म वा अधिपति + यक् । The क being इत् the first vowel अ takes वृद्धि i e. becomes आ. The इ of अधिपति is elided by the rule यस्येति च So आधिपत्य.

बन्धुता—बन्धूनां समूहः इति बन्धु + त (ल) + स्त्रियां टाप् ।

Rule—ग्राम जन-बन्धु सहायेभ्यस्तल् (काशिका ४।२।४३ सि. १२५१) ।

तल् is added in the sense of समूह to ग्राम, जन, बन्धु and सहाय, ग्रामता—a collection of villages जनता—crowd, बन्धुता—a number of friends, सहायता—a number of helpers. So also गजानां समूहः गजता. Words ending in तल् are fem acc to the लिङ्गानुशासनसूत्र "तलन्तः स्त्रियाम् । "तलन्तानां स्त्रीत्व लोकात् 'तलन्त स्त्रियाम्' इति लिङ्गानुशासनसूत्राच्च ।"

[In the अष्टाध्यायी the rule is read thus—"ग्राम-जन बन्धुभ्यस्तल् Under it is the Varttika—"गज-सहायाभ्याञ्च इति वक्तव्यम्" ।]

घण्टापथः—सम्प्रति भृत्याद्यनुरागम आह—"सखीन् इव" इति । 'गतस्मय.' निरहङ्कारः अत एव 'सः' दुर्योधन. 'सन्ततम्' अनारत 'साधु' सम्यक् अकपटम् इत्यर्थः. 'अनुजीविन.' भृत्यान् 'प्रीतियुजः' स्निग्धान् सखीन् इव मित्राणि इव 'दर्शयते' "लोकस्य" इति शेष. । "हेतुमति च" [पा ३।१।२६] इति णिच् । "णिचश्च" [पा १।३।७४] इत्यात्मनेपदम् । शोभन हृदयं येषां तान् 'सुहृद.' मित्राणि 'च' । "सुहृद्-दुर्हृदौ मित्रामित्रयो." [पा ५।४।१५०] इति निपातः । 'बन्धुभिः' भ्रात्रादिभिः 'समान-मानान्' तुल्य-सत्कारान् 'दर्शयते' । 'बन्धुतां' बन्धूनां समूहः बन्धुता ताम् । "ग्राम-जन-बन्धु-सहायेभ्यस्तल्" [काशिका

४।१।४७]। अतम् आधिपत्यं स्वाम्यं यस्याः तां 'अताधिपत्याम्' इव 'दृश्यते' अन्यून् अधिपतीन् इव दर्शयति इत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य, तथा तान् सम्भावयति इत्यर्थः। अनुजीव्यादीनां "कर्तुरीप्सिततमं कर्म" [पा १।४।४९] इति कर्मत्वम्।

पूर्व्वे तु अभिन्नेन पदान्वये वाक्यार्थम् इत्थं वर्णयन्ति। स राजा अनुजीव्यादीन् सख्यादीन् इव दर्शयते। सख्यादय इव ते तु त पश्यन्ति। सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते। स्वयमेव छन्दानुवर्त्तितया स्वदर्शनं तेभ्यः प्रयच्छति इत्यर्थः। अर्थात् तस्य ईप्सितकर्मत्वम्, अणि-कर्तुः अनुजीव्यादेः "अभिवादि-दृशोरात्मनेपदम् उपसंख्यानम्" इति पाक्षिकं कर्मत्वम्। एवं चात्र अण्यन्त-कर्मणो राज्ञो ण्यन्ते कर्तृत्वेऽपि "आरोहयते हस्ती स्वयमेव" इत्यादिवत् अ-श्रूय-माणकर्मान्तरस्याभावात् * नायं "णेरणौ –" [पा १।३।६७] इति सूत्रस्य विषय इति मत्वा "णिचश्च" इति आत्मनेपदं प्रतिपेदिरे †।

भाष्ये तु "णेरणौ—"[पा. १।३।६७] इति सूत्रस्य विषयत्वमपि अस्य उक्तम्। यथाह—"पश्यन्ति भृत्या राजानं' 'दर्शयते भृत्यान् राजा' 'दर्शयते भृत्यै राजा' अत्र आत्मनेपदं सिद्धं भवति।" तत्राह कैयटः—"ननु कर्मान्तरसद्भावात् अत्र आत्मनेपदेन न भाव्यम्? उच्यते—अस्मादेव उदाहरणात् भाष्यकारस्य अयमभि-प्राय उन्नीयते—अण्यन्तावस्थाया ये कर्तृ-कर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे आत्मनेपदं न भवति, यथा स्वलम् आरोहयति मनुष्यान् इति। इह त्वण्यन्ता-वस्थायां कर्तॄणां भृत्यानां णौ कर्मत्वम् इति भवत्येवात्मनेपदम्।" [महाभाष्य Part II. N. S Press P. 182].

---

* अ श्रूयमाणकर्मान्तराभावात्—श्रूयमाणकर्मान्तरसद्भावात्। श्रूयमाण means 'expressly stated' as opposed to गम्यमान which means 'implied' or 'understood Thus मधुराज्ञानम् अदर्शयत् सुता: (Ku. IV. 25) दर्शयति भवो भक्तान् [आत्मानम्] here the obj. आत्मानम् is understood but दर्शयति भक्तान् आत्मानम्

† The nom. to प्रतिपेदिरे is पूर्व्वे the first word of the para

Ghantapatha Explained.

(1) "हेतुमति च" (पा. ३।१।२६ सि २५७६)

हेतुः स्वतन्त्रस्य कर्त्तुः प्रयोजकः। तदीयो व्यापारः प्रेषणादिलक्षणः हेतुमान्, तस्मिन् अभिधेये धातोर्णिच् प्रत्ययो भवति।

[हेतु means the mover of the independent agent, an operation relating to the हेतु such as directing &c. is called हेतुमान्] In the sense of directing, impelling &c. the affix णिच् is added to a root.

(2) णिचश्च (पा. १।३।७४ सि. २५६४)

णिजन्तात् आत्मनेपदं स्यात् कर्त्तृगामिनि क्रियाफले। A णिजन्त root takes Atm when the benefit of the action accrues to the agent Here of course the benefits arising out of Duryodhana's courteous dealings accrue to Duryodhana, hence Atm

(3) He honours his servants and others in such a way that people may regard them as his friends &c.

(4) अनुजीवी &c. (i. e अनुजीविन., सुहृद' and बन्धुताम्) are objects of the verb दर्शयते acc. to the rule—

कर्त्तुरीप्सित-तमं कर्म्म (पा १।४।४९ सि ५३५)।

कर्त्तुः क्रियया आप्तुम् इष्टतमं कारकं कर्म्मसंज्ञं भवति। कटं करोति, ग्रामं गच्छति। That which, it is intended, should be most affected by the act of the agent is called कर्म्म.

[Thus acc to Mallinatha the process is—

लोकः अनुजीविनः प्रीतियुजः सखीन् इव पश्यति

स लोकं लोकेन वा अनुजीविनः प्रीतियुजः सखीन् इव दर्शयते

The Atm. in दर्शयते is acc to the general rule णिचश्च which prescribes Atm. for all णिजन्त roots when the agent is affected by the action M says लोकस्य इति शेषः instead of लोकं or लोकेः इति शेषः, as he uses सम्बन्धसामान्ये षष्ठी]।

दर्शयते ।

[There are two main rules prescribing Atm. in the case of णिजन्त roots The first is णिचश्च which is very general (embracing all causal roots) and which means a causal root takes Atm when the क्रिया-फल is कर्त्तृगामि, this condition of कर्त्तृगामिक्रियाफलत्व making it, to all intents and purposes, optional The second rule is णेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने which means that a causal root will take Atm in all cases if the obj in the non-causal form becomes the subject in the causal, except in the sense of 'remembering with longing' Now the scope of this second rule is restricted in various ways: (1) Some hold that in order that this rule may apply, there must be no object present in the causal form, while (2) others maintain that there must be no *new* object (i. e. other than the nom or obj in the non-causal). The first is the view of the वृत्तिकार, while the second is inferred by Kaiyata to be the view of the भाष्यकार.

Which of the above *two* rules are we to apply in the present case ?

Mallinatha quotes the view of his predecessors who hold that as the typical example आरोहयते हस्ती स्वयमेव (in the non-caus —आरोहन्ति हस्तिनं हस्तिपकाः) differs from the present case on account of the objective case being used here, the rule णेरणौ &c does not apply and so the Atmanepada is to be defended by the rule णिचश्च अनुजीविनः सखाय. इव राजानं पश्यन्ति, राजा अनुजीविनः सखीन् इव पश्यतः (स्व) दर्शयते] ।

Mallinatha then shows that the present case does come under the rule णेरणौ—by referring to Bhashyakara who gives as an example of this rule राजा भृत्यान् दर्शयते where unlike the example आरोहयते हस्ती स्वयमेव the object is present In support

of his argument Mallinatha quotes from Kaiyata who infers from the above example that in the causal form the verb will be परस्मैपदी only when a new object which was not present in the non causal form either as subject or object appears and not otherwise, as in the example स्थलम् आरोहयति मनुष्यान् (हस्ती) [the non-causal form—मनुष्याः हस्तिनम् आरोहन्ति] where स्थलम् is absolutely new

Thus far Mallinatha deals with the views of his predecessors He himself explains the sentences in quite a different way. लोकः अनुजीविनः सखीन् इव पश्यति, राजा लोकेन लोकं वा अनुजीविनः सखीन् इव दर्शयते Here अनुजीविनः the obj. of the non-causal form is *not* the subject in the causal. Hence the rule णेरणौ does not apply So णिचश्च is the only way open to us.]

Ancient commentators (M's predecessors) in this very construction (of words) explain the meaning of the sentence thus—The king makes his attendants and others seen like friends They, on their part, see (regard) him as his friends.. He makes them who see him as a friend &c seen in that light i e he himself following their inclination gives a sight of himself to them. It is clear from the meaning that "स्व" is the ordinary object (ईप्सित-कर्म) अनुजीविनः &c the subject in the non-causal form are objects optionally by the rule—

अभिवादि-दृशोरात्मनेपद उपसंख्यानम् (वा ११८४ पा १।४।५२सि ५४१)

The subject of the primitive verbs अभिवद् and दृश् is either put in the Accusative or Instrumental case in the causal when the causal roots (अभिवादि and दृशि) are used in Atmanepada

Thus here though राजा the object in the non-causal form becomes the subject in the causal form, the present

case does not come within the purview of the rule चेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने as there is the absence of the condition of not possessing another object expressly stated, as in (the typical example) आरोहयते हस्ती स्वयमेव &c. Holding this view they come to the conclusion that the Atm. here is acc to the rule णिचश्च.

In the भाष्य, however, this has been held to come within the scope of the rule "णेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने" So says the Bhashyakara—"पश्यन्ति भृत्या राजानम्' 'दर्शयते भृत्यान् राजा', 'दर्शयते भृत्यैः राजा'। Here the Atm is justified (सिद्ध)". On this Kaiyata says—'Well, there can be no Atm. here because of the presence of another object (the object in the non-causal form becoming the subject here) (In reply to this) we say—From this very example दर्शयते भृत्यान् राजा &c. we infer this to be the intention or meaning of the भाष्यकार—Atm. does not take place when there is present an object other than that which was the subject and that which was the object of the root in the non causal form, as स्थलम् आरोहयति मनुष्यान्, non causal—मनुष्या. हस्तिनम् आरोहन्ति, caus — (हस्ती) मनुष्यान् स्थलम् आरोहयति—here in the non-causal form the nom. was मनुष्या. and the obj. हस्तिनम्. In the causal, however, besides मनुष्यान् (the nom in the non-causal form) a new object viz स्थलम् is present, therefore the rule णेरणौ &c does not apply here). In the present case, [i e दर्शयते भृत्यान् राजा] on the other hand भृत्याः the subject in the non-causal form, has become the object in the causal, hence Atm does come in. A similar example occurs in Magha XII 5. करेणुरारोहयते निषादिनम् where M observes —

अत्र कर्त्रभिप्राये 'णिचश्च" इत्यात्मनेपदे सिद्धेऽपि प्रयोगवैचित्र्यस्य अपि चमत्कारत्वात् अकर्त्रभिप्रायेऽपि "णेरणौ यत् कर्म णौ चेत् स कर्त्ताऽनाध्याने" इत्यात्मनेपदं वदन्ति । अपि कर्मणः करेणोः एव अत्र ण्यन्ते कर्तृत्वात् तस्यैव च णर्थात् कर्मत्वात् इति । ननु "यत् स" ग्रहणम् अनन्यकर्मार्थम्" इत्युक्तम्

[काशिका under पा १।३।६०] तेन कर्मभावविधिविधानात् कथं विधादिनि कर्मणि आत्मनेपदम्। अन्येषां [वृत्तिकारादीनां] मतम्। भाष्यकारस्य तु 'दृश्यते भवान् राजा' इत्युदाहरणात् अपि कर्तृ-कर्मव्यतिरिक्तकर्मक एव निषेधो विवक्षित इति कैयटः।

Extracts from Chitrabhanu.

Context : शास्त्रविहितनित्याचारानुष्ठानरूपे विनये तस्य नैपुण्यमस्ति इत्युक्त्वा, स्वमक्लवशीकरणरूपे तस्मै च तदस्ति इत्याह पद्यसन्दर्भेण।

अनुजीविनो दर्शयति = अनुजीविकर्तृकं दर्शनं कर्तृभूत एव आनुकूल्येन प्रयोजयति इत्यर्थः। कीदृशान् अनुजीविनः? सखीन् इव प्रीतियुजः सख्यौ सखीन् इव आत्मनि प्रीतियुजः स्निग्धान् इत्यर्थः। प्रीत्या विश्वासहितैषित्वादयः सखिगुणा उपलक्ष्यन्ते। सः अनुजीविनः सखीन् इव मानयते। तथा मानितास्ते प्रीताः सखाय सखायम् इव तं सदा दिदृक्षन्ते, स तान् दर्शयते। तेषां स्वदर्शनव्यासङ्गं कदाचिदपि न करोति इत्यर्थः। **सखिषु या मानना सा अनुजीविष्वपि क्रियते चेत् सखीनां कोपः स्यात् इत्यत आह**—समानेत्यादि। बन्धुशब्देन बन्धुमान उच्यते ..। तर्हि बन्धूनां कोपः स्यात् इत्यत आह—बन्धुताम् इति। कृताधिपत्याम् = आत्मनिर्विशेष मानिताम इत्यर्थः साधु—उचितम, अग्राम्यदर्शनो यथा भवति तथा अनुजीविप्रभृतीना स्वदर्शने अनुकूलो भवति इत्यर्थः। तदायत्तेषु स्वकार्येषु नवपरिचये यदृच्छया असौ अनुजीविप्रभृतिषु प्रवण भवति चेत्, तावता तेषाम् आत्मनि विश्वासादयस्तथा न स्युः इत्यत आह—सन्ततम् इति। सन्तत सतत तत्कार्येषु स्वकार्येषु नवपरिचये चिरपरिचये विविक्ते आकीर्णे च इत्यर्थः। कथं नाम सार्वभौमः सन् असावनुजीविप्रभृतिषु प्रवण. स्यात् इत्यत्राह—गतस्मय इति। स्मयो नाम पर-प्रावीण्य-विरोधी स्वश्रताहेतुर्मानाख्यो दोष.। स गतो यस्मात् स तथोक्त.। अनुजीविप्रभतीनां तेन सह स्वैरव्यवहारादि नास्ति इति द्योतयितुं 'सखीन् इव'" इत्यादिना तेषां सख्यादिभिः साङ्गश्यम् उक्तम्, न तादृूप्यम्। तेन अनुजीविप्रभृतयः त प्रति स्वैहविश्रम्भादियुक्तोऽपि तस्य प्रभुत्व न भिन्दन्ति इति तस्य अप्रधृष्यत्व द्योत्यते।

दर्शयते इत्यत्र सुयोधनस्य दर्शनकर्मीभूतस्यापि दर्शनानुकूल्येन प्रयोजकत्वम् उद्भाव्य, "तत्प्रयोजको हेतुश्च" इति कर्तृत्वं, तेन कर्त्तरि प्रत्ययः। अनुजीविप्रभतीनां णौ दृशि-धातो कर्तृभूतानां ण्यन्ते कर्मत्वं "गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्माकर्मकाणामणि कर्त्ता स णौ" (P) (पा. १।४।५२) इति। "णेरणौ यत् कर्म णौ चेत् स कर्त्तानाध्याने" (पा. १।३।६७) इत्यात्मनेपदम्।

अत्र केचिदाहुः—णेरणाविति-सूत्रेण नात्र आत्मनेपदं स्यात्। तत्र हि अणौ 'कर्मभूतस्य णौ कर्तृत्वं' कर्मान्तरनिवृत्तिश्च विवक्षति। तथा च वृत्तौ उदाहरणम्—आरोहन्ति हस्तिनं हस्तिपकाः, आरोहयते हस्ती स्वयमेव। तस्मात् "दर्शयते" इत्यात्मनेपदम् इति। तेषां वचनं "पश्यन्ति भृत्या राजानं, दर्शयते भृत्यान् राजा" इति भाष्यविरुद्धम्। वृत्तिकारेणापि कर्मान्तरनिवृत्तिर्न विवक्षिता यदयमाध्यानोत्कण्ठायामात्मनेपदनिषेधे कर्म प्रायुङ्क्त, 'स्मरति वनगुल्मस्य कोकिलः, स्मारयत्येनं वनगुल्मः स्वयमेव' इति। "दर्शयते" इत्यात्मनेपदे भृत्यादिकर्मकं लोकादिकर्तृकं दर्शनं स प्रयोजयति इत्यर्थे भृत्यादीनां सख्यादिसाम्यप्रापणम् इति तत्र श्लोके प्रस्तुतस्य भृत्यादिविषयात्मकं अर्थस्य दूषणम् उद्बोध्येत। अथ भृत्यादिकर्तृकम् आत्मविषय दर्शनम् आनुकूल्येन स प्रयोजयति इत्यर्थः, तदा च "दर्शयते" इत्यत्र कर्त्रभिप्राये क्रियाफले इत्यधिकारात् स्वक्रियाफलसिद्धये भृत्यादिदर्शनानुकूलो भवति इति तस्य पूर्वोक्तो दोषस्तदवस्थ एव इत्यलं बहुना। "करेणुरारोहयते निषादिनम्" इति माघः।

University Questions. अनुजीविनः—P. प्रीतियुजः—D Peculiarity in the Comp.—समानमानान्. सन्तत—Alt. form. दर्शयते—Full gram N. आधिपत्य—D. meaning of ता in बन्धुताम् Other similar examples.

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया।
गुणानुरागादिव सख्यमीयिवान्
वाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

English Equivalents अ-सक्तम्—without attachment. यथा-यथम्—duly. सख्य—friendship ईयिवान् (इ + क्वसु) (lit approached here) contracted त्रि--गणः—group of three (धर्म, अर्थ and काम).

Analysis. अस्य त्रिगणः परस्परं न बाधते—The group of three (i e virtue, wealth and enjoyment) of D does not obstruct or thwart one another. Adj. to अस्य—यथायथं विभज्य समपक्षपातया भक्त्या असक्तम् आराधयतः—who worships or pursues them after due discrimination with a devotion marked by

the same partiality for each. Adj. to त्रिगण:—गुणानुरागात् सख्यम् ईयिवान् इव who had, as it were, contracted friendship for him through an affection for his good qualities

Prose-Order यथायथं (यथास्वं धर्मादिस्वरूपानतिक्रमेण इत्यर्थः) विभज्य समपक्षपातया भक्त्या असक्तं [यथा स्यात् तथा] आराधयत: (सेवमानस्य) अस्य त्रिगण: (धर्मार्थकामा:) गुणानुरागात् सख्यम् ईयिवान् (उपगतवान्) इव परस्परं न बाधते (द्रूकरोति)।

Bengali. ধর্ম্ম, অর্থ ও কাম এই তিনটি পুরুষার্থের মধ্যে কোন্ সময়ে কোনটির কি ভাবে সেবা করা উচিত, তাহা যথাযথভাবে বিচার করিয়া আসক্তিশূন্য হইয়া কর্ত্তব্যবোধে তিনি সমান ভক্তিসহকারে ধর্ম্ম, অর্থ ও কামের আরাধনা করেন, অর্থাৎ যথাকালে ধর্ম্মানুষ্ঠান, অর্থার্জ্জন ও কামোপভোগ করেন, কিন্তু কোনটির প্রতিই অত্যাসক্ত হন না। ফলে তাঁহার অসাধারণ গুণে আকৃষ্ট হইয়া তাহারা যেন তাঁহার সহিত বন্ধুত্বসূত্রে আবদ্ধ হইয়া পরস্পর পরস্পরের বাধা জন্মায় না, অর্থাৎ ইহাদের কোন একটিতে অতিশয় আসক্ত হইয়া পড়িলে অপর দুইটির ভোগ হইতে বঞ্চিত হইতে হয়, অধিকন্তু সেইটির ভোগেও বাধা জন্মে। যেমন, কোন লোক যদি কেবল ধর্ম্মানুষ্ঠানে ব্যগ্র হয়, তাহা হইলে অর্থোপার্জ্জন ও কামোপভোগের দিকে তাহার দৃষ্টি থাকে না, ফলে অর্থ-পুত্রাদির অভাবে তাহার ধর্ম্মানুষ্ঠানের পক্ষেও বাধা জন্মে। এইরূপে অর্থ ও কামে অত্যাসক্ত ব্যক্তিরও অসুবিধা হইয়া থাকে। কিন্তু দুর্য্যোধন সকল কয়টির প্রতি সমান আসক্তিবিশিষ্ট হওয়ায়, তাঁহার ধর্ম্মানুষ্ঠান ও সর্ব্বাঙ্গসুন্দর হইত, অর্থোপার্জ্জনও প্রভূত হইত ও কামোপভোগও পর্য্যাপ্ত হইত।

English. The three (ends of human endeavour) have come together in him attracted, as it were, by his virtues; nor do they mutually clash with each other in his case;

for he directs his attention impartially to each in turn, devoting himself whole-heartedly (to each), yet still (remaining) uncontaminated (lit unattached)

Elucidation. The question as to what is the *summum bonum* of life has puzzled philosophers since the dawn of reason. Some say it is virtue, some maintain it is wealth, while others hold it is enjoyment Still others are of opinion that salvation is the end for which man endowed as he is with rationality should strive But salvation entirely dissociated as it is from all forms of material enjoyment has no charm for the ordinary man. Hence for him the ends of existence are three, viz, virtue, wealth and pleasure. Man is apt to pursue one of these three to the prejudice of the others. A Don Juan * never thinks of virtue or wealth, nor a Ralph Nickleby † of duty or enjoyment, nor Dr. Primrose ‡ of wealth or pleasures But the truly great man is he who pursues all three without being attached to any one of them. (Cf "सेवेतैतांस्तु विषयान् मुक्ता तत्परतां वशी"—कामन्दकः।) This was exactly the case with Duryodhana He did not give up any of the sensual enjoyments nor did he spend all his wealth in the practice of virtue. He practised virtue, acquired wealth and gratified the cravings of his senses, all according to the dictates of the shastras, so that not one of these clashed with the others.

धर्मं चार्थं च कामं च यथावद्वदतां वरः ।

विभज्य काले कालज्ञः सर्वान् सेवेत पण्डितः ॥ Maha III 33 42

---

* Vide Byron's *Don Juan.*

† Vide Dickens's *Nicholas Nickleby*

‡ Vide Goldsmith's *Vicar of Wakefield.*

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव वा ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥ Manu II. 224.
न धर्ममर्थकामाभ्यां बबाधे न च तेन तौ ।
नार्थः कामेन कामं वा सोऽर्थेन सदृशस्त्रिषु ॥ Raghu XVII. 57
समं वा त्रिवर्गम् अन्योन्यानुबन्धम् [सेवेत] । एको हि आसेवितो धर्मार्थकामानाम् आत्मानम् इतरौ च पीडयति । Kautilya I 7.

Word-Notes.

असक्तम्—न सक्तम् (नञ् तत्पुरुष) adv modifying आराधयतः. सञ्ज् + क्त (कर्त्तरि) = सक्तम् । सजति, ससञ्ज, असाङ्क्षीत्, असाङ्क्ताम्, असाङ्क्षुः ।

आराधयत.—आ + राध् + णिच् + शतृ = आराधयत् 6/1, adj to तस्य । देवादीनां प्रसादनाय क्रियमाण. सपर्यादिपूजाविशेष. आराधयते मुख्योऽर्थः सोऽत्र धर्माद्यनुष्ठाने उपचर्यते ।

यथा-यथम्—formed irregularly in the sense of 'respectively', 'properly', 'duly' 'यथा-शब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते'—काशिका, adv modifying विभज्य Rule . "यथास्वे यथायथम् ।"

विभज्य—विभाग कृत्वा । [सकर्मकत्वाद् धातो धर्माद्यनुष्ठानभृत्यादिसम्भावनोचिता देशकालादयो विभागकर्मत्वेन आक्षिप्यन्ते ।]

भक्त्या – भज् + क्तिन् (भावे) – भक्ति 3/1 करणे तृतीया । ऐहिकामुष्मिकाभ्युदयहेतुत्व-प्रतीति-पूर्विका स्नेहबहुमानविश्वासात्मिका देवादिविषया चित्तवृत्तिर्भक्ति. ।

सम पक्ष पातया—पक्षे पात. पक्षपातः (७मी तत्), सम. पक्षपातः यस्या सा (बहु) तया adj भक्त्या

गुणानुरागात्—गुणेषु अनुराग. (७मी तत्पुरुष or सुप्सुपा) तस्मात् । हेतौ पञ्चमी । अनु + रञ्ज् + भावे घञ् = अनुराग । The न् of रञ्ज् is elided by the rule घञि च भाव-करणयोः (पा. ६।४।२८) ।

सख्यम्—सख्युः भावः इति सखि + यत् । The तद्धित affix यत् is added to सखि in the sense of भाव and कर्म. Rule—सख्युर्यः (पा ५।१।१२७)

ईयिवान्—इ + क्वसु ईयिवस् I/1 The words उपेयिवान् (उप + इ + क्वसु 1/1) अनाश्वान् (नञ् + अश् + क्वसु I/I) and अनूचान: (अनु + वच् + कानच्) are irregularly formed. Rule—उपेयिवान्-अनाश्वान् अनूचानश्च (पा ३।२।१०९)।

त्रि-गर्णं—त्रयाणां (धर्म्मार्थकामानां) गणं (समूहं.) इतत् nom to बाधते.

परस्परम्—परं परम् इति, द्विर्भाव: (Reduplication) by the rule—कर्म्म-व्यतीहारे सर्व्वनाम्नो द्वे वाच्ये, समासवच्च बहुलम् (वा under पा. ८।१।१२ सि २१४७)।

When कर्म्मव्यतीहार or reciprocity of action is implied a pronoun is reduplicated (thus परं परम्) and the whole is generally (बहुलं) treated like a compound Here reciprocity of action is meant, because धर्म्म obstructs अर्थ and अर्थ, in its turn, obstructs धर्म्म and so on, hence पर is repeated Since परस्परम् is कर्म्म here, in द्वितीया we get पर परम्. This does not behave as a compound because of the use of the word बहुल (which shows that समासवद्भाव is barred in the case of अन्य and पर and is compulsory in the case of इतर, for a full explanation of बहुलं vide pp 15, 16) असमासवद्भावे पूर्व्वपदस्थस्य सुप: सुर्वक्तव्य: when the whole does not behave as a compound the विभक्ति of the previous word is to be replaced by सु (i e 1/1). So we get पर परम् Then the विसर्ग is changed into स् by the rule कस्कादिषु च (पा. ८।३।४८) A visarga before क, ख, प and फ is not generally changed into स्, but it is so changed in certain cases such as क: क: कस्क: etc.

प्रपाठापथ:—(1) न चायं त्रिवर्गान् प्रमादयति इत्याह—"असक्तम्" इति। यथा-यथ' यथास्वं 'विभज्य' असङ्कीर्णरूप विविच्य इत्यर्थ.। "यथा-स्वे यथा-यथम्" [पा ८।१।१४] इति निपातनात् द्विर्भावो नपुंसकत्वञ्च। (2) "ह्रस्वो नपुंसके प्रातिपदिकस्य" [पा १।२।४७] इति ह्रस्वत्वम्। पक्षे पात: पक्षपात: आसक्तिविशेष: सम: तुल्य. यस्यां तया 'समपक्षपातया' 'भक्त्या' अनुराग विशेषेण "पूज्येषु अनुराग: भक्ति:" इत्युपदेश:। पूज्यश्च अयं त्रिवर्ग: इति भाव:। असक्तम्

अनासक्तम्, अव्यसनितया इति यावत्। 'आराधयतः' सेवमानस्य 'अस्य' दुर्बोधनस्य त्रयाणां धर्मार्थकामानां गणः 'त्रिगणः'' त्रिवर्गः। "त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः'' इत्यमरः। 'गुणानुरागात्' तदीयगुणेष्वनुरागात्, गुणवद्वाश्रयलोभाद् इत्यर्थः। 'सख्य'' मैत्री' "सख्युर्यः'' [पा० ५।१।१२६] इति य-प्रत्ययः। ईयिवान् उपगतवान् इव इति उत्प्रेक्षा। "उपेयिवान् अनाश्वान् अनूचानश्च" [पा. ३।२।१०९] इति क्वसुप्रत्ययान्तो निपातः। नात्रोपसर्गस्तन्त्रम् इति काशिकाकार आह स्म। 'परस्परं च बाधते' समवर्त्तित्वात् अस्य धर्मार्थ-कामाः परस्परानुपमर्द्देन वर्धन्ते इत्यर्थः। उक्तञ्च—

(4) "धर्मार्थकामाः सममेव सेव्या
यो ह्येकसक्तः स जनो जघन्यः॥" [महा. १२। १६७।४०]

Ghantapha Explained.

(1) Nor does he lapse from the group of three viz. धर्म, अर्थ and काम

(2) The final vowel of a Pratipadika is changed into its corresponding short one in the neuter.

(3) The author of the Kasika said, 'उपसर्ग is not obligatory here'. न चात्रोपसर्गस्तन्त्रम्। अन्योपसर्गपूर्वात् निरुपसर्गाच्च भवत्येव। समीयिवान् ईयिवान्।—काशिका। Cf Bhatti IV, 1 दण्डकारण्यम् ईयिवान् where M observes "उपेयिवान्—" इति क्वसन्तनिपातने उपोपसर्गाभ्यासस्य अतन्त्रत्वात् अन्योपसृष्टोऽनुपसृष्टो वा साधुरेव।

(4) Virtue, wealth and pleasures are to be pursued with equal devotion, he who is particularly attached to any one of these is a scoundrel (This, of course, refers to the गृहस्थ's only.)

The next two lines are

द्वयोस्तु दाक्ष्यं प्रवदन्ति मध्यं
स उत्तमो योऽभिरतस्त्रिवर्गे॥

In the printed Mah b reads ह्येकभक्तः स नरो.

Questions Prose-order. Substance. Carefully note the meanings of प्रसक्तम्, यथायथं, विभज्य, बाधते. Gr N on परस्परम्. Decline ईयिवान् and परस्परम् 2, 4 and 7 neut. परस्परम्—P

Extracts form other commentaries.

त्रिवर्गानुष्ठानरूपं पौरुषं तेन वितन्यते भृत्यादयोऽनुकूल्यन्ते चेत्युक्तम्। तत्र द्विधा शङ्का सम्भवति। यद्यप्यसौ धर्मादीननुतिष्ठति, तथापि तेषु यत्र तस्यादरविशेषः तद्विरोधे सति तदितरयोर्बाधः स्यात्। भृत्यादीनां च त प्रत्यनुरागे सत्यपि नैसर्गिके कृत्रिमे वा विरोधे सति मिथो बाधः स्यादिति द्विप्रकारां शङ्कामपनुदति—प्रसक्तमिति।

त्रयाणां धर्मार्थकामानाम् अनुजीविसुहृद्बन्धूनां पौरजानपदवन्यानां वा गणः सङ्घातः परस्परम् अन्योन्य न बाधते न मृदूकरोति। राजसम्बन्धिनो धर्माद्योऽन्योन्यानुबद्धाः संहता एव पुरराष्ट्रयोगक्षेमरूपमेक प्रयोजन निर्वर्तयन्तीति द्योतयितुं त्रिगण इत्युक्तम्, न तु त्रय इति।

आराधयतः—देवादीनां प्रसादनाय क्रियमाणसपर्यादिसेवाविशेष आराधयतेर्मुख्योऽर्थः। सोऽत्र धर्माद्यनुष्ठाने भृत्यादिसम्भावने चोपचर्यते। धर्माद्यनुष्ठानस्यादरपूर्वकत्वं भृत्यादिसम्भावनस्यानुरागहेतुत्वं च द्योतयितु पश्चात् पठितोऽपि त्रिगणशब्द आराधयतेः कर्मत्वेन विभक्तिविपरिणामेन त्रिगणमित्यनुषज्यते।

विभज्य—सकर्मकत्वाद्धातोर्धर्माद्यनुष्ठानभृत्यादिसम्भावनोचिता देशकालाद्यो विभागकर्मत्वेनाक्षिप्यन्ते।

भक्त्या—ऐहिकामुष्मिकाभ्युदयहेतुत्वप्रतीतिपूर्विका स्नेहबहुमानविश्वासात्मिका देवादिविषया चित्तवृत्तिर्भक्तिः। सेह धर्मादिविषया विवक्ष्यते।

समपक्षपातया—एकप्रकारानुबन्धो सङ्घातः पक्षः। धर्मादिसम्बन्धिषु भृत्यादिसम्बन्धिषु च पक्षेषु स्नेहादिकाया मनोवृत्तेः पातः पक्षपातशब्देनेह विवक्ष्यते। धर्मादिष्वपर्याप्तस्नेहया इत्यर्थः।

अस्य त्रिगणः परस्परं न बाधत इत्येव न, परस्परोपकारी चेत्याह—सख्य-

मेयिवानिवेति । यथा सखायः परस्परमुपकुर्वन्ति तथा धर्मादय इत्यर्थः। अचेतनस्य त्रिगणस्य सख्यप्राप्तेरारोप्यमाणतां द्योतयितुं परोक्षविषयः क्वसुप्रत्ययः प्रयुक्त एयिवानिति ।—CHITRABHANU.

परस्परं न बाधते। ननु "उपेयिवाननाश्वाननूचानश्च" इति निपातनात् उपेयिवानित्येव प्रयोक्तव्यमिति चेन्नैष नियम. । यदुक्तं वृत्तिकारेण,—"न चात्रोपसर्गस्तन्त्रम् अन्योपसर्गान्निरुपसर्गाच्च भवत्येव" इति। तस्मादिदम् आङ्पूर्वस्य इण क्वसौ रूपम्। ननु त्रिगणशब्द त्रिवर्गपदस्य निर्दिश्यन्ते (?)। तथाहि "त्रिवर्गा धर्मकामार्थैश्चतुर्वर्गस्समोक्षकैः" इति। "चतुर्वर्गफलायत्तम्" इति च "त्रिवर्गसारः प्रतिभाति भामिनि" इति च प्रयोगाः, तत् कथमत्र त्रिवर्गो गृह्यते। किञ्च त्रिवर्गस्य मिथस्सख्यमस्त्येव। अधिकरणदोषादेव विरोधिता। तत् कथ गुणानुरागादिव सख्यमित्युच्यते। किञ्च धर्मस्य सर्वकालम्, अर्थस्य समाधि-भोजन-स्त्रीभोगादिव्यतिरिक्तकालम्, कामस्य एककालमेव उपार्जनीयत्वाच्च समपक्षपातत्वेनासङ्गाराधनमप्ययुक्तम्। इति चेत्, सत्यमेतत् एकदोष (एतद्दोष)परिहाराय अर्थान्तर ब्रूम । त्रिगण इति समनन्तरोक्तानान्त्रयाणाम् अनुजीवि-सुहृद्-बन्धूना गण उच्यते। अयमर्थ.—तत्सदृशपक्षपातया भक्त्या मनःप्रीत्या यथोचितम् आराधयत तत्स कुर्वतोऽस्य गुणानुरागादिव सख्यमीयिवान् त्रिगण. परस्पर न बाधते। स्वामिनि प्रीतिमन्तोऽपि बन्धुसुहृदादय कश्चिन्मिथो बाधन्ते। अत्र न तथेत्यर्थः।—MADHAVA

> निरत्ययं साम न दानवर्ज्जितं
> न भूरि दानं विरहय्य सत्-क्रियाम्।
> प्रवर्त्तते तस्य विशेषशालिनी
> गुणानुरोधेन विना न सत्-क्रिया ॥ १२ ॥

Analysis तस्य निरत्ययं साम दानवर्जितं न प्रवर्त्तते—His unobstructed conciliation does not not proceed without gifts. भूरि दानं सत्-क्रियां विरहय्य न प्रवर्त्तते—His abundant gifts are not

unaccompanied by marks of high respect. तस्य विशेष-शालिनी सत्-क्रिया गुणानुरोधेन विना न प्रवर्त्तते—The exceedingly cordial reception he extends to others is not without regard for merit

Prose-Order तस्य निरत्ययम् (निर्बाधम्, अमायिकम्) साम दान-वर्जितं न प्रवर्त्तते , भूरि दानं सत्क्रियां (समादरक्रियां) विरहय्य (विहाय) न प्रवर्त्तते । तस्य विशेषशालिनी (अतिशय-योगिनी) सत्क्रिया गुणानुरोधेन (गुणानुरागेण) विना न प्रवर्त्तते ।

Bengali. তাঁহার অকৃত্রিম মিষ্ট ব্যবহার দানবর্জ্জিত নহে (অর্থাৎ শুধু বাক্যে পর্য্যবসিত নহে * ; কিন্তু মিষ্ট কথার সঙ্গে অর্থাদি প্রদান করিয়া তিনি লোককে বশীভূত করেন) ; প্রভূত দানও সৎকারশূন্য নহে (অর্থাৎ সাদর-সম্ভাষণাদিদ্বারা অত্যন্ত সমাদর প্রদর্শনপূর্ব্বক দান করেন) ; এবং গুণের দিকে লক্ষ্য না রাখিয়া তিনি কাহারও সমাদর করেন না (অর্থাৎ গুণিব্যক্তিরই তিনি সাতিশয় সমাদর করেন ও প্রভূত দানাদি দ্বারা তুষ্টি উৎপাদন করেন) ।

English His spontaneous friendliness is not unaccompanied with gifts nor are his munificent gifts bereft of gracious courtesy, nor is his unlimited courtesy (shown to any) without due merit

Elucidation. The spy now describes to Yudhishthira how skilfully D applies the four political expedients viz. साम (conciliation), दान (gift), भेद (alienation) and दण्ड (punishment). Here he speaks of the first two. D. wins the heart of every one by his policy of conciliation—by the genuine affability of his manners combined with liberal gifts, for sweet words alone without some more tangible form of favour do not always make much impression on

* Cf the Bengali proverb শুধু মিষ্ট কথায় চিঁড়ে ভিজে না ।

people And it must not be supposed that his favour begins and ends with the gifts He extends to them a most cordial reception—treats them with a courtesy that will linger long in their memories and then lavishes gifts on them. Thus he ensures their life-long devotion He, however, does not extend his bounty to, nor does he bestow marks of favour on, everybody without discrimination, for that would mean bankruptcy in no time and also make him out to be a man devoid of all discernment So he shows favour to people with due regard to their merit, i e. it is the meritorious alone that become objects of his munificence and favours.

Word-Notes.

निरत्ययम्—निर्गतः अत्ययः यस्मात् तत् (वस्तु)। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोप । अत्यय —अति + इ + अच् (भावे)। 'एरच्' इति अच्। ["अत्ययोऽतिक्रमे (1) कृच्छ्रे (2) दोषे (3) दण्डेऽपि। अत्यय means (1) अतिक्रम i e उल्लङ्घन—धर्मस्य अत्ययः, (2) कृच्छ्र, as प्राणात्ययः, (3) दोषे यथा—गुणिनां नात्ययं कुर्यात् (4) दण्डे यथा—वाक्पारुष्येऽत्ययः मतम्. Hence निरत्ययं means कालानतिक्रमेण i e 'timely' or निर्दोषम् i e, free from fault or perfect. M, however, explains it both here and under Ki XIII 61 प्रेम कारयति वा निरत्ययम्', as निर्बाधम्. So निरत्ययं साम means "free flow of friendliness"]

सामन्—सो + मनिन् sweet words, honied phrases—

Cf वागनुद्वेगजननी सामेति परिकीर्त्यते।

सामाख्या सूनृते सान्त्वे प्रिये स्तोत्रे च कीर्त्यते ॥ K. N XYI I. 16

दानवर्ज्जितम्—दानेन वर्ज्जितम् (तृया तत्)।

भूरि—भू + क्रिन् (कर्त्तरि)। "भूरि स्यात् प्रचुरे स्वर्णे"—हेमचन्द्रः।

Syn 'प्रभूतं प्रचुरं प्राज्यम् अदभ्रं बहुलं बहु।

प्रचुरं पुरुहू भूयिष्ठं स्फारं भूयश्च भूरि च ॥"—अमर.।

विरहय्य—वि + रह् + णिच् + ल्यप्। (वि + रहि + य = वि + रह् + अय् + य). The इ of णिच् is changed to अय् by the rule ल्यपि

लघुपूर्वात् (पा ६।४।५६ सि. २३३६)। रह=त्यज cf र ह्यतयापदुपेतम् आयति: II. 14.

सत्-क्रियाम्—सत् (अव्ययम्) तस्य क्रिया (६तत्) ताम् , obj. to विरह्य.

विशेष शालिनी—विशेषेण शालते शोभते या सा (बहु) , adj. to सत्-क्रिया.

गुणानुरोधेन—गुणानाम् अनुरोध:, तेन। "पृथग्-विना नानाभिस्तृतीयान्य-तरस्याम्" इति विना-योगे तृतीया। अनुरोध:—अनु+रुध्+घञ् (भावे), regard. "अनुरोधोऽनुवर्त्तनम्"—अमर.।

घण्टापथ:—(1) अथ श्लोकत्रयेण उपाय-कौशलं दर्शयन्, आदौ साम-दाने दर्शयति—"निरत्ययम्" इति। 'तस्य' दुर्योधनस्य 'निरत्यय' निर्बाधम् अमायिकम् इत्यर्थ:। (2) अन्यथा जनानां दुर्ग्रहत्वात् इति भाव'। 'साम' सान्त्वम्। "साम सान्त्वम् उभे समे' इत्यमर। 'दानवर्ज्जित' 'न' 'प्रवर्त्तते' (3) अन्यथा लुब्धादावर्ज्जनस्य शुष्कप्रियैर्वाक्यै दुष्करत्वात्। उक्तञ्च—

लुब्धम् अर्थेन गृह्णीयात् साधुम् अञ्जलि-कर्म्मणा।
मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्॥ [चाणक्यशतक २२]

इति। "तथा" 'भूरि' प्रभूतं न तु कदाचित् स्वल्पम् इत्यर्थ:, दान' धनत्याग:। (4) 'सत्' इत्यादरार्थे अव्ययम्, आदरानादरयो: सद्-असती" [पा १।४।६३] इति निपात-संज्ञास्मरणात्। तस्य क्रियां 'सत्-क्रियां 'विरह्य' "ल्यपि लघुपूर्व्वात्" [पा, ६।४।५६] इति अयादेश.। न प्रवर्त्तते—(5) अनादरे दान-वैफल्यात् इति भाव:। (6) न चैवं सर्व्वत्र तेनाविवेकित्व कोष हानिश्च स्यात् इत्याह—"प्रवर्त्तते" इति। 'विशेष-शालिनी' अतिशय-योगिनी 'सत्क्रिया' आदर-क्रिया 'गुणानुरोधेन' गुणानुरागेण 'विना' 'न' 'प्रवर्त्तते'। (7) "पृथग्-विना—"[पा. २।३।३२] इत्यादिना तृतीया। (1) गुणेषु एव आदरो भूरि दानञ्च इति न उक्तदोषावकाश: इत्यर्थ.।

अत्र उत्तरोत्तरस्य पूर्वं-पूर्वं विशेषणतया स्थापनात् एकावल्यलङ्कार:। तदुक्तं काव्यप्रकाशे [१०।४५]—

श्लाघ्यतेऽपोह्यते वापि यथापूर्वं परं परम् ।
विशेषणतया यत्र वस्तु सैकावली द्विधा ॥

Ghantapatha Explained.

(1) Now, with a view to show his skill in (the application of) political expedients in three verses, first of all [the poet] describes his (policy of) conciliation and (that of) liberality

(2) Otherwise, it is very difficult to win over people i e. if he is not genuinely courteous in his manners but his courtesy is merely simulated, people will find it out sooner or later and become alienated from him.

(3) It is difficult to conciliate the covetous and others by means of sweet but empty words (not tinctured with gold). [Cf fair words butter no parsnips]. It has been said :

One should win over the avaricious man by means of money, a virtuous man by respectful salutation, a fool by humouring him and a learned man by the exact truth

(4) 'सत्' is an indeclinable meaning आदर or 'respect', 'honour', for Panini lays down that सत् and असत् are technically termed गति in the sense of आदर and अनादर respectively. Panini's grammar is regarded as a स्मृति hence the use of the word स्मरणात् [The sutra 'आदरानादरयोः सदसती' does not prescribe निपात-संज्ञा but गति संज्ञा ।]

ल्यपि लघुपूर्वात् (पा. ६।४।५६ सि २३३६) ।

Before ल्यप्, अय् is substituted for णिच् if the vowel preceding the णिच् in the णिजन्त root is short. Thus विगणि + यप् = विगणय्य Similarly, उपरमय्य, अधिगमय्य etc. But समाधार्य because in धारि the णिच् is preceded by the long vowel आ.

(5) For gifts accompanied with slights would be fruitless.

(6) It must not be supposed that this course is followed in every case, for that would argue want of discernment on his part as well as the loss of his treasure, hence the poet says.

(7) पृथग्-विना-नानाभि स्तृतीयाऽन्यतरस्याम् (पा २।३।३२)।

The indeclinables पृथक्, विना and नाना govern तृतीया optionally (अन्यतरस्याम्), i e , they govern २या, ३या and ५मी Logically, they should govern पञ्चमी only, but they govern ३या on the analogy of सह (cf. differ *with*, part *with*) as separation always implies the idea of previous association and २या on the analogy of the कर्म्मप्रवचनीयs &c नाना is an अव्यय in the sense of विना , as, नाना नारीं निष्फला लोकयात्रा.

When each succeeding thing is (i) affirmed (स्थाप्यते) or (ii) denied (अपोह्यते) as an attribute of each preceding thing, the Figure is termed एकावली and it has thus two varieties Here दानवर्जितम् is an attribute to साम , similarly सत्-क्रियां विरहय्य is an attribute to दानम् , गुणानुरोधेन विना is an attribute to सत्क्रिया Hence the fig of speech is एकावली. Cf. II. 32.

The following is an example of the second variety :—

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद् यदलीन-षट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥ Bhatti II 19

N. B. If each preceding object is represented as the *cause* of each succeeding one, the Fig is कारणमाला Cf. Ki II 14, 50. When each preceding object *helps* each succeeding one, the fig of speech is मालादीपक

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म्म इत्येव निवृत्तकारणः ।

गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ॥ १३ ॥

Analysis. Princ Sent स दण्डेन गुरौ सुतेऽपि वा धर्मविप्लवं निहन्ति —he checks violation of duties on the part of an enemy or his own son by means of punishment Adj to सः—(i) वशी—self-controlled, (ii) वसूनि वाञ्छन् न—not desirous of wealth. निवृत्त-कारणः—getting rid of all selfish consideration (of grudge &c) Adj to दण्डेन—गुरूपदिष्टेन—as advised by his judges (who were his superiors) Adv to निहन्ति—न मन्युना—not out of anger, (ii) स्वधर्म इत्येव—simply because it is his duty

Prose-Order वशी स वसूनि वाञ्छन् न मन्युना न, निवृत्तकारणः [सन्] स्वधर्म इत्येव गुरूपदिष्टेन दण्डेन रिपौ सुतेऽपि वा [स्थितम्] धर्मविप्लवं निहन्ति।

Bengali. সেই জিতেন্দ্রিয় রাজা ধনলোভ অথবা ক্রোধের বশবর্ত্তী না হইয়া কেবল কর্ত্তব্যবোধে স্বার্থপর উদ্দেশ্যশূন্য হইয়া বিচারকগণকর্ত্তৃক উপদিষ্ট দণ্ডের সাহায্যে শত্রুগত অথবা পুত্রগত ধর্ম্মব্যতিক্রমের নিবারণ করিয়া থাকেন, অর্থাৎ শত্রু বা মিত্র যে কেহই অধর্ম্মের অনুষ্ঠান করুক না কেন "রাজা আমি, আমার কর্ত্তব্য দুষ্টের দমন ও শিষ্টের পালন" এই কর্ত্তব্যবুদ্ধিপ্রণোদিত হইয়া বিচারকগণের উপদেশ অনুসারে সম্পূর্ণ নিরপেক্ষভাবে দণ্ডবিধান করেন।

English Neither out of desire for wealth nor out of anger, but just because it is his plain duty, self-controlled and unmoved by any (selfish) motive, he smites down (all) transgression of duty, whether by an enemy or by his (own) sons, by means of punishment as laid down by the judge]]

Elucidation With all his senses under perfect control he performs the unpleasant task of punishing offenders. In the matter of awarding punishment he is

never influenced in the slightest degree by considerations of pecuniary gain or private animosity. No doubt he has often to impose fines on criminals, sometimes direct the confiscation of their property to the state, but he is never actuated by this sordid motive He deals out even-handed justice without distinction of age or sex, creed or colour. Whoever is guilty of transgression of his duty—be he friend or be he foe—be he his own son or be he his most implacable enemy—is punished by him, according to the advice of the judge

दण्डो हि केवलो लोकं परं चेमं च रक्षति।

राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः॥ Kautilya III 1.

Word-Notes.

वसूनि—obj to वाञ्छन् 2/1 वसु n [from वस्—to shine, lit. shining, hence excellent, good, hence] good, goods, wealth

Syns. of वसु—द्रव्य वित्तं स्वापतेय रिक्थम् ऋक्थ धन वसु।

हिरण्यं द्रविणं द्युम्नम् अर्थं रै विभवा अपि॥—अमरः।

Diff mean.—देवभेदेऽनले रश्मौ वसु रत्ने धने वसु—अमर.।

वाञ्छन्—वाञ्छ + शतृ 1/1 लङ् अवाञ्छीत्। लिट् ववाञ्छ।

वशी—वश + इनि। वश—self-control.

मन्युना—मन् (दि.-आ)+ यु (उ ३।२०)। '1 mood i e temper of mind, then 2 (like Eng mood) anger, heat of temper" or (the reverse, i e,) depression of spirits चैतौ तृतीया।

स्वधर्म.—स्वः धर्मः. (कर्मधा) or स्वस्य धर्मः: (६तत्)। 'इति' इत्यव्ययेन अभिहितत्वात् प्रथमा।

N B. (1) स्वो ज्ञाता (2)-वात्मनि स्वं (3) त्रिष्वात्मीये (4) स्वोऽस्त्रिया धने स्व is (1) a noun *m* to mean a relative उत्सुकानि इव भान्ति स्वाः (relatives), विद्वान् जनः स्वानां भवति दुःखहा, स्वाय धनं ददाति।

(2) pronoun *n*. to mean 'one's own self' हृदि स्वम् अवलोकयन्।

(3) adj, (declined like a pron) of all three genders to

mean—belonging to one's own self, प्रजाः प्रजाः स्वा इव तन्त्रयित्वा, स्वेषां सुतानां कर्तुभुवो रतीनाम्।

(4) noun, masc or neut. to mean wealth प्रभूतां स्वा न दीयन्ते, प्रभूता. स्वा न भुज्यन्ते, स्वाय यतते दरिद्रः।

The rule स्वम् अज्ञातिधनाख्यायाम् lays down that स्व is a pron except in the senses of ज्ञाति and धन.

इति—हेतौ। See Apte's Guide § 256

रिपौ—अधिकरणे सप्तमी। रिप् (a variant of लिप्)+कु (कर्तरि) originally impostor, cheat, then, foe—Lanman रेपयति इति रिपु. रेपृ गतौ—क्षीरस्वामी। लिम्पत्यसौ आत्मानं पापेन इति रिपुः—दुर्गाचार्यः।

सुते—अधिकरणे सप्तमी। सु+कर्मणि क्त lit generated or given birth to, hence a son, "सुतः स्यात् पार्थिवे पुत्रे स्त्र्यपत्ये तु सुता स्मृता"—Remember पाऽऽर्थिवे तनये सुतः but सूतस्त्वष्टरि सारथौ.

दण्डेन—करणे तृतीया। निहन्ति—नि+हन्+लट् ति। लोट् 2/1 जहि। लुङ् अवधीत्। लिट् 2/1 जघनिथ, जघन्थ। Caus. घातयति। Des. जिघांसति।

धर्म-विप्लवम्—धर्मस्य विप्लवः (ष्तत्) तम्। धृ+मन्—धर्मः: secular and religious duties, laws वि+प्लु+अप् (भावे)—विप्लवः। Obj. to निहन्ति। शेषत्वाविवक्षायां कर्मत्वम्।

Rule : जासि निप्रहण-नाट-क्राथ पिषां हिंसायाम्। (पा २।३।५६)॥

[The object of the roots जासि (caus of जस्), हन् preceded by नि or प्र or प्रणि or निप्र, नाट, क्राथ and पिष् takes षष्ठी if (the कर्म relation is not emphasised, but) relation in general (सम्बन्धसामान्य) is implied, provided that in every case हिंसा is meant] So if the कर्म relation be not emphasised धर्मविप्लवम् would be changed into धर्मविप्लवस्य

घण्टापथः—अथ दण्डप्रकारम् आह—"वसूनि" इति। 'वशी' दुर्योधनः 'वसूनि' धनानि 'वाञ्छन्' 'न'। लोभात् न इत्यर्थः। (1) 'वसु तोये धने मणौ' इति वैजयन्ती। 'निहन्ति' इति शेषः। तथा मन्युना कोपेन न च (2) "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः।

(3) धर्मशास्त्रानुसारेण क्रोध-लोभ-विवर्जितः। [या. स्मृ. १।१]

इति याज्ञवल्क्य-स्मरणात्। किन्तु 'निहत-कारण:' निहतलोभादिनिमित्तः सन् 'मन्युना इवेव' खल राज्ञः यतः ... अधर्मं ... कर्तव्यम् ... एव चैतौ इत्यर्थः।

(4) अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।

अयशो महदाप्नोति नरकं चैव गच्छति॥ [मनु ८।१२८.]

इति स्मरणात् इति भावः। गुरूपदिष्टेन (5) प्राड्विवाकोपदिष्टेन।

(6) धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः।

समाहितमतिः पश्येद् व्यवहारान् अनुक्रमात्॥ [नारद १।१२]

इति नारदस्मरणात्। दण्डेन दमेन शिक्षया इत्यर्थः। 'रिपौ सुतेऽपि वा "स्थितम्" इति शेष.। एतेन अस्य समदर्शित्वम् उक्तम्। 'धर्मविप्लवं' धर्म-व्यतिक्रमम् अधर्मम् इति यावत्। 'निहन्ति' निवारयति। (7) दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुः, न तु सम्बन्ध-निबन्धनः पक्षपातोऽस्ति इत्यर्थ.।

Ghantapatha Explained

(1) The quotation in full is वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ (Quoted by M. from वैजयन्ती under I 46 See I 18, 35, also) वसु: masc. means (1) a deity (2) fire, (3) a ray of light वसु neut. means (1) water, (2) wealth, (3) a gem.

(2) मन्यु means दैन्य (depression of spirit, meanness), क्रतु (a sacrifice) as in शतमन्यु and क्रोध (anger) as here or in I 35. (It also means शोक).

(3) This is the second half of the verse. The first half is

व्यवहारान् नृपः पश्येद् विद्वद्भिर्ब्राह्मणैः सह।

[A king should look after legal matters along with learned Brahmanas] in accordance with the [laws laid down in] the Dharma Sastra and free from anger or avarice

(4) A king who punishes those who do not deserve punishment and does not punish those (really) deserving it acquires great infamy and goes to hell (after death).

(6) [illegible]—[illegible] [illegible] प्राड् [illegible] [illegible] [illegible]
प्राड्विवाकादिना दीर्घं, पक्षपातरहित ।

(6) Placing religious text-books before him and following the advice of the judge, a king should superintend the administration of justice.

(7) It is the wicked who were his enemies and it is the righteous who were his friends, there was no partiality owing to relationship.

Remarks Commentators point out that there is प्रक्रमभङ्ग or absence of symmetry in the first line of this stanza as वाञ्छन् is a present participle whereas मद्यमना is of quite a different type. Cf. Kirat II. 14, III. 40 etc

विधाय रक्षान् परितः परेतरान्
अशङ्किताकारम् उपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात् कृताः
कृतज्ञतामस्य वदन्ति सम्पदः ॥ १४ ॥

English Equivalents रक्षान्—guards परेतरान् (other than the enemy, hence) friendly अशङ्किताकारम्—the appearance of an unsuspicious person. शङ्कित.—suspicious अपवर्ग—completion.

Analysis. शङ्कितः [स.] अशङ्किताकारम् उपैति—Suspicious, he puts on an unsuspicious look How ? परितः परेतरान् रक्षान् विधाय—having stationed all around him (i. e in his own kingdom as well as in that of the enemy) guards who are not unfriendly अस्य सम्पदः कृतज्ञतां वदन्ति—His riches proclaim his gratefulness. How ? क्रियापवर्गेषु अनुजीविसात् कृताः (Adj. to सम्पदः) by being made over to his dependants on the accomplishment of the work.

Prose-Order. अशङ्कितः (अविश्वस्तः) परितः (स्व-पर-सम्पति) परेतरान् (आत्मीयान् hence अवञ्चकान्) रक्षान् (रक्षकान्) विधाय (नियुज्य) अशङ्किताकारम् (विश्वस्ताकृतिम्) उपैति (अधिगच्छति)। क्रियापवर्गेषु (कर्मसमाप्तिषु) अनुजीविसात् कृताः (अनुजीव्याधीनाः कृताः) सम्पदः (धनानि) अस्य कृतज्ञताम् (उपकारज्ञत्वं) वदन्ति (प्रख्यापयन्ति)।

Bengali. দুর্য্যোধন চতুর্দ্দিকে আত্মীয় রক্ষিপুরুষ নিযুক্ত করিয়া অবিশ্বস্ত হইলেও বিশ্বস্তের আকার ধারণ করিয়া থাকেন। আর কর্ম্মসমাপ্তি হইলে তাঁহার সম্পত্তি অনুজীবিগণ কর্ত্তৃক লব্ধ হইয়া তাঁহার কৃতজ্ঞতা খ্যাপন করে।

English Appointing those who are not inimical to himself as his bodygard he achieves the appearance of ease, though (at heart) he is suspicious. And his wealth made over to his attendants on the success of their mission proclaims his gratitude.

Elucidation Duryodhana is in perpetual dread of Yudhishthira, but he does not allow the least indication of fear to escape him Only he, takes all necessary precautions to ensure his own personal safety. He surrounds himself with guards true as steel, and assumes an air of the utmost *sang-froid* and indifference. And when his dependants accomplish their work, he shows his gratitude to them by lavishing rich gifts on them, so they have no cause of being dissatisfied with his service and going over to the enemy.

Word-Notes.

रक्षान्—रक्ष् + पचादित्वात् अच् = रक्ष then 2/3 obj to विधाय.

परेतरान्—(i) परेभ्यः इतरे (५मी तत्) तान् a pronoun , (ii) परान् इतरयन्ति (पर + इतर + णिच् + अच्), noun, obj. to रक्षान्.

अप्रबुद्धिताकारम्—न प्रबुद्धः अप्रबुद्धितः, तस्य आकारः, तम् obj to उपैति.
उपैति – उप + इण् (to go) + लट् ति , लुङ्—उपागात् । Imp. 2/1 उपेहि

अङ्कितः—अङ्क + इतच् । "तदस्य सञ्जातम् तारकादिभ्यः इतच्" (पा. ५।२।३६)—the affix इत (च्) is added to the प्रथमान्त words तारका etc in the sense of अस्य तत् सञ्जातम् , thus तारका सञ्जाता अस्य तारकित नभः, पुष्पाणि सञ्जातानि अस्य पुष्पितस्तरुः. etc. The group तारकादि is an आकृतिगण.

क्रियापवर्गेषु—भावे सप्तमी । क्रियाणाम् अपवर्गाः (६तत्) तेषु । अपवर्ग— अप + वृज् + घञ् (भावे). Completion, fruition "अपवर्गः क्रियासाध्य-फलाप्तौ त्याग मोक्षयोः"—केशव ।

अनुजीवि सात्कृताः –अनु + जीव् + णिनि (कर्त्तरि) – अनुजीविन् । अनुजीविन् + सात् = अनुजीवि + सात् = अनुजीविसात् । [The न् of अनुजीविन् is elided before the affix सात् by the rule नलोपः प्रातिपदिकान्तस्य (८।२।७) –the final न् of a *pada* which is also a *pratipadika* is elided [The word अनुजीविन् is a प्रातिपदिक , it becomes a *pada* when the case-affix is added, and this name *pada* it retains even after the case-affix has been elided] *The* स् *of* सात् *is never changed into* ष् The rule is—सात्-पदाद्योः (पा ८।३।१११)—(1) The स् of सात् and (2) the स् which is initial in a *pada* are not changed into ष् , as, दधि सिञ्चति, अग्निसाद् भवति ।

अनुजीविसात्कृताः—सह सुपा इति समासः, or may preferably be regarded as two separate words

कृतज्ञताम्—2/1 obj. to वदन्ति । कृ + नपुंसके भावे क्तः, कृतम् । कृतं जानाति इति कृत + ज्ञा + कः (कर्त्तरि) कृतज्ञः । तस्य भावः कृतज्ञता ताम् । Or, जानाति इति ज्ञः, कृतस्य ज्ञः कृतज्ञ etc

पदटीपथः—(1) सम्प्रति भेदकौशलं दर्शयति—"विधाय" इति । अङ्का सञ्जाता अस्य 'अङ्कितः' अविग्रहः' 'सन्' 'परित' सर्वत्र स्वपरमण्डले, 'परेतरान्' आत्मीयान्, अवश्यकान् इति यावत् । यद्वा, (2) परान् इतः यन्ति भेदेन आत्म-सात् कुर्वन्ति इति परेतरान्, "तत् करोति" [ग सू २०४] इति व्यन्तात् कर्मणि

ल्यप्-प्रत्ययः। रक्षन्ति इति 'रक्षान्' रक्षकान् [illegible] इत्यर्थः। "नन्दि-ग्रहि—' [पा ३।१।१३४] इत्यादिना पचाद्यच्। 'विधाय' कृत्वा नियुज्य इत्यर्थः। 'अशङ्किताकारम् उपैति'। (3) स्वयम् अविश्वस्तोऽपि विश्वस्तवद् एव व्यवहरन् परसुहृदैव परान् भिनत्ति इत्यर्थः। (4) न च तान् रक्षान् उपेक्षते तेन तेऽपि [illegible] इत्याह—"शङ्कितः" इति। 'क्रियापवर्गेषु' कर्मसमाप्तिषु 'अनुजीविसात् कृताः' भृत्याधीनाः कृताः अपरावर्तितया दत्ता इत्यर्थः। (5) "देये त्रा च" [पा. ५।४।५५] इति साति प्रत्ययः। 'सम्पदः' 'अस्य' राज्ञः 'कृतज्ञताम्' उपकारज्ञत्वं* 'वदन्ति' (6) प्रीतिदानैः एव अस्य कृतज्ञत्वं प्रकाश्यते, न तु वाङ्मात्रेण इत्यर्थः। (7) कृतज्ञे राजनि अनुजीविनः अनुरज्यन्ते, अनुरक्ताश्च तं रक्षन्ति इति भावः।

Ghantapatha Explained.

(1) Of the four political methods साम, दान, भेद and दण्ड, the first two are described in sl. 12 and the last in sl 13 and the king's prosperity arising from the judicious application of these methods in sl. 15 Hence M by turning and twisting the words and expressions tries to read a description of the policy of भेद into sl. 14. But his second explanation of परेतरान् and his explanation अशङ्किताकारम् उपैति as स्वयम् अविश्वस्तोऽपि विश्वस्तवदेव व्यवहरन् परसुहृदैव परान् भिनत्ति are too far-fetched to be acceptable. Again M does not explain why the poet should reverse the accepted order and describe भेद after having described दण्ड. Chitrabhanu holds that भेद is included under साम, दान and दण्ड just as अथर्ववेद is included under the three other वेद's, hence it does not require to be described separately. This is also unsatisfactory. We should remember that we are reading a काव्य and not

---

* A and C read उपकारज्ञत्वम् Others उपकारित्वम्।

a book on the नीतिशास्त्र and should not expect detailed descriptions of each of the four उपाय, six गुण s, three शक्ति's etc

(2) Or, परेतराम् means those who win over the enemy to their side by sowing dissension in the enemy's camp. पर+इतर+णिच्+अच् (कर्तरि). The full rule is तत् करोति तदाचष्टे (ग. सू. २०४) which means the affix णिच् may be employed in the sense of *he does that* or *he says that.* This explanation of M is very far-fetched

(3) Though himself suspicious he behaves like one free from suspicion and thus alienates others through the instrumentality of others.

(4) Nor does he neglect those guards that they might be liable to corruption.

(5) देये त्रा च (पा. ५।४।५५ सि. २१२६)।

तदधीने देये त्रा-प्रत्ययो भवति, चकारात् सातिश्च कृभ्वस्तियोगे सम्पदा च योगे। ब्राह्मणेभ्यो देयम् इति यद् विज्ञातं, तद् यदा तेषां समर्पणेन तदधीनं क्रियते तदा त्रा प्रत्ययः। ब्राह्मणाधीनं देयं करोति ब्राह्मणसात् करोति, ब्राह्मणत्रा करोति। देये इति किम् ? राजसाद् भवति राष्ट्रम्।—काशिका।

In the sense of 'to be given to that' the affix त्रा as well as the affix साति is added to a प्रातिपदिक, in conjunction with भू, अस्, कृ and सम्+पद्. [The previous rules are . (1) विभाषा साति: कात्स्न्र्ये (2) अभिविधौ सम्पदा च—सात् is optionally added like च्वि when the change meant is complete, कृत्स्नं शस्त्रम् अग्नि. सम्पद्यते अग्निसात् भवति (also अग्नीभवति) (3) तदधीनवचने च—सात् also conveys the sense of making over or delivering something to another राजसात् सम्पद्यते, राजसात् करोति &c].

(6) His gratitude was expressed by (tangible) gifts which he made to them as marks of his satisfaction and not by mere empty words (of thanks).

(7) When the king appreciates the service rendered to him, his attendants become devoted to him and being devoted guard him

Extracts form other commentaries.

सुहृन्मध्यस्थशत्रव एव लोके सामाद्युपायविषयाः प्रतीयन्ते, अनुकूलेन प्रतिकूलेन वा कर्मणा तेषां साधनीयत्वेन बाधनीयत्वेन वा प्रतीतेः। उदासीनास्तु प्राप्तसम्बन्धद्वारा स्मृतिपदवीमपि नावतरन्ति तेन तद्विषयस्तस्योपायप्रयोगो न स्यादिति शङ्कां निरस्यति—विभज्य रक्षामित्यादिना। स इति पूर्व्वमनुषज्यते। स परेतराम् उपैति। परेभ्यः शत्रुभ्य इतराम् उदासीनाम् आत्मविषयद्वेषरहिताम् उपैति उपगच्छति। सामाद्युपायैर्वशीकर्तुमिति लभ्यते। परितो रक्षां विभज्य पार्श्वयोः पुरतः पृष्ठतश्च रक्षायै ये विभज्य नियुक्ताः यत्र विधेया रक्षाः तैः सदा क्रियते एवेति द्योतयितुं विभज्य रक्षाम् इत्युक्तं न रक्षिणो विभज्य इति। विभागेन नियमिताः रक्षिणस्तदा तदा तासु तासु दिक्षु तिष्ठन्तो रक्षन्तीति रक्षा स्थिरतरा इति द्योतयितुं 'विभज्य' इत्युक्तं न तु 'विधाय' इति। CHITRABHANU.

भेदमाह—विभज्येत्यादि। परितः सर्वतो रक्षां विभज्य विभागेनावस्थाप्य पराम् अत्र नितरामात्मीयांश्चाशङ्किताकारम् अशङ्किताकृति यथा स्वयमन्तः शङ्कित एवोपैति। भेदकमुखेन भजते। प्रकाशवर्षस्त्वाह—रक्षन्तीति रक्षाः पचाद्यच्। परानितरपक्षानात्मीयान् कुर्वन्ति भेदेन। भेदसामर्थ्यात् परा एव वा इतरे आत्मीयाः येषामिति परेतरा भेदनिपुणाः तान् सर्वान् रक्षकान् विधाय स्वयं शङ्कितो भूत्वाऽशङ्किताकारमुपैति अशङ्कितरूपं भजते। स्वमण्डलपरमण्डलयोर्भेदेषु भीरूपशङ्कितादिषु तान्नियुज्य सशङ्कोऽपि निश्शङ्क इवास्ते इत्यर्थः। — DEVARAJA.

"न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्" इति तस्य आत्मावधानमाह—

विधायेति ॥ असौ राजा मन्त्रितस्मन् परितो रक्षां विधाय परेतरान् [illegible] अमन्त्रिताकारम् उपैति ।* मन्त्रितत्वविश्रामे तेषां विश्वासभङ्गः स्यादिति भीतः अमन्त्रितत्वे चाटुकारी यथा भवति तथा तानुपैति तत्समीपं याति । MADHAVA.

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग् विनियोग-सत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायती-
रुपेत्य सङ्घर्षम् इवार्थसम्पदः ॥ १५ ॥

English Equivalents. अनारतम्—constantly. पदेषु—to the proper cases. सङ्घर्ष—emulation, rivalry. विनियोग—application सत्क्रिया—honour फलन्ति—Bring forth, produce. उपाय—the four political expedients—साम, दान भेद and दण्ड. परिबृंहित—increased आयति—future.

Analysis उपाया अर्थसम्पद्. फलन्ति—the expedients bring forth a rich harvest of prosperity Adj to उपाया—तेन सम्यग् विभज्य पदेषु विनियोग सत्क्रियाः लम्भिताः—which have been granted the favour of being applied after due deliberation to the proper cases. Adj to अर्थसम्पद्.—परिबृंहितायती ever-increasing. Adj 's to फलन्ति—(1) सङ्घर्षम् उपेत्य इव as if vying with one another. (2) अनारतम्—constantly

Prose-Order तेन सम्यक् विभज्य पदेषु (उपायवस्तुषु) विनियोग-सत्क्रिया लम्भिताः उपायाः सङ्घर्षम् उपेत्य इव परिबृंहितायतीः अर्थसम्पदः अनारतं फलन्ति ।

Bengali. বিশেষ বিবেচনাপূর্ব্বক যথোপযুক্ত স্থলে প্রয়োগরূপ সমাদর প্রদর্শিত হওয়ায় সাম, দান, ভেদ ও দণ্ড এই উপায়চতুষ্টয় যেন পরস্পর পরস্পরের প্রতি স্পর্দ্ধাবশতঃ নিরন্তর প্রচুর সম্পৎ প্রসব করে। [অর্থাৎ, দেশকালপাত্র সম্যক্ বিবেচনা করিয়া যে স্থলে যে উপায়ের

প্রয়োগ করা উচিত, তিনি সেই স্থলে সেই উপায়ের প্রয়োগ করেন; উপায়গুলির উপযুক্ত ক্ষেত্রে প্রয়োগই তাহাদের সমাদর। এইরূপে তাঁহার নিকট সমাদর লাভ করিয়া তাহারা যেন রেষারেষি করিয়া কে কত বেশী উপকার করিতে পারে দেখাইবার জন্য নিরন্তর অর্থরাশি প্রসব করে; আর সেই অর্থ ভবিষ্যতে ক্রমশই বৃদ্ধিপ্রাপ্ত হয়।]

English By him are the (four) methods of government (viz. conciliation, bribery, sowing dissension in the enemy's camp and punishment) constantly applied to various objects, each to its proper end, and being, as it were, honoured by the judicious use he makes of them, each vying, as it were, with the others, brings forth prosperity spreading out ever wider in the future.

Elucidation. The prosperity of a king depends to a very great extent on the proper application of the four political expedients, viz. साम, दान, भेद and दण्ड. A king who makes right use of these means cannot fail to gain his ends. Duryodhana pays them the respect of applying them to proper cases, and they highly gratified, as it were, by the signal honour shown to them vie with one another in bringing him prosperity

Word-Notes.

अनारतम्—न आरतम् (आ + रम् + कर्त्तरि क्तः) adv mod उपहिताः रम् is Atm. but is Par. when preceded by वि, आ or परि (व्याङ्-परिभ्यो रमः)। रमते, विरमति ; रेमे, विरराम, अरंस्त, व्यरंसीत्।

तेन—अनुक्ते कर्तरि तृतीया nom to उपहिताः.

यथार्हम्—अधिकरणे ७मी। उपायप्रयोगार्हेषु। सुहृदादिषु उपायविषयेषु।

उपहिताः—उप + धा + कर्मणि क्तः (p. p. adj to उपायाः). The हि (i e ह्) comes in acc. to the rule दधातेर्हिः (पा ७।४।४२)—धा takes

the augment नुम् (i. e. न् after its last vowel) when an affix beginning with a vowel, except शप् and लिट् follows ; लम्भयति, लम्भकः but लभते (शप्), लेभे (लिट्).

विनियोग-सत्क्रियाः 2/3 (i) विनियोगः एव सत्क्रियाः (कर्म्मधा) ताः obj. to लम्भिताः, कर्त्तुरीप्सिततमं कर्म्म इति or (ii) 1/3 विनियोगः एव सत्क्रिया येषां ते adj. to उपायाः

उपायाः—उप + इ + घञ् (भावे) nom to फलन्ति.

परिवृद्धायतीः—2/3 परिवृद्धा (उपचिता) आयतिः (उत्तरः कालः) यासां ताः or याभिः ताः adj to अर्थसम्पदः, having a prosperous future

सङ्घर्षम् (friction, hence rivalry)—सं + घृष् + घञ् (भावे) obj to उपेत्य उपेत्य—उप + इ + ल्यप् (ह्रस्वस्य पिति कृति तुक् इति तकारागमः) ।

अर्थसम्पदः—अर्थानां (धनानां, धर्मविहितकामप्रदानादीनां) सम्पदः (बहुव्रीः) (इतत्) obj. to फलन्ति.

N B (1) उपायाः विनियोग-सत्क्रियाः लम्भन्तः—Non-caus Act

(2) स उपायान् (or उपायैः) विनियोगसत्क्रियाः लम्भितवान्—Caus. Act

(3) तेन उपायाः विनियोगसत्क्रियाः लम्भिताः—Causal Pass Thus we see उपायाः which was the nom in the non-caus. form takes the 2nd or 3rd case ending according as we regard लभ् as primarily a verb of motion or not. In the present case, however, उपायाः (irrespective of its विभक्ति in the caus) takes प्रथमा acc to the dictum "बुद्धि-भक्षार्थयोः शब्दकर्म्मणां च निजेच्छया । प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ॥" So the question as to whether in the causal form the प्रयोज्य of लभ् should take द्वितीया or तृतीया hardly arises here. (See under II 57)

चपटापथः—(१) अथ उपायप्रयोगस्य फलवत्तां दर्शयति—"अनारतम्" इति । 'तेन' राज्ञा दुर्योधनेन 'पदेषु' उपाय-वस्तुषु । (२) "पदं व्यवसित-त्राण स्थान लक्ष्माङ्घ्रि-वस्तुषु" इत्यमरः । सम्यक् (३) असङ्कीर्णम् अवधानं च

र्थिकत्वं विविच्य। विनियोग एव सत्क्रिया अनुग्रहः—सत्कार इति यावत्,
ता: [विनियोग सत्क्रियाः] 'लक्षिताः' स्थानेषु सम्यक् प्रयुक्ता इत्यर्थः। (4)
उपायविशेषणं वा। 'उपायाः' सामादयः 'सङ्कर्षे' परस्पर-सम्बन्धम् 'उपेत्य इव' इति
उत्प्रेक्षा। 'परिवर्धितायतीः' प्रवर्धितोत्तरकालाः, स्थिरा इत्यर्थः। 'अर्थसम्पदः'
'अनारतम्' अजस्रं 'फलन्ति' प्रसुवते इत्यर्थः।

Ghantapatha Explained

(1) Now he shows the efficacy of the (right) application of the political expedients,

(2) पद means (a) Industry, (b) Defence, refuge, पदम् आपदि माधवः (c) Place, portion, station, abode, receptacle, अपदे शङ्कितोऽस्मि, अविवेकः परमापदां पदम्, अगरीयान्न पदं नृपश्रियः hence dignity, rank यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः (d) Mark, नवनखपदलेखालाञ्छित बाहुमूलम् (e) Foot, अपथे पदम् अर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः and (f) Thing, matter, occasion subject, as here, or व्यवहारपदं हि तत् or सतां हि सन्देहपदेषु वस्तुषु etc.

(3) So that there might be no confusion i e, many may not be employed where one is necessary nor one be employed where more are required

(4) Or, विनियोग-सत्क्रियाः may be construed as an adj. to उपायाः (i. e. विनियोग-सत्क्रियाः उपायाः तेन पदेषु लक्षिताः)।

अनेक-राजन्य-रथाश्व-सङ्कुलं
तदीयमास्थाननिकेतनाजिरम्।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायन दन्तिनां मदः॥ १६॥

English Equivalents· राजन्य—prince सङ्कुल crowded with आस्थान-निकेतन—court-room, अजिर—court-yard अयुगच्छदगन्धिः—

smelling like the Saptaparna tree. अयुग्म—not even i. e. odd. छद—leaf. उपायन—present. दन्तिन्—elephant, tusker मद—ichor भृशम्—adv extremely, excessively.

Analysis. नृपोपायनदन्तिनां मद तदीयम् आस्थाननिकेतनाजिरं भृशम् आर्द्रतां नयति—the ichor of the elephants presented to him by kings makes the courtyard in front of his audience hall excessively wet Adj. to मदः—अयुग्मच्छदगन्धि fragrant like the flowers of the Saptaparna tree Adj to आस्थाननिकेतनाजिरम्—अनेकराजन्यरथाश्वसङ्कुलम्—thronged with the chariots and horses of many princes.

Prose-Order अयुग्म-च्छद-गन्धि, नृपोपायन दन्तिना मदः अनेक-राजन्य-रथाश्व सङ्कुलं तदीयम् आस्थान-निकेतनाजिर भृशम् आर्द्रतां नयति।

Bengali. কত রাজা দেয তাঁরে গজ উপহার
সপ্তপর্ণ-বাস-যুত গজ-মদ-ধার
করিছে পঙ্কিল তাঁর সভার প্রাঙ্গণ
বহু রাজ-রথ-অশ্বে ব্যাপ্ত অনুক্ষণ॥"—নবীনচন্দ্র

English. The ichor of elephants presented to him by kings fragrant as the flowers of Saptaparna makes excessively wet the courtyard in front of his audience hall, which is crowded with horses and chariots of numerous princes.

Elucidation You can form some idea of his wealth and splendour, power and magnificence if I simply describe to you the condition of his courtyard. It was a grand sight—the spacious courtyard in front of his audience-chamber. On one side there is a solid mass of horses sad chariots belonging to the numberless princes who have come to pay their respects to him, on the other there is a number of elephants—not one or two, but sufficient in number to

make the whole of the spacious courtyard most slippery with the ichor exuded by them. And these first-rate elephants are his property now, being presented to him by various kings.

Word-Notes.

[Acc. to Jumaranandin and Goyichandra of the Sankshiptasara school, such forms as अनेके, अनेकेषाम् &c., are grammatically indefensible. Jumaranandin goes so for as to suggest that in भवन्तानेके जलधेरिवोर्मयः [Kirat. XIV. 61] the reading अनेके is incorrect, and that we should read असंख्याः for अनेके (Vide वृत्ति and टीका under सुबन्तपाद सूत्र ६ and the commentary on the first sutra of the Samasapada).

The difficulty is this If we regard अनेक as a नञ् तत्पुरुष compound, it is a pronoun, no doubt, but it cannot be used in the plural no for in a तत्पुरुष, the last member is prominent and here the last member being एक meaning 'one' cannot take the विभक्ति of the बहुवचन, if on the other hand, we regard it as a बहुव्रीहि compound न एकः एकत्वं यत्र (taking एक to mean एकत्व as in the rule द्व्येकयोर्द्विवचनैकवचने (पा० १।४।२२), it is no longer a pronoun, एक having lost its pronominal character being a subordinate member of the compound (acc. to rule न बहुव्रीहौ 1. 1. 29 or the Varttika संज्ञोपसर्जनीभूतास्तु न सर्वादयः) ।

To justify such uses as—भवन्तानेके जलधेरिवोर्मयः (Ki XIV.61), अनेके सेवन्ते भवद्धिकगीर्वाणनिवहाः (Karpurastotram), प्रवृत्तिभेदे प्रयोजकं चित्तम् अनेकेषाम् (Patanjala Sutra IV 5) &c some propose to treat अनेक as a तत्पुरुष compound the final component एक meaning भवत्. Hence there is no difficulty in adding the plural terminations to the word.

The above solution is too artificial to be acceptable to scholars. In all cases of difficulties the most natural

explanation is the best. अनेक is evidently a नञ् तत्पुरुष compound and inasmuch as it denotes a plurality of things it is naturally plural. We have already pointed out that acc. to Sanskrit grammarians a comp. does not merely express the meaning of the separate words but something in addition also, in other words a समास has a विशिष्टशक्ति Hence there is no difficulty in adding plural terminations to अनेक as distinct from एक When, however, we come across अनेक used in the singular as, अनेकमन्यपदार्थे (पा. २।२।२४), अनेकम् आश्रित विश्रम् (सांख्यकारिका १०) आकाशमेकं हि यथा घटादिषु पृथक् भवेत्। तथात्मैकोऽप्यनेकश्च (याज्ञवल्क्य), we must regard them as Bahuvrihi compounds. Hence Pandit Taranath Tarkavachaspati remarks · न एकः एकभिन्नतया तत्सर्वत्र बहुवचनान्तता। * * * एकशब्दस्य सर्व्वनामत्वेन नञ् तत्पुरुषे तद्भिन्नवाचकतया गौणत्वेऽपि अतद्वत् सर्व्वनामकार्यम्, तेन अनेके इति, अनेकेषाम् इति अनेकस्मै इत्यादि। * * * नास्ति एक. "द्व्येकयोर्द्विवचनैकवचने" (पा १।४।२२) इतिवत् एकत्वं यत्र इति बहुव्रीहौ अनेकशब्दस्य एकवचनान्ततापीष्यते। अनेकम् अन्यपदार्थे इति पा. सू etc

[For the two views on the subject, the curious student is referred to वैयाकरणभूषण and its सार Karika 41

"कथं तर्हि 'पतन्त्यनेके जलधेरिवोर्मयः' इति ? अत्राहुः—अध्यारोपितैकत्वानां प्रकृत्यर्थतया तत्र वास्तवबहुत्वाभिप्रायं बहुवचनं न विरुध्यते। अनेकश्च अनेकाश्च अनेकश्च इत्येकशेषो वा"—शब्दकोस्तुभ under १।२।६४· See also दुर्घटवृत्ति p, 34.]

अनेक etc —न एकः अनेके, अनेके राजन्याः (कर्म धा.), तेषां रथाश्च (६तत्), तेन सङ्कुलम् (३तत्), रथाश्च अश्वाश्च रथाश्वम् (समा द्वन्द्व) सेनाङ्गत्वात् एकवद्भावः।

राजन्य—राजन् + यत् (अपत्यार्थे)। "राज श्वशुराद् यत्।"

तदीयम्—तस्य इदम् "वृद्धाच्छ." इति छ-प्रत्यय. adj to आस्थानमिकेतनाजिरम्.

आस्थान etc —आस्थानस्य (सभायाः) निकेतनम् (गृहं), तस्य अजिरम्।

आस्थानम्—आसिष्ठन्ति अस्मिन् आ + स्था + ल्युट् (अधिकरणे), निकेतनम्

—नि + विष् (निवासे) + घुष् (अधिकरणे)। अजिरम्—अज् (गतौ) + किरच् (अधिकरणे)। "अङ्गनं चत्वराजिरे"—अमरः।

Syn (1) समज्या परिषद् गोष्ठी सभा-समिति-संसदः।

आस्थानी क्लीवम् आस्थानं स्त्री-नपुंसकयोः सदः॥

(2) गृहं गेहोदवसितं वेश्म सद्म निकेतनम्।

निशान्त-पस्त्य-सदन-भवनागार--मन्दिरम्।

गृहाः पुंसि च भूम्न्येव निकाय्य-निलयालयाः॥

अयुग्मच्छद-गन्धि.—न युग्माः अयुग्माः (not even, odd), अयुग्माः (सप्त) छदाः पर्णानि पर्वसु यस्य इति अयुग्मच्छदः। "सप्तपर्णो विशालत्वक् शारदो विषमच्छदः।" "सङ्ख्यायच्छदस्य वृत्तिविषये वीप्सार्थत्वं सप्तपर्णादिवत्" इत्युक्तं भाष्ये। अयुग्मच्छदस्य पुष्पम् इति अयुग्मच्छदम्। "पुष्पमूलेषु बहुलम्" इति तद्धितलुक्। "द्वितीयं प्रसवे सर्वम्" इति नपुंसकलिङ्गम्। अयुग्मच्छदस्य गन्धः अयुग्मच्छदगन्धः अयुग्मच्छदगन्धः इव गन्धः यस्य सः (उपमानपूर्वपदो बहुव्रीहिः)। "उपमानाच्च" इति समासान्त इकारः। छदः—छद (with or without णिच्) + घ।

आवृतां—indirect object of नयति.

नृपोपायनदन्तिनाम्—नृपाणाम् उपायनानि (६तत्), तानि एव दन्तिनः, तेषाम्।

मदः—मद् + अप् (मदोऽनुपसर्गे ३।३।६७)। "मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः"—मेदिनी।

घण्टापथः—अर्थ-सम्पदम् एव आह—"अनेक" इति। अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्य असौ 'अयुग्म-च्छदगन्धिः'। (1) "सप्तम्युपमान—' इत्यादिना बहुव्रीहिः उत्तरपदलोपश्च। "उपमानाच्च"[पा ५।४।१३७] इति समासान्त इकारः। नृपाणाम् उपहारभूताः ये दन्तिनः तेषां नृपोपायनदन्तिनां मदः। "उपायनम् उपग्राह्यम् उपहारस्तथोपदाः" इत्यमरः। राज्ञाम् अपत्यानि पुमांसः राजन्याः क्षत्रियाः। (2) "राजश्वशुराद् यत्" [पा. ४।१।१३७] इति यत्-प्रत्ययः, राज्ञोऽपत्ये जातिग्रहणात् *। रथाश्च अश्वाश्च, रथाश्वं, (3)

---

* This is the reading in B A. reads जातिग्रहणाद् वः Madanapala's ed. has जातिग्रहणात् साधु. N. S, Press has जातिग्रहणादम्

सेनाङ्गत्वाद् एकवद्भावः। अनेकेषां राजन्यानां रथाश्वेन सङ्कुलं व्याप्तम् [अनेक-राजन्य-रथाश्व-सङ्कुलं] 'तद्गौरवम्' 'आस्थान-निकेतनाजिर'' सभामण्डपप्राङ्गणम्। (4) 'अङ्गणं चत्वराजिरे'' इत्यमर। 'भ्रमम्' अत्यर्थम् 'आर्द्रतां पङ्किलत्वं (5) नयति। (6) एतेन महासमृद्धिः अस्य उक्ता। अत एव उदात्तालङ्कारः। तथा चालङ्कारसूत्रम्—"समृद्धिमद्-वस्तु-वर्णनम् उदात्त." [A S. 80].

Ghantapatha Explained.

(1) The rule is—

सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च वक्तव्यः* (पा. २।२।२४ वा)।

When the पूर्वपद of a बहुव्रीहि consists of two parts of which the first is in the locative case or an उपमान, the second member of the पूर्वपद is dropped As, कण्ठेस्थः कालः अस्य, Here the उत्तरपद 'स्थ' of the पूर्वपद is dropped and the comp. becomes कण्ठेकाल. Similarly in अयुग्मच्छदगन्ध इव गन्धः यस्य स., अयुग्मच्छद is the उपमान and its उत्तरपद 'गन्ध' is dropped.

Thus we get अयुग्मच्छदगन्धः. A समासान्त 'इ' is now added by the rule उपमानाच्च which means that गन्ध at the end of a Bah. Comp preceded by an उपमान takes the समासान्त affix इ.

(2) **राज-श्वशुराद् यत्** (पा ४।१।१३७ सि ११५३)।

The तद्धित affix यत् is added to राजन् and श्वशुर in the sense of अपत्य The scope of this rule is restricted by the varttika—जातावेव इति वाच्यम् which lays down that यत् will be be added to राजन् in the sense of the descendant, only when the word

* सप्तम्यन्तं पूर्वपदं यस्य उत्तरपदस्य तत् सप्तमीपूर्वपदम्, तस्य परेण पदान्तरेण समासो भवति। तस्य च सप्तम्यन्तपूर्वपदस्य उत्तरपदलोपो भवति। कण्ठेस्थ. कालः अस्य इति कण्ठेकालः। उपमानं पूर्वपद यस्य उत्तरपदस्य तत् पदान्तरेण समस्यते तस्य उपमानपूर्वपदस्य उत्तरपदलोपो विधीयते। उष्ट्र-मुखम् इव मुखम् अस्य उष्ट्रमुख.। अत्र उष्ट्र उपमानं पूर्वपदं मुखस्य। ननु च उष्ट्रमुखम् उपमानं देवदत्तमुखस्य, न तु उष्ट्र.। उपमानावयवत्वात् उष्ट्रोऽपि उपमानमुच्यते इत्यदोषः।—न्यासः।

so formed denotes a caste. Hence राजन्य means a Kshatriya (क्षत्रियात् क्षत्रियायां सवर्णायाम् उत्पन्नः राजन्यः, क्षत्रियात् शूद्रायां वा तदन्यस्यां वा असवर्णायाम् उत्पन्नः राजनः ।) Hence अमर gives this as a synonym of क्षत्रिय—"मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्."

Thus we have राजन् + यत्. Now the टि portion (i e अन्) of राजन् would be elided acc to the rule नस्तद्धिते (पा ६।४।१४४ सि. ९७९) which means that the टि portion of a stem ending in न् and technically known as 'bha' * is elided before a तद्धित affix. In the present case, the elision is barred by the rule ये चाभाव-कर्मणोः (पा ६।४।१६८ सि. ११५४)—अन् remains unchanged before a तद्धित beginning with य, except in the sense of भाव or कर्म Hence राज्ञः अपत्यं पुमान् राजन्यः but राज्ञः भावः कर्म वा राज्यम् Similarly, सामसु साधुः सामन्यः, ब्रह्मणि साधुः ब्रह्मण्यः &c.

(3) द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम् (पा २।४।२ सि ९०६)।

A द्वन्द्व comp. too is singular in number when it is composed of words (1) signifying limbs of an animal, (2) members of a band of players (or singers or dancers) and (3) component parts of an army, as, दन्तोष्ठम्, मार्दङ्गिक-पाणविकम् and (रथाश्च अश्वाश्च) रथाश्वम्. In the case of सेनाङ्ग the comp. will be sing only when the components denote a plurality of things. Thus रथश्च अश्वश्च अश्वरथौ.

(4) प्राङ्गण, चत्वर and अजिर are synonymous.

(5) All this shows the prosperity of the king Hence the Fig of speech is उदात्त Says the Alankarasutra: The description of eminently prosperous things constitutes Udatta (Cf Bhatti V 47, X 52). There is a second variety of the Udatta which consists in the description of the actions

---

* यचि भम्—Before य or a vowel of a तद्धित-affix, a प्रातिपदिक is regarded as a भ and not as a पद.

of the great which are subordinate to the matter in hand. (' अङ्गभूत-महापुरुष-चरित वर्णनं च '—प्रकाश-सूत्रम्) ।

"What distinguishes उदात्त from भाविक and स्वभावोक्ति is that in the two latter, things are described as they are, while in उदात्त (1st variety) the poet gives an imaginative description of an object as possessed of prosperity beyond the experience of man"

Remarks The ichor of elephants plays an important part in Sanskrit poetry Elephants in a condition of sexual excitement exude a dark perfumed juice from their temples,* the smell of which, like that of musk in the case of the musk-deer attracts the female of the species. The fragrance is said to be similar to that of powdered cardamoms or the flowers or the exudation› of the Saptaparna tree. (Cf Raghu IV 23, 47 , V 48 , Sis VI. 50 etc) Saravali quotes from the उत्पलिनी—

मदाः स्युर्भद्रजातीनां सप्तच्छदसुगन्धयः ।
तानाघ्राय पलायन्ते महान्तोऽपि विषाणिनः ॥

सुखेन लभ्याः दधतः कृषीवलै-
रकृष्टपच्या इव सस्य-सम्पदः ।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन् कुरवश्चकासति ॥ १७ ॥

English Equivalents कृषीवल—peasant अकृष्टपच्या—growing spontaneously on uncultivated soil. अ-देव-मातृका—not having the rain-god as their mother i e not depending on timely rainfall for crops bnt amply furnished with artificial means of irrigation सस्य सम्पदः—wealth of crops

---

* करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः । करात् = नासारन्ध्राभ्याम् —two pores on their fore-head

Analysis. चिराय तस्मिन् क्षेमं वितन्वति, कुरवः चकासति Adj to. कुरवः—(1) अदेवमातृकाः (2) सस्यसम्पदः दधतः। Adj. to सस्यसम्पदः—कृषीवलैः सुखेन लभ्याः hence अकृष्टपच्या इव।

Prose-Order. चिराय तस्मिन् क्षेमं वितन्वति [सति] अ-देव मातृकाः कुरवः, अकृष्टपच्या इव कृषीवलैः (कर्षकैः) सुखेन लभ्याः सस्य-सम्पदः दधतः [सन्तः] चकासति (शोभन्ते)। We may construe चिराय with चकासति also.

Bengali, "নদী কূপ আদি শুভ সাধনে তাঁহার
দেবেতে নির্ভর বিনা এবে কুরুদেশে
কৃষক লভিছে শস্য সুখেতে অপার
বিনা কৃষি যেন শস্য বাড়ে অনায়াসে।
অর্থাৎ দুর্য্যোধন কৃষিকার্য্যের উন্নতির জন্য খাল ও কূপ ইত্যাদি খনন করাইয়াছিলেন"। নবীনচন্দ্র।

English He hath stretched forth his protecting arm and the lands of the Kurus have long been smiling with crops, rich as on a virgin soil, gathered by the cultivators with no effort, nor needing the nourishing streams of heaven

Elucidation Ill fares the land in which the peasantry is entirely at the mercy of the fickle rain-god for the nourishment of its crops Bent on promoting the well being of his subjects, D. takes steps to make the land of the Kurus independent of the whims and caprices of the rain-god by sinking wells, constructing canals &c. Kuruland has thus become a stranger to drought and this is reflected in the rich harvest of crops growing luxuriantly, as it were, requiring no efforts on the part of the cultivators, and waiting to be reaped by them Under his beneficent rule the Kuru territories are smiling with prosperity.

दण्डनीत्यां यदा राजा सम्यक् कार्त्स्न्येन वर्तते।
अकृष्टपच्या पृथिवी भवत्योषधमालिनी॥ महा. १२।६९।८०, ८१।

Word-Notes.

सुखेन—अनतिप्रयत्नेन, with (comparative) ease प्रकृत्यादित्वात् तृतीया।

लभ्याः—लभ्+यत् (कर्मणि) "पोरदुपधात्" इति यत्. adj. to सस्य-सम्पद: Its nom. is कृषीवलैः.

दधतः—धा+शतृ 1/3 adj. to कुरव. "नाभ्यस्ताच्छतुः" इति नुमभावः। कृष्+इक् ("इक् कृष्यादिभ्यः" पा ३।३।१०८ वा.)—कृषिः। कृषि+वल (रजः-कृष्यासुति-परिषदो वलच्)=कृषीवल। "वले" इति दीर्घः। "क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः"—अमरः। अनुक्ते कर्त्तरि तृतीया nom. to लभ्याः

अकृष्टपच्या—ripening in uncultivated land, growing of themselves कृष्टे स्वयमेव पच्यन्ते इति कृष्टपच्या. (कृष्ट+पच्+कर्मकर्त्तरि क्यप्)। न कृष्टपच्या अकृष्टपच्याः, adj to सस्य-सम्पदः.

सस्यसम्पदः—सस्यानां (व्रीहि यव गोधूमादीनां) सम्पदः (प्राचुर्यम्,) ष तत्. obj to दधतः। सस्य—सस् (हिंसायाम्)+यत् (कर्मणि)। सम्पत्—सम्+पद्+क्विप् (भावे)

वितन्वति—वि+तन्+शतृ 7/1, nom तस्मिन्, obj. क्षेमम्

क्षेमम्—क्षि+मन् (कर्त्तरि)। obj to वितन्वति, "श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्। भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्॥"—अमरः।

अदेव-मातृका.—देवः (पर्ज्जन्यः) माता येषां ते देव मातृका. (बहु)। न देव मातृकाः (नञ् तत्)। "यत्र सेतुबन्धनप्रायत्वाद् वर्षनिरपेक्षा सस्यनिष्पत्तिः" —Sankararya under K N IV. 50. The समासान्त 'क' has been added acc. to the rule—नद्यृतश्च i e a बहुव्रीहि comp. ending in a word technically termed नदी (i e. roughly speaking a fem word ending in ई or ऊ declined like नदी or वधू) or a word ending in ऋ admits the समासान्त affix क, as विपत्नीकः, मृतवत्सकः, विगतपितृकः, etc Here the बहुव्रीहि comp. देवमातृ ends in the ऋकारान्त word मातृ and hence gets क

चिराय—*indecl*, 'for a long time अत्यन्तसंयोगे द्वितीया। "चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः"—अमरः।

तस्मिन्—"यस्य च भावेन भाव-लक्षणम्" इति सप्तमी।

कुरवः—कुरूणां निवासः इति कुरु+अण्। 'जनपदे लुप्' इति अणो लुप्। जनपदवाचित्वाद् बहुत्वम्।

Cf. ऋक्ता: कथं ऋक्ता: कथय ... देयात् ।
कीदृक् ... कोऽपि न जिज्ञासति लोक: ॥

चकासति—चकास् + लट् 3rd pl , nom. कुरव:. चकाधि, चकाद्धि Imp.

घण्टापथ:—सम्प्रति जनपदक्षेम-करत्वम् आह—"सुखेन" इति । 'चिराय 'तृप्तिम्' इत्यर्थे 'क्षेमं वितन्वति' क्षेमङ्करे सति । देव: पर्जन्य एव माता येषां ते देवमातृका:, ते न भवन्ति इति 'अदेवमातृका:' नदीमातृका: इत्यर्थ: ।

(1) 'देशो नद्यम्बु-वृष्ट्यम्बु-सम्पन्न-व्रीहिपालित: ।
स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥

इत्यमर: । (2) एतेन अस्य कुल्यादि-पूर्त्तप्रवर्त्तकत्वम् उक्तम् । कुरवो निवास. कुरव: जनपदविशेष: । कृष्टे * पच्यन्ते इति कृष्टपच्या: । (3) "राजसूय—" [पा ३।१।११४] इत्यादिना कर्म्मकर्त्तरि क्यप्-प्रत्ययान्तो निपात । तद्विपरीता. 'अकृष्टपच्या.' 'इव' । कृषि: एषाम् अस्ति इति 'कृषीवलै:' कर्षकै: इत्यर्थ. । (4) "रज. कृषि—" [पा ५।२।११२] इत्यादिना वलच् प्रत्यय. । (5) "वले" पा ६।३।११८] इति दीर्घ: । 'सुखेन' अक्लेशेन 'लभ्या' लब्धुं शक्या: 'सस्य-सम्पद:' इवत.' धारयन्त: । (6) "नाभ्यस्ताच्छतु" [पा ७।१।७८] इति नुमागमप्रतिषेध । 'चकासति' सर्व्वोत्कर्षेण वर्त्तन्ते इत्यर्थ. । (7) 'अदभ्यस्तात्' [पा. ७।१।४] इति झे: अदादेश. । (8) "जक्षित्यादय. षट्" [पा ६।१।६] इति अभ्यस्त-संज्ञा । (9) सम्पन्नजनपदत्वात् असन्तापकरत्वाच्च दु:साध्योऽयम् इति भाव: ।

Ghantapatha Explained.

(1) A country which is sustained by paddy (grain) fed with rain-water is known as देवमातृक , and one sustained by grain fed with river water is known as नदीमातृक.

(2) By this epithet is expressed the fact of his

---

* कृष्टेन पच्यन्ते—All. But the न is evidently due to a scribe who probably wanted to express the meaning of the negative prefix by this न.

excavation of channels and such other methods of irrigation (पूर्त्त is thus explained : पूर्त्तं खातादिकर्म्म च). Manu describes पूर्त्त thus—वापीकूपतडागानि देवतायतनानि च। अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते ॥ Manu Samhita IV, 226.

(3) It has been formed irregularly by the addition of the affix क्यप् in the कर्म्मकर्त्त वाच्य acc to the rule :

"राजसूय-सूर्य्य-मृषोद्य रुच्यकुप्य कृष्टपच्या-व्यथ्याः (पा ३।१।११४ सि. २८८६) ।

The seven forms राजसूय, सूर्य्य, मृषोद्य, रुच्य, कुप्य, कृष्टपच्य and अव्यथ्य are irregularly formed by the addition of the suffix क्यप् राजसूय—राजन् + सू + क्यप् (कर्म्मणि or अधिकरणे) । सूर्य्य—सृ or सु + क्यप् (कर्त्तरि) । मृषोद्य—मृषा + वद् + क्यप् (भावे) and not यत् not which is optional रुच्य—रुच + क्यप् (कर्म्मणि) that which is pleasing कुप्य—गुप् + क्यप् (कर्म्मणि) = wealth other than gold aud silver, otherwise गोप्यम् कृष्टपच्य—कृष् + पच् + क्यप् (कर्म्म-कर्त्तरि) । अव्यथ्य—नञ् + व्यथ् + क्यप् (कर्त्तरि) that which does not give pain

(4) The full rule is .

रजःकृष्यासुतिपरिषदो वलच् (पा ५।२।११२ सि १८१९) ।

वल (च्)is added in the sense of मतु, to रज., कृषि, आसुति (distilling, cf आसव) and परिषत्. रजस्वला स्त्री, कृषीवलः आसुतीवल. ((शौण्डिक.) । परिषद्वल राजा ।

(5) वले before the affix वल the final short vowel of a प्रातिपदिक is lengthened आसुतीवल., दन्तावल. (an elephant) &c.

(6) नाभ्यस्ताच्छतुः (पा ७।१।७८ सि ४२७) ।

The affix शतृ does not take the augment नुम् (i e न् after its last vowel) after a reduplicate stem. Thus ददत्, दधत्, जाग्रत् &c, but गच्छन्, भावन्, कुर्वन् etc.

[This is an exception to the rule उगिदचां सर्व्वनामस्थानेऽधातोः (पा. ७।१।७० सि २८१)—whatever has an indicatory उ (मतु, ईयसुन् e c) ऋ (शतृ) and ऋ with the exception of a root,

and the stem अच् (अचति) get the augment नुम् in the strong cases (i e in सु, औ, जस्, अम् and औ)]

(7) Acc to Panini the 3rd pl termination is *jhi*, the *jh* of which is changed generally into *ant* by the rule झोऽन्तः but into *at* in the case of reduplicated roots by the rule अदभ्यस्तात्

(8) Now चकास् though not a reduplicated root is to be regarded as such acc. to the rule जक्षित्यादयः षट् which lays down that जक्ष् and the six roots following it (i e जक्ष्, जागृ, दरिद्रा, चकास्, शास्, दीधी and वेवी)* are technically termed अभ्यस्त reduplicated Hence चकास् + झि = चकास् + अत् + इ = चकासति (and *not* चकासन्ति) ।

(9) His prosperous dominions and his benevolent nature render him all but invincible.

उदारकीर्त्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

Analysis· मेदिनी वसूनि स्वयं प्रदुग्धे—The earth of herself yields treasures. Is it through fear ? No. अस्य गुणैः उपस्नुता—melted, as it were, by his excellences. What are his peculiar excellences that have won the heart of even the inanimate earth ? Adj s to अस्य—(1) दयावतः—his heart is full of the milk of human kindness, (2) उदयं दिशतः—he confers prosperity. How ? अभिरक्षया by extending his beneficent protec-

* Western grammarians, however, regard all these roots as really reduplicated जक्ष् from घस्, जागृ from गृ, दरिद्रा from द्रा, चकास् from कास्, शास् from probably a contracted reduplicated stem of शंस् &c

tion all round. Is this prosperity merely transitory or is it free from all attendant evils and consequently of enduring prospect? प्रशान्तबाध—all obstacles to which have been removed for good, (3) उदारकीर्त्ति.—his fame has spread far and wide, and lastly वसूपमानस्य he was not indigent, he was as rich as Kubera himself.

Prose-Order उदारकीर्त्तिः दयावत, प्रशान्तबाधम् अभिरक्षया उदयं दिशत, वसूपमानस्य अस्य गुणैः उपस्नुता (द्राविता) मेदिनी स्वयं वसूनि प्रदुग्धे।

Bengali. মহাযশা, দয়ালু, সমস্ত উপদ্রবনিবারণপূর্ব্বক (প্রজা-পুঞ্জের অথবা রাজ্যের) অভ্যুদয়সাধনে তৎপর, কুবেরসদৃশ (ধনবান্) দুর্য্যোধনের গুণগ্রামদ্বারা দ্রবীভূত হইয়া পৃথিবী স্বয়ংই তাঁহাকে বসুসম্ভার প্রদান করিতেছে।

English Famed far and wide, and tender-hearted, under his all-fostering care he guides his people on to unbroken prosperity and the Earth touched by these (royal) quatilies, herself pours forth her treasure for him, a very God of Plenty

Elucidation. Duryodhana is possessed of all the excellences that a king might covet and that directly win the heart of the people. His fame has spread to the remotest corner of the globe He commands a treasury practically inexhaustible and withal his kindness knows no bounds Full of kind and tender solicitude for his people, he refrains from levying exorbitant taxes and he extends his beneficent protection to all without distinction of age or sex, creed or colour. As a direct consequence of his kindness, his efficient protection of his subject, and the wide spread fame he enjoys, his subjects enjoy uninterrupted prosperity and yield a rich harvest of revenue. One would fancy that just as a cow gladly yields her milk to the man who looks after her and protects her, so also the

earth readily yields its treasures to so kind and virtuous a ruler, moved to gratitude by his protection

Cf. तपी रक्षन् स विघ्नेभ्यस्तस्करेभ्यश्च सम्पदः ।
यथास्वमाश्रमैश्चक्रे वर्णैरपि षडंशभाक् ॥
खनिभिः सुषुवे रत्नं क्षेत्रैः सस्यं वनैर्गजान् ।
दिदेश वेतनं तस्मै रक्षा-सदृशमेव भूः ॥ Raghu XVII 65, 66

The Comparison "यथा तृण-कम्बलादिभिः शरीरपोषण दिशता दंशादिभ्यो रक्षता दयावता प्रशस्तेन गोपालेन स्नेहस्रुतपयोधरा सुरभिः सुखेन पयो दुह्यते, तथा करमार्दवादिभिः परिपोष दिशता दस्युचोरादिभ्यो रक्षता तेन गुणानुरञ्जिता मेदिनी सुखेन वसूनि दुह्यते इति उपमालङ्कारो द्योत्यते । तद्गुणानुरञ्जिता मेदिनी स्वयमेव तस्मै प्रतिदिवस स्वाभ्यन्तरस्थितान्यपि वसूनि दिशति इति तात्पर्यार्थ. ।"

Word-Notes.

उदारकीर्त्तेः—उदारा कीर्त्तिः यस्य सः (बहु), तस्य । Adj to अस्य. उदयम्–उत् + इ + अच् (भावे) obj to दिशत. ।

दयावत:—दया + मतुप् then 6/1 The rules for the change of the म of मतुप्—(1) मात् उपधायाश्च मतोर्वोऽयवादिभ्य. (पा ८।२।९), मात्— after a प्रातिपदिक ending in म and अवर्ण (अ and आ), उपधायाश्च— after one with म, अ and आ as penult, मतो व the म of मतुप् is changed into व., अयवादिभ्य. but not after यव etc. Thus किंवान्, ज्ञानवान्, 'दयावान् , लक्ष्मीवान्, पयस्वान्, भास्वान् , but यवमान् , ऊर्म्मिमान्, भूमिमान्, कृमिमान् etc (2) झयः (पा ८।२।१०)—after a प्रातिप्रादिक ending in झय् (the first four letters of any *varga* the म of मतुप् is changed to व , as विद्युत्वान् दृषद्वान् etc.

प्रशान्तबाधम्—(1) प्रशान्ता बाधा यस्मिन् (बहु) तत् यथा स्यात् तथा, adv. mod दिशता or (2) प्रशान्ता बाधा यस्मिन् तम् adj to उदयम्, प्र + शम् + णिच् + क्त (कर्म्मणि)—प्रशमित or प्रशान्त । बाध् + अ + टाप् = बाधा । 'गुरोश्च हलः' ३।३।१०३—a root with a long vowel ending in a consonant admits अ in the sense of भाव and is feminine. This bars क्तिन्.

दिशत:—दिश् + शतृ 6/1. constr उदयं दिशतः अस्य कष्ट अदिशत् अभिरक्षया—करणे तृतीया । अभि + रक्ष् + अ (गुरोश्च हलः) + टाप् 3/1.

स्वयं not under compulsion, but of her own free will.

प्रदुग्वे—प्र + दुह् + कर्म्मकर्त्तरि लट् ते। "न दुह-स्नु-नमां यक्-चिणौ" इति यक्-प्रतिषेधः। "दुहि-पच्योर्बहुलं सकर्म्मकयोः इति वाच्यम्" इति सकर्म्मकत्वम्। Bhartihari defines कर्म्मकर्त्तृवाच्य thus—

> क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति।
> सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद् विदुः॥

When an action which is being performed (by an agent) is represented as being performed of itself (without the intervention of any agent) by virtue of the extreme good quality of the agent the verb is said to be id the कर्मकर्त्तृवाच्य

उपस्नुता—उप + स्नु + कर्म्मणि क्त, p. p. adj to मेदिनी। अन्तःस्थितस्य क्षीरस्य वत्सदर्शनादिना निमित्तेन स्तनमुखं प्रति आकर्षणं मुख्यं स्रवनं गोनिष्ठत्वेन प्रसिद्धम्। तत् अत्र मेदिनीक्रियात्वेन प्रयुक्तम् अमुख्यं स्रवनं मेदिन्या गोत्वारोपं द्योतयति। तस्य क्षीरस्य असञ्जातपीडं गोपालादिना स्तनमुखान् निःसारणं मुख्यं दोहनम्। आरोपितगोपत्वभूपतिक्रियात्वेन वक्तव्यम् अमुख्यं दोहनम् अत्र सौकर्य्यातिशयविवक्षया मेदिनीक्रियात्वेन उक्तम्। माधुर्य्य-दाक्षिण्यादिभिः तस्य गुणैः आर्द्रीकृतहृदयाया मेदिन्या स्वाभ्यन्तरस्थितानां वसूनां तस्मै देयत्वेन अध्यवसानं स्रवनत्वेन आरोप्यति। पुनस्तदुद्भवाप्रतिबन्धेन तेन तस्या वसूनां निःसारणम् अमुख्यं दोहनम्, तद् भूपतिकर्त्तृकमपि सुकरतरम् इति द्योतयितुं मेदिनीकर्त्तृकत्वेन उक्तम्।

—CHITRA-BHANU

वसूपमानस्य—वसु (Kubera) उपमान (standard of comparison) यस्य सः (बहु) तस्य। उपमीयते अनेन उप + मा + ल्युट् (करणे) – उपमानम्।

मेदिनी—मधुकैटभयोरासीत् मेदसैव परिप्लुता।
> तेनेयं मेदिनीनाम्ना सर्वतः परिकीर्त्तिता॥

घण्टापथः—(1) ननु एव जनपदानुवर्त्तिनः कथम् अर्थलाभः इत्यत आह —'उदार' इति। 'उदार-कीर्त्तेः' महायशसः। (2) "उदारो दातृ महतोः" इत्यमरः। "दयावतः" परदुःखप्रहाणेच्छोः अत एव 'प्रशान्तबाधं' प्रशमितोपद्रवं यथा स्यात् तथा इति (3) क्रियाविशेषणम्, लट्यविशेषणं वा। (4) "वा दान्तशान्त" [पा. ७।२।२७] इत्यादिना शमि-धातोर्ण्यन्तात् निष्ठान्तो निपातः। 'अभिरक्षया' सर्वतस्त्राणेन 'उदयं वृद्धिं' 'दिशतः' सम्पादयतः। 'वसूपमानस्य

कुबेरोपमस्य। "वसुर्मयूखाग्निधनाधिपेषु" इति विश्वः। "अस्य दुर्योधनस्य गुणैः दयादाक्षिण्यादिभिः 'उपस्नुता' द्राविता मेदिनी 'वसूनि धनानि। "वसु तोये धने मणौ" इति वैजयन्ती। 'स्वयं प्रदुग्धे अक्लेशेन दुह्यते इत्यर्थः। (5) दुहेः कर्म्मकर्त्तरि लट्। (6) "न दुहस्नुनमां यक्-चिणौ" [पा ३।१।८९] इति यक्-प्रतिषेधः। (7) यथा केनचिद् विदग्धेन नवप्रसूता रक्षिता च गौः स्वय प्रदुग्धे तद्वत् इति भावः।

(8) अलङ्कारस्तु "विशेषणसाम्यात्† अप्रस्तुतस्य गम्यत्वे समासोक्तिः" [A.S.31] इति सर्व्वस्वकारः। अत्र प्रतीयमानया गवा सह प्रकृतायाः‡ मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद् दोह्यत्वेन§ उक्तिः इति संक्षेपः।

---

* The construction is obscure The original reading might have been रक्षिता नवप्रसूता गौः B reads नवप्रसूता वर्द्धिता च गौ

† A reads विशेषणसाम्यात् which is the reading of the Alankarasarvasva. All others read विशेषणमात्रसाम्यात् The Trivandrum ed.of the Alankara Sutra reads विशेषणानां साम्यात्! M., no doubt, generally quotes the Sutra with the addition of मात्र, but the following from the commentary on the एकावली seems to set up a strong presumption in favour of the correct reading : प्रस्तुतविशेषणसाम्यात् अप्रस्तुतस्य गम्यत्वे समासोक्तिः। यथा "उदारकीर्त्तेरुदयं दयावत" इत्यत्र निर्बाधरक्षित्वोपस्नुतत्व दोहनादि-विशेषण-महिम्ना मेदिन्यां गोत्वप्रतीतिः। तत्र दोहनक्रियासिद्ध्यर्थं मेदिन्या स्वरूपानुपमर्दनं गोत्वाक्षेपादजहल्लक्षणामूलत्वम् इति भावः। [M is explaining here how अजहत्स्वार्थलक्षणा or उपादानलक्षणा forms the basis of all समासोक्ति]

‡ A reads प्रकृतया which evidently is a mistake for प्रकृतायाः Others read प्रकृताङ्गाः or प्रकृताङ्गया but the fem suffix is hardly admissible here, the समास evidently being a तत्पुरुष and not a बहुव्रीहि We may, however, explain प्रकृताङ्गाः as प्रकृतानि आरब्धानि अङ्गानि विशेषणानि उपस्नुतत्वादीनि यस्याः तस्याः

§ Some of the printed editions read अपोह्यत्वेन for दोह्यत्वेन One editor accepts the former reading and supports it with a learned explanation !!!

Ghantapatha Explained.

(1) How can he who thus promotes the welfare of the cities obtain money ?

(2) उदार from उत्+ऋ+घञ् (like Eng exalted) means lofty, noble and thence munificent.

[Durgacharya, however, regards it as a प्रादि बहुव्रीहि (of उद्गत and आर) meaning originally a horse or an ox that does not require to be whipped but does what its driver wants it to do before the whip descends on its back Hence it came to mean a munificent person—one who fulfils the desires of his suitors even before they ask him for any thing. See under Nirukta II. 1]

(3) प्रशान्तबाधम् may be construed either as an adv. meaning "all obstacles being removed" or as an adj to उदय meaning 'uninterrupted prosperity'

(4) वा दान्त शान्त पूर्ण दस्त-स्पष्ट-छन्न-ज्ञप्ता [पा. ७।२।२७ सि ३०६८] ।

These irregularly formed past participles from the causal roots may optionally take इट्. The other forms are दमित, शमित, पूरित, दासित, स्पाशित, छादित and ज्ञपित .

(5) दुह् has here been used in the कर्म्मकर्तृवाच्य, (or the Reflexive voice) * When the true subject is ignored and the object used as the subject to denote the excessive ease with which the action is performed, the voice is known as कर्म्मकर्तृ as काष्ठ भिद्यते,, अन्न पच्यते the log splits, glass breaks,

* यदा सौकर्य्यातिशय द्योतयितु' कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते—स्वव्यापारे स्वतन्त्रत्वात् । तेन पूर्व्वं करणत्वादि-सत्त्वेऽपि सम्प्रति कर्तृत्वात् कर्त्तरि लकारः। साधु असिः छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्म्मणस्तु कर्तृत्व-विवक्षाया प्राक् सकर्म्मका अपि प्रायेण अकर्म्मकाः, तेभ्यः भावे कर्त्तरि च लकाराः। पच्यते ओदनेन, भिद्यते काष्ठेन। कर्त्तरि तु "कर्म्मवत् कर्म्मणा तुल्यक्रियः" etc. २

...ce is selling cheap &c. The rule कर्मवत् कर्मणा तुल्यक्रियः enjoins that all the rules of the passive conjugation will apply in the case of the Reflexive conjugation So the य (यक्) of the passive should have been added and the form should have been प्रदुह्यते and not प्रदुग्धे. (6) This य is in the present case, barred by the rule न दुहस्नुनमां यक्चिणौ which directs that यक् and चिण् are not to be added in the Reflexive voice in the case of the roots दुह्, स्नु and नम् (In the case of दुह् however चिण् is optional acc to the rule दुहश्च ३।१।६३ (For नम् cf. स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि । निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ Sis. II.] (7) Just as a cow which has just given birth to a calf tended carefully by a clever man gives milk of her own accord (8) Acc to the author of the Alankara Sarvasva—when from the force of adjectives common to both प्रकृत and अप्रकृत, the अप्रकृत is *suggested*, the Fig is समासोक्ति प्रकृत means the subject under description. (When the प्रकृत is suggested by the अप्रकृत the fig is अप्रस्तुतप्रशंसा "In समासोक्ति the behaviour of what is not the matter in hand is attributed to what is the matter in hand The Fig is called समासोक्ति because of its brevity,the same word conveying two things. समासेन संक्षेपेण अर्थद्वयकथनात् समासोक्तिः—K P

Exs अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा। Sak. IV 2

अत्र नायके अन्तर्हिते नायिका दृष्टिं न नन्दयति इति नायकयोः व्यवहार-समारोपात् समासोक्तिः।

The verse चलापाङ्गां दृष्टिम् (Sak 1 20) where the behaviour of a violent lover (हठकामुक) is attributed to the bee

When the उपमान or अप्रस्तुत swallows up or altogether takes in the विषय and there is a perfect apprehension of identity, the fig. is अतिशयोक्ति. It has five varieties—(1) भेदे अभेदः (2) अभेदे भेदः (3) सम्बन्धे असम्बन्धः (4) असम्बन्धे सम्बन्धः and (5) कार्य-कारणयोः पौर्वापर्यविपर्ययः..

In the present case, the attribute उपस्नुता and the action of दोहन which are common to both the earth (the matter in hand) and the cow suggest the cow, hence the fig. of speech is समासोक्ति Again दोहन is primarily applicable to the cow, but here it is applied to the earth, so there is the denial of the difference between the earth and the cow which constitutes the first variety of अतिशयोक्ति Thus there is here a सङ्कर of समासोक्ति and अतिशयोक्ति। (See M. under Ki. III 60)

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः।
नसंहतास्तस्य नभिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥ १८ ॥

Analysis धनुर्भृत असुभि तस्य प्रियाणि समीहितु वाञ्छन्ति— His archers desire to accomplish his objects even at the cost of their lives Adjs to धनुर्भृत —(1) महौजसः of superior might, (2) मानधना. their wealth consists in their honour i.e. the prefer death to dishonour and consequently are not likely to turn their back on the field of battle, (3) धनार्चिता— they are respected and liberally paid for their services, so they are not likely to be won over by the enemy (4) संयति लब्धकीर्तय —they have won fame in battles, i.e, they are not raw recurits but veteran soldiers whose prowess has been tested in the fire of battles and never been found wanting, (5) नसंहता —they do not combine together (to plot against the king), (6) नभिन्नवृत्तय —nor do they ruin the affairs of their master by mutual quarrels and jealousies.

Prose-Order महौजसः (महाबलाः) मानधना (मानः कुलशीलाद्यभिमान एव धनं येषां ते) धनार्चिताः (सम्मान्य दत्तधनाः) संयति (युद्धे)

लब्ध-कीर्त्तय: (बहुयशस:) असंहता: (परस्परं न सङ्गता:) अभिन्नवृत्तय: (मिथोविरोधात् स्वामिकार्यविघातकरा:) अनुभृत: (धातुष्का:) असुभि: (प्राणै:) तस्य प्रियाणि समीहितु' (कर्त्तु') वाञ्छन्ति (आनुण्यार्थं प्राणान् दातुम् इच्छन्ति)।

Bengali. বিপুল বলবীর্য্যসম্পন্ন ধনুর্ধরগণ প্রাণব্যয়েও দুর্য্যোধনের প্রিয়কার্য্যসাধনে তৎপর। মানই তাঁহাদের একমাত্র ধন (সুতরাং নীচ কার্য্য তাঁহারা কখন করিবেন না), তাঁহারা প্রভূত অর্থদ্বারা সম্মানিত (সুতরাং অর্থাভাবপ্রযুক্ত লোভপরবশ হইয়া শত্রুপক্ষে গমনও সম্ভবপর নহে), যুদ্ধে যশোলাভ করিয়াছেন (অত্যন্ত বলবান্ ব্যক্তিও প্রথমবার যুদ্ধ করিতে যাইয়া হতবুদ্ধি হইয়া পড়ে, এক্ষেত্রে সে সম্ভাবনা নাই), পরস্পর মিলিত নহে অথচ পরস্পর পরস্পরের প্রতিকূলাচরণ-পরায়ণও নহে, সুতরাং ইঁহারা যে একজোটে রাজার বিরুদ্ধে ষড়যন্ত্র করিবেন অথবা পরস্পরের প্রতি ক্রোধ, ঈর্ষ্যা অথবা বিদ্বেষবশতঃ প্রভুকার্য্য নষ্ট করিবেন তাহারও সম্ভাবনা নাই।

English. His soldiers (lit archers) who are possessed of great strength and greatly value their self-respect, who are honoured with wealth and have gained distinction in fighting, who are neither leagued together (in conspiracies) nor mutually distrustful, wish to do him good at the cost of their lives

Elucidation. He has at his command a magnificent army consisting of soldiers, who are ever ready to gladly lay down their lives to further his interest Their superior might renders them invincible and their self-respect which they value above life itself prevents them from stooping to any mean, selfish or unworthy act They are honoured with regular and liberal payments and consequently it is not possible for the enemy to win them over by bribery. The heroes of a hundred battles, they are not likely to get

nervous on the battle-field. They are neither too closely united to conspire against the king, nor are they too distantly separated from each other to unite in service to the king, so they are not likely either to form conspiracies for the overthrow of the king or to ruin their master by mutual quarrels and jealousies. A king at the head of such an army bound to him with hoops of steel is indeed unassailable.

Word-Notes.

महौजस.—महत् ओजः येषां ते (बहु). Same form in fem Decl like वेधस्. उब्ज + असुन् = ओजस् (n). महत् as the first member of a कर्मधा or बहुव्रीहि comp is changed to महा, so also before the affix जातीय "आन्महत: समानाधिकरण-जातीययोः" (पा. ६।३।४६)।

मानधना —मानं धनं येषां ते (बहु).

धनुर्भृत —धनु बिभ्रति ये ते (उपपद), धनु. + भृ + क्विप् (कर्त्तरि)

संयति—अधिकरणे ७मी। सम् + यत् + (भावे) क्विप्—संयत् fem

नसंहता न संहता. (सह सुपा इति समास), similar cases—नभिन्नवृत्तय नभिन्नवृत्तम्। संहत—सम् + हन् + कर्त्तरि क्त united

Cf Kam. राज्योपघातं कुर्वीरन् ये पापा राजवल्लभा ।

एकैकश. संहता वा तान् दूष्यान् परिचक्षते ॥ VI 9

नभिन्नवृत्तय —न भिन्ना (सह सुपा) नभिन्ना वृत्ति ये. or (येषां) ते—not acting in a hostile manner towards one another

असुभि: —करणे तृतीया. असु like प्राण is m and always plural.

सारावली। "संखीन् इव" [sl 10] इत्यादिना यथा असौ अनुजीविसुहृत्सु वर्त्तते तथा दर्शितम्। इदानीं यथा ते अस्मिन् वर्त्तन्ते तथा दर्शयति। महौजस्त्वादिसम्पन्ना अपि यदि संहता सर्वक्रियायां एकभावापन्ना तदा दोष. इत्याह—"नसंहता।" यदि नसंहता तदा अन्योऽन्यदोषात् प्रस्तुतकार्य्यम् अवसादयेयु इत्याह—"नभिन्नवृत्तयः"। भिन्ना विरुद्धा वृत्ति चेष्टा [येषां] ते तथा। तथाह—

न संहतान् न भिन्नांश्च योधान् कुर्वीत विद्विषे।

इतरेषु संहता वित्तं भिन्नाश्चानर्थकारिणः॥

घण्टापथः—(1) वीरभटानुकूल्यम्* आह—"महौजसः" इति । 'महौजसः' महाबलाः अन्यथा दुर्बलानाम् अनुपकारित्वात्, इति भावः । मानः कुलशीलाद्यभिमान एव धनं येषां ते 'मान-धनाः' (2) अन्यथा कदाचिद् बलदर्पाद् विकुर्वीरन् इति भावः । 'धनार्चिताः' धनैः अर्चिताः सत्कृताः, (3) अन्यथा दारिद्र्यात् एनं जह्युः इति भावः । 'संयति' सङ्ग्रामे 'लब्ध-कीर्तय' बहुयशसः इत्यर्थः, (4) अन्यथा कदाचित् मुह्येयुः इति भाव । संहताः मिथः सङ्गताः स्वार्थनिष्ठा न भवन्ति इति 'नसंहताः' (5) नञर्थस्य नशब्दस्य सुप्-सुपेति समासः । नभिन्नवृत्तय. पूर्ववत् समासः । अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिण. स्युः इत्युभयत्रापि तात्पर्यार्थः । धनुर्भृतः' धानुष्काः । (6) आयुधीयमात्रोपलक्षणम् एतत्, प्राधान्यात् धनुर्ग्रहणम् । 'तस्य' दुर्योधनस्य 'असुभि' प्राणै 'प्रियाणि' 'समीहित' कर्तुं 'वाञ्छन्ति, । (7) आनृण्यार्थं प्राणान् दातुम् इच्छन्ति, अन्यथा दोष-स्मरणात् इति भाव. ।

(8) अत्र महौजसादि-पदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात् काव्यलिङ्गम् अलङ्कार. । लक्षणन्तु उक्तम् । तथा साभिप्राय-विशेषणत्वात् परिकरालङ्कार इति द्वयो. तिलतण्डुलवत् विभक्ततया स्फुरणात् संसृष्टिः ।

(1) [The poet] speaks of the help of heroic soldiers

(2) Otherwise they migh t become unfaithful or disloyal through pride of strength.

(3) Otherwise they might desert him through sheer poverty.

(4) Otherwise they might lose heart (in the hour of trial, because of their want of experience).

(5) नसंहता' is a comp , so also नभिन्नवृत्तय. These are not नञ-तत्पुरुष compounds but सुप् सुपा compounds with the word न having the sense of नञ्

---

* A reads—सम्प्रति वीरभटानुकूल्यम् आह । दर्शितपराक्रमा वीराः, रूयापितपराक्रमा भटाः ।

असंहताः, अभिन्नवृत्तयः are evidently compounds, for they denote *one single* idea. But we cannot call them नञ् तत्पुरुष, for in that case न would be changed to अ by 'नलोपो नञः' (पा. ६।३।७३) Nor do these cases come under the exceptions enumerated in नभ्राण् नपात् नवेदा-नासत्या-नमुचि नकुल नख-नपुं सक-नक्षत्र-नक्र-नाकेषु प्रकृत्या (६।३।७५) So we must regard these as compounds of न (as distinguished from नञ् though with the same meaning) and संहता etc. And as there is no rule sanctioning such compounds with न, recourse must be had to the general ru'e for all compou nds viz सह सुपा (२।१।४) which is resolved into (i) सह i e सुप् समर्थेन (तिङा) सह समस्यते—and (ii) सुपा i e सुप् सुपा सह समस्यते । Cf Vamana नैकशब्दः सुप्सुपेति समासात् (V 2 11 —'अरण्यानीस्थानं फलनमितनैकद्रुममिदम्" इत्यादिषु नैकशब्दो दृश्यते, स च न सिध्यति। नञ्-समासे हि 'नलोपो नञ" इति नलोपे, 'तस्मान्नुडचि" इति नुडागमे सति अनेकम् इति रूपं स्यात्। निरनुबन्ध-कस्य नशब्दस्य समासे लक्षणं नास्ति। तत् कथं नैकशब्द इत्यत्राह—सुप् सुपेति समासात्। Other examples are नतिवर्तितम् III 8, नातिदूरात् IV 37, नैकरूपरसताम् IX 55, नतुन्नेन XV 14, नावत XVIII. 40.

नभिन्नवृत्तय Cf Kirat X 37 बलवदपि बल मिथो विरोधि प्रभवति नैव विपक्षनिर्जयाय।

(6) धनुर्भृत, (lit archers) stands for 'warriors in general' The word धनु has been used because it was the principal weapon of the soldiers of the period उपलक्षण is defined as स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम्।

(7) They are ready to lay down their lives to requite the debt they owe him Otherwise they would be guilty (according to the smritis) of ingratitude

(8) In this verse since the sense of the words महौजस् &c. which are used as adjectives assigns reasons for the duty of laying down their lives the Fig. of speech is Kavyalinga. Its definition has already been cited under sloka 7. Again,

since the adjectives are all used with a purpose, the Fig. of speech is Parikara There is a mechanical mixture of these two arising independently of each other like sesame and rice lying side by side.

When two or more Figures of speech occur in the same verse or sentence, they constitute a separate figure which is known as संसृष्टि if the figures of speech are independent of each other and सङ्कर if they stand in the relation of Principal and Subordinate. The first is like the mixture of sesame and rice, the second like that of milk and water (यथा तिल-तण्डुल-न्यायेन मिश्रत्वे संसृष्टिः। क्षीरनीरन्यायेन तु सङ्करः।)"

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥ Sak I 17

अत्र पादत्रये साधारणधर्मस्य रम्य लक्ष्मीविस्तार-मनोज्ञ-पदैरभिधानात् मालाप्रतिवस्तूपमा।

In the above there is a सङ्कर of मालाप्रतिवस्तूपमा and अर्थान्तरन्यास because the former gives rise to the latter, but there is also संसृष्टि of छेकानुप्रास and छेकानुप्रास।

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः॥ २०॥

Analysis. सः महीभृतां क्रियाः निःशेषं वेद—He keeps himself fully informed of the doings of other kings. How? चरैः—with the help of spies But his spies might deceive him! no, सच्चरितैः—their conduct was good. Are the other kings also

informed of his doings ? No. तस्य इङ्गितं फलैः प्रतीयते—his purpose or design was only revealed by its fruits What sort of fruits ? महोदयैः—bringing in its train great prosperity and हितानुबन्धिभिः—contributing to the well-being of the country Like what ? धातुः इव—like the purpose of the creator himself.

Prose-Order अशेषितक्रियः स सच्चरितैः चरैः महीभृतां क्रियाः निःशेषं वेद। तस्य इङ्गितं धातुः इव महोदयैः हितानुबन्धिभिः फलैः प्रतीयते।

Bengali আফলোদয়কর্ম্মা সেই দুর্য্যোধন সচ্চরিত্র চরগণের মুখে (অন্যান্য) নৃপতিগণের কার্য্যকলাপ সম্পূর্ণরূপে অবগত হইয়া থাকেন, কিন্তু তাঁহার উদ্দেশ্য, বিধাতার উদ্দেশ্যের ন্যায় পরমশ্রেয়স্কর, পরিণামে হিতকর ফলদর্শনেই অবগত হওয়া যায়।

English Pursuing his objects till they are accomplished, he learns thoroughly the plans of all (other) kings through faithful spies (lit whose conduct is good) His (own secret) plans, like those of Providence, are revealed by their results producing great prosperity and a succession of blessings

Elucidation He never leaves his work unfinished. Not content with learning what is going on in his own kingdom, he sends out spies of proved integrity to the kingdoms of other kings to regularly keep him informed of the doings of those kings But he himself takes particular care that no one gets any scent of his own plans and intentions Knowing full well that it is of the first importance in politics to maintain absolute secrecy about one's deliberations, he never allows his plans to be even suspected by others He works quietly and secretly till his actions bear fruit and his purpose is accomplished, and it is only then that from the results achieved his designs become known to the people Like the ways of Providence which are inscrutable, his plans are felt only by their far-reaching

effect and the great prosperity that they bring. Through the fruits they bear, we discern his designs.

Cf. तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।

फलानुमेया प्रारम्भा संस्कारा प्राक्तना इव ॥ Raghu I. 20.

न तस्य मण्डले राज्ञो न्यस्तप्रणिधिदीधिते ।

अदृष्टमभवत् किञ्चिद् व्यभ्रस्येव विवस्वत ॥ Ib. XVII 48.

मन्त्र प्रतिदिनं तस्य बभूव सह मन्त्रिभि ।

स जातु सेव्यमानोऽपि गुप्तद्वारो न सूच्यते ॥ Ib 50

परेषु स्वेषु च क्षिप्तैरविज्ञातपरस्परै ।

सोऽपसर्पैर्जजागार यथाकाल स्वपन्नपि ॥ Ib 51.

Word-Notes.

महीभृताम् 6/3—महीं बिभर्ति इति मही+भृ+क्विप् (कर्त्तरि) ।

सच्चरितै—सत् चरित येषा तै. (बहु) whose conduct is good, i e. above reproach , adj to चरै ।

चरै —चर् + पचादित्वात् अच् । करणे तृतीया ।

वेद—विद् + लट् 3/1 Alt. form वेत्ति

अप्रेषित-क्रिय, —प्रेष + णिच् (तत् करोति इति) + क्त (कर्मणि) + स्त्रिया टाप् प्रेषिता । न प्रेषिता क्रिया येन स (बहु)।

महोदयै—महान् उदय येषां ते (बहु) तै ।

हितानुबन्धिभि – हितम् अनुबन्ध शीलमेषा तै । हित + अनु + बन्ध् + णिनि (कर्त्तरि) हितानुबन्धिन् । ' सुप्यजातौ णिनिस्ताच्छील्ये ' इति णिनि ।

प्रतीयते—प्रति + इ + कर्मणि लट् 3/1

ईहित – ईह् + नपु सके भावे क्त obj to प्रतीयते । उक्ते कर्मणि प्रथमा । ईह् ऐहिट ।

फलै – करणे तृतीया ।

घण्टापथः—सम्प्रति स्वराष्ट्रवत् परराष्ट्रवृत्तान्तमपि स वेत्ति इत्याह—"महीभृताम् ' इति । 'अप्रेषित क्रिय" इत्यापितकृत्य आफलोदयकर्मा इत्यर्थ । 'स:' दुर्योधन 'सच्चरितै' शुद्धचरितै: अवञ्चकै. इति यावत् । चरन्ति इति चरा: तै: [चरै.] प्रणिधिभि:, पचाद्यच् , 'महीभृतां" 'क्रियाः' प्रारम्भान् 'नि:शेषं' वेद,'

वेत्ति (1) "विदो लटो वा" [पा ३।४।८३] इति णलादेश । स्वरहस्यन्तु न कश्चिद् वेद इत्याह—"महोदयैः" इति। धातु' इव' तस्य' दुर्योधनस्य 'इङ्गितम्' उद्योग 'महोदयैः' महाप्रवृत्तिभि इङ्गितम् अनुबध्नन्ति अनुबन्धन्ति इति 'इङ्गितानुबन्धिभि" सन्तो इत्यर्थः। 'फलै' कार्यसिद्धिभि, 'प्रतीयते' ज्ञायते। (2) फलानुमेयास्तस्य प्रारम्भा इत्यर्थ ।

(1) After the root विद् 'to know' the terminations of लिट् are optionally substituted for those of लट् परस्मैपद

(2) His actions were to be inferred from their fruit. A reminiscence of Raghu I 20

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम्॥ २१ ॥

Prose-Order तेन (दुर्योधनेन) सज्यम् (ज्या-युक्तम्) धनु क्वचित् न उद्यतम (उत्तोलितम्) न वा आनन (मुख) कोपविजिह्म (क्रोधेन कुटिल) कृतम्। गुणानुरागेण नराधिपै (अन्य-नृप) अस्य शासनम् (आज्ञा) माल्यम् इव शिरोभि उह्यते।

Bengali. "গুণযুত ধনু তাঁর তুলিতে না হয়
দেখাতে না হয় কোপে কুটিল বদন
গুণ অনুরাগে তাঁর নৃপতিনিচয়
মাল্যরূপ আজ্ঞা শিরে করেন ধারণ।" নবীনচন্দ্র দাস।

English. The bow fitted with string has never been raised by him, nor has his face ever been distorted with anger, (but) his orders are carried by kings on their heads like a garland through attraction for his excellences (its fragrance)

Elucidation. His word is law to the feudatory princes. And he never has occasion to enforce obedience by threats of punishment or even so much as a frown The other kings love him for his various good qualities and hasten to carry out his lightest wishes with great respect.

Cf. दूरापवर्जितच्छत्रैस्तस्याज्ञा शासनार्पिताम् ।
दधुः शिरोभिर्भूपाला देवाः पौरन्दरीमिव ॥ Raghu XVII 79
"अशेष नरपति शिर:-समभ्यर्चितशासन" – Kadambari

Word-Notes.

स-ज्य—ज्यया सह वर्तमानं (बहु) Alt form सहज्यम् । आरोपित-मौर्वीकम् ।

क्वचित्—कस्मिन् + अत् = क्व । "किमोऽत्" (५।३।१२)—किम with the 7th case ending admits the affix अ Before this अ, क्व is substituted for किम् । चित् is a particle added to किम् and its derivatives to give them an indefinite sense thus क — —who ? but कश्चित् – some one , कुत्र—where ? but कुत्रचित् somewhere. Some grammarians regard चित् and चन as तद्धित suffixes added to किम् with विभक्ति on, but this is not correct. The particles चित् and चन are used with other words also, as यश्चिद् whoever, यश्चिद् if ever, etc Amara also regards them as अव्यय's "असाकल्ये तु चिच्चन।" (प्राय. किंवृत्तात् परौ—क्षीरस्वामी ।)

उद्यतम्*—उत् + यम् + क्त (कर्मणि) लट् यच्छते (P. यच्छति) येमे (P. ययाम) , अयत, अयस्त (P अयसीत्).

---

* यम् preceded by सम्, उत् and आङ् is Atm except when it has a literary work for its object (समुदाङ्भ्यो यमोऽग्रन्थे I. 3 75) वस्त्रम् आयच्छते puts on a garment, भारम् उद्यच्छते lifts up a load, व्रीहीन् संयच्छते gathers rice , but वेदम् उद्यच्छति tries hard to learn the Vedas 2 यम् preceded by आ is Atm.

कोपविजिह्मम्—कोपेन विजिह्मम् (३या तत्)।

आननम्—(lit breather) अनिति (श्वसिति) अनेन इति आ + अन् + ल्युट् (करणे)। 'वक्त्रास्ये वदन तुण्डम् आननं लपनं मुखम्"—अमरः।

गुणानुरागेण—गुणेषु अनुरागः (७तत्) तेन। हेतौ तृतीया। अनु + रञ्ज् + घञ् (भावे) = अनुराग। ['घञि च भाव-करणयो.' इति न-लोपः।]

उह्यते—वह् + कर्म्मणि लट् ते। नराधिपै.—नराणाम् अधिपा तै: (६तत्) अनुक्ते कर्त्तरि तृतीया, verb उह्यते। अधिप—अधि + पा + क (कर्त्तरि)।

माल्यम्—माला एव माल्यम चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। ["स्वार्थिकाः क्वचित् प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते' इति क्लीवत्वम्। This is the view of Kshirasvamin, Mallinatha and Bhanuji. Though माला is not found under the चतुर्वर्ण group in पाणिनीय गणपाठ, nor is the group regarded as an आकृतिगण, still the गणरत्नमहोदधि includes it under the चतुर्वर्ण group Bhanuji proposes an alternative derivation मल् (धारणे) + ण्यत् (कर्म्मणि)। "माल्य कुसुम तत्-स्रजो' -मेदिनी।]

शासनम्—शास् + ल्युट् (भावे) Syns "अववादस्तु निर्देशो निदेशः शासन च स'। शिष्टिश्चाज्ञा च" Diff means शासन राजदत्तोर्व्यां लेखाज्ञा-शास्त्र-शास्तिषु—मेदिनी।

घण्टापथः—मित्रवल्लभ आह— न" इति। 'तेन' राज्ञा 'क्वचित्' कुत्रापि। सह ज्यया मौर्व्या 'सज्यम्' (1) 'मौर्वी ज्या शिञ्जिनी गुण." इत्यमर.। (2) 'तेन सहेति तुल्ययोगे [पा २।२।२८] इति बहुव्रीहिः 'धनु' न, 'उग्रतम् ऊर्ध्वीकृतम्' आनन वा 'कोप-विजिह्म' कोपेन कुटिलं 'न कृतम्। (3) यस्य कोप एव न उदेति कुतस्तस्य युद्धप्रसक्ति इति भाव। कथं तर्हि आज्ञा कारयति राज इत्यत्राह—गुणेति। 'गुणानुरागेण' गुणेषु दया-

---

when it is intransitive or has a limb of the body of the agent for its object, तरु. आयच्छते the tree spreads, पाणिम् आयच्छते stretches forth his hand, but आयच्छति कूपाद्रज्जुम् draws up the rope from the well 3 यम् preceded by उप is Atm in the sense of 'accepting' or 'marrying a girl', as, राम सीताम् उपयेमे।

दाक्षिण्यादिषु अनुरागेण प्रेम्णा । (4) माल्यपक्षे सूत्रानुषङ्गेण यद्वा सौरभ्यगुण-लोभेन 'नराधिपैः' अन्यभूपालैः 'अस्य' 'शासनम्' आज्ञा। माला एव माल्यं तदिव। (5) चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ् इति क्षीरस्वामी। शिरोभिः उह्यते। (6) "वचि-स्वपि-यजादीनां किति" [पा ६।१।१५] इति यकि सम्प्रसारणम्। अत्रो-पमा स्फुटैव।

(1) मौर्वी, ज्या, शिञ्जिनी and गुण are synonymous meaning a 'string.' (2) The word सह forms a Bahuvrihi compound with a तृतीयान्त word, provided that the companion and the person or thing accompanied are equally affected by any action or thing in the same manner Thus सह and जाया forms a बहुव्रीहि comp सह is optionally changed to स by the rule वोपसर्जनस्य ६।३।८२ which enjoins that सह the first member of a बहुव्रीहि comp is optionally changed to स. The आ of जाया is shortened by the rule गोस्त्रियोरुपसर्जनस्य—the final vowel of the word गो or a feminine word is shortened when they are *upasarjana* (3) How can a king whose anger is never roused embark on wars ? (4) गुण means 'string' and अनुराग means ('attachment i e.) 'connexion in the case of माल्य or गुण may mean 'fragrance', the comp signifying "through love for its fragrance' (5) चातुर्वर्ण्यादीनां स्वार्थ उपसङ्ख्यानम् (पा ५।१।१२४ वा)—ष्यञ् is added to the words चतुर्वर्ण etc., the sense remaining unchanged चत्वार एव वर्णाः चातुर्वर्ण्यम् Similarly त्रैलोक्यम् षाड्गुण्यम् सामीप्य, सौख्य, सैन्यम् etc (6) Before an affix with an indicatory क्, the roots, वच्, स्वप् and the group beginning with यज् (which includes वह्) undergo सम्प्रसारण वह्+यक्+ते, यक् has an indicatory क् hence before this य, व is changed into उ

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम्॥ २२॥

Analysis. दुःशासनं यौवराज्ये निधाय, स मखेषु हुतेन हिरण्यरेतसं धिनोति—Having installed Duhsasana as crown prince he propitiates the god of Fire by offering oblations Adj to स (1) दुरासदः whose orders are readily obeyed, (2) अखिन्न untired (3) पुरोधसा अनुमत with the permission of the family priest Adj to दुःशासनम्—नवयौवनोद्धतम्—full of energy on account of his fresh youth

Prose-Order दुरासदः (अप्रतिहताज्ञः) स नवयौवनोद्धतं दुःशासनं यौवराज्ये निधाय, पुरोधसा अनुमतः, अखिन्नः मखेषु हुतेन हिरण्यरेतसं धिनोति (प्रीणयति)।

Bengali অপ্রতিহতাজ্ঞ দুর্য্যোধন নবযৌবনোদ্ধত দুঃশাসনকে যুবরাজপদে অভিষিক্ত করিয়া পুরোহিতের উপদেশ অনুসারে শ্রান্তিশূন্য হইয়া যজ্ঞে হবির্দানে অগ্নিকে তুষ্ট করিতেছেন।

English He whose commands burn up all opposition has appointed Duhsasana proud in the strength of his budding youth to the rank of the crown prince, (and himself) propitiates untiringly the god of Fire with oblations in sacrifices, under the direction of the family priest

Elucidation Bent as he is on the promotion of the well-being of his subjects, he finds time to perform sacrifices also He knows that the youthful energies of Duhsasana if not directed into proper channels would bring disaster on himself as also on the state Hence he has installed him as heir-apparent to the throne, thus saddling him with important duties which would require all his skill and energy and which would leave him hardly any time for the perpetration of base acts. Moreover, there is not the least likelihood of Duhsasana abusing the powers vested

in him and tyrannising over the people, for he has to perform the duties of crown-prince under the instruction of Duryodhana and Duryodhana's orders are unresisted everywhere and his authority never called in question Thus, saddling Duhsasana with a great part of his own burden he devotes his time to the unwearied performance of sacrifices with the permission of his priest

Word-Notes

यौवराज्ये—युवा चासौ राजा च इति युवराज. (कर्म्मधा) "राजाहःसखिभ्यष्टच्" इति 'टच्' समासान्त. । युवराजस्य कर्म्म यौवराज्यम् युवराज + ष्यञ् । "गुणवचनब्राह्मणादिभ्य कर्म्मणि च" (पा ५।१।१२४)। अधिकरणे ७मी।

नवयौवनोद्धतम्—यूनो भाव यौवनम्। युवन् + अण्। "हायनान्त-युवादिभ्योऽण्" (पा ६।१।१३०) इति अण् प्रत्यय.। नवं यौवन (कर्म्मधा) तेन उद्धतम् (तया तत्)। उद्धतम्—उत् + हन् + क्त (कर्मणि) उपचितबलवीर्य्यविक्रमादिगुणम् रिपुकुलोन्मथनादिसमर्थम् इत्यर्थ.।

दु शासनम्—दु:खेन शिष्यते इति दुर् + शास् + खलर्थे युच्।

इद्धशासन—इद्ध शासनं यस्य स. (बहु)। इन्ध् + क्त (कर्त्तरि)—इद्ध। इद्धं दीप्तम् अभिमतत्वा बहुमतत्वा लङ्घ्यत्वनियम शासनस्य दीप्तिरिह विवक्षिता॥

मखेषु—अधि ७मी। "यज्ञ सवोऽध्वरो याग. सप्ततन्तुर्मख क्रतु"—अमर.।

अखिन्न'—नञ् + खिद् + क्त' (कर्त्तरि)।

अनुमत—अनु + मन् + क्त (कर्म्मणि) अनु + मन् being a मत्यर्थक root admits क्त to denote present time also, but the तृतीया in पुरोधसा shows that क्त has been added here in the past tense and not in the present tense If क्त had been added to denote present time, the nom. पुरोधस् would have taken षष्ठी by the rule क्तस्य च वर्त्तमाने which means that when क्त is used to denote present time, the कर्त्ता takes षष्ठी Chitrabhanu explains thus .

अस्मिन् यज्ञे तवेयमभिरुचि समुचितेव तस्मादनेन यज्ञेन देवानां प्रीणनं कुरुष्व इत्यनुज्ञात इत्यर्थः। 'अनुशिष्ट' इत्युक्तौ गुरुनियोगकृता तस्य यज्ञाभिरुचिरिति प्रतीयते। 'वेदित.' इत्युक्तौ तदानी तदुपदेशकृतं तस्य यज्ञविज्ञानमिति प्रतिभाति। तदुभयशङ्कानिवृत्त्यर्थम् अनुमत इत्युक्तम्।

घण्टापथः—सम्प्रति अस्य धार्म्मिकत्वम् आह—"स:" इति। 'दुःशासन" अप्रतिहताज्ञः" 'स' दुर्योधन. नवयौवनेन उद्धत (1) [नवयौवनोद्धत] प्रगल्भ धुरन्धरम् इत्यर्थ.। दु खेन शिष्यते" इति दु.शासन. तम्। (2) "भाषायां शासि-युधि—" [पा ३।३।१३०] इत्यादिना खलर्थे युच् प्रत्ययः। यौवराज्ये युवराजकर्म्मणि। ब्राह्मणादित्वात् ष्यञ्-प्रत्ययः। 'निधाय' नियुज्य इत्यर्थ., 'पुरोधसा पुरोहितेन 'अनुमत.' अनुज्ञात.। तस्मिन् याजके सति इत्यर्थ। तदुल्लङ्घने दोषस्मरणात् इति भाव.। (3) "निष्ठा" [पा ३।२।१२०] इति भूतार्थे क्त, न तु (4) 'मति बुद्धि—" [पा ३।२।१८८] इत्यादिना वर्त्तमाने क्त, अन्यथा 'पुरोधसा' इत्यत्र (5) "क्तस्य च वर्त्तमाने" [पा २।३।६७] इति षष्ठी स्यात्। 'अखिन्न. अनलस 'मखेषु' क्रतुषु 'हव्येन' हविषा। हिरण्य रेतो यस्य त' 'हिरण्यरेतसम्' अनल 'धिनोति' प्रीणयति। (6) धिन्व: प्रीणनार्थात् "धिन्वि-कृण्व्योर च" [पा ३।१।८०] इति उ-प्रत्यय, अकारश्च अन्तादेश।

Ghantapatha Explained.

(1) उद्धत is used in a good sense here The epithet shows that he was able to bear the burden of the state.

(2) For भाषायां शासि युधि etc see under sl 7.

(3) The affixes termed निष्ठा are used to denote past time.

(4) क्त is added to roots having the sense of thinking or wishing, knowing and adoring in the sense of the present tense. सता सम्मत:, राज्ञां पूजित', राज्ञां बुद्ध: etc.

(5) In connexion with a past participle formed by the

---

* शास्यते—A and N. S. Ed.

affix क्त in the sense of the present time, the nom takes षष्ठी. [This is an exception to the exception न लोकाव्ययनिष्ठा—]

(6) In the case of the roots धिन्वि 'to please' and कृण्वि 'to hurt,' the विकरण 'शप्' is replaced by उ, अ being the substitute of the final व Thus धिन्व्+ति = धिन्व्+उ+ति = धिन्+अ+उ+ति = धिनोति।

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

Analysis स भियः चिन्तयत्येव—He does apprehend (or brood on) dangers Adj to भियः—त्वदेष्यतीः that are to come from you. Adj to सः- -आवारिधि भुवो मण्डलं प्रशासत् अपि—though ruling over the sea-girt earth Adj to (भुवो) मण्डलम् –(1) प्रलीन भूपालम् —from which (hostile) kings have disappeared , (2) स्थिरायति —of abiding prospect अहो ! बलवद्विरोधिता दुरन्ता—Alas ! enmity with the mighty leads to disastrous consequences

Prose-Order प्रलीनभूपालं स्थिरायति आवारिधि भुवो मण्डलं प्रशासत् अपि स त्वदेष्यतीः भियः चिन्तयत्येव। अहो ! बलवद्विरोधिता दुरन्ता।

Bengali নিঃসপত্ন চিরস্থায়ি সাগরান্ত ভূমণ্ডল শাসন করিলেও তিনি আপনা হইতে যে বিপদ্ উপস্থিত হইবে তাহা অবশ্যই চিন্তা করিয়া থাকেন। হায়! বলবানের সহিত বিরোধের পরিণাম কি ভয়ানক!

English Though (rival) kings have disappeared and (though he is) ruling over a secure empire reaching up to the seas, he, still, is anxious out of fear for you, for alas! "strife with great men ends in sorrow.

Elucidation. He holds undisputed sway over the whole land to the very waters of the ocean and having no rivals to fear can securely look forward to a long and peaceful reign Yet, though so strongly secure, he still dreads you, who, though deprived of all earthly power, do still posses greater strength in your righteousness

Word-Notes.

प्रलीन भूपालम्—प्रलीनाः भूपालाः (rival kings) यस्मिन् तत् (बहु). प्रलीन—प्र + ली + क्त (कर्त्तरि)। ल्वादिभ्यश्च (८।२।४४) इति निष्ठा तस्य नत्वम्। प्र + ली means to disappear, melt away, fade away Cf सह मेघेन तडित् प्रलीयते। भूपाल —भू + पा + णिच + अण (कर्त्तरि)। कर्मण्यण् इति अण्। (The causal of पा to drink is पाययति)

स्थिरायति—स्थिरा (abiding) आयति यस्य तत् adj to (भुवो) मण्डलम्। आयति —आ + यम् + क्तिन् (भावे)। "आयति काल उत्तरः"—अमर।

प्रशासत्—प्र + शास् + शतृ 1/1, लोट् 2/1 शाधि, लुङ् अशिषत्, लङ् अशात्। आवारिधि—आ वारिधिभ्य इति आवारिधि (अव्ययीभाव) Adv modifying प्रशासत् आ means 'as far as,' 'up to' वारि धीयते अत्र वारि + धा + कि। भिय - भी + क्विप्। 3 lit fears, hence dangers भीशब्देन भयहेतवो विपदो लक्ष्यन्ते हवत्—'ध्रुवम् अपायेऽपादानम्' इति अपादानत्वात् पञ्चमी। अपायस्तु अत्र बुद्धिकल्पित। Adj to भिय। इ + स्यतृ + ङीप् = एष्यती then 2/3 Alt form एष्यन्ती। इ generally means 'to go' here it has been used in the sense of 'to come' धातूनाम् अनेकार्थत्वात्। Madhava derives it from a root इ to go which according some belongs to the भू class Or we may read ऐष्यती (आ + इ + स्यतृ + ङीप् 2/3)

Cf Madhava एयेषत्यूठ स्विस्वे जाद्वावेतो वृद्धिः। एव च 'ऐति स्म रामं पथि जामदग्न्यः." [भट्टि २।५०] इति भट्टिप्रयोगवत् "न पुनरेति गतं चतुर' वयः.' [रघु ९।४७] इत्यत्राप्यैतीति वृद्धिरेव पठनीया। "स चिन्तयत्यत्र भियस्त्व-

देवृतौ:" इति [कि १।२३] "इरत्यन' सम्प्रति चेतुरेष्यत.' [शिशु० १।२६] इत्यादिस्थल प्रयोगा भौवादिक श्रायतीहत्येतस्य" एचि पररूपे द्रष्टव्या: ।

दुरन्ता—दु. (दुष्ट') अन्त. परिणाम. यस्या सा (बहु) disastrous in the long run.

बलवद्विरोधिता—बलवता विरोधिता (सह सुपा इति समास.)। बल + मतुप्—बलवत्। वि + रुध् + णिन्—विरोधी , तस्य भाव विरोधिता (विरोधिन् + तल्)।

घण्टापथ:—(1) स चेत् तादृश उद्योगी, तर्हि अस्माभिर्निरुद्योगैर्भाव्यम् इत्याशङ्क्य उद्योगाभ्या दर्शयति—"प्रलीन" इति। 'स ' दुर्योधन 'प्रलीनभूपालं' मि सपत्नम् इत्यर्थ , 'स्थिरायति' चिरस्थायि इत्यर्थ , 'भुवो मण्डलम्' (2) आ वारिधिभ्य: 'आवारिधि'। "आङ् मर्यादाभिविध्यो.' [पा २।१।१३] इति अव्ययीभाव'। 'प्रशासद्' आज्ञापयन् अपि। (3) ' जक्षित्यादय. षट्' [पा ६।१।६] इत्यभ्यस्तसज्ञा। (4)"नाभ्यस्ताच्छतु ' [पा ७।१।७८] इति नुमागमप्रतिषेध.। (5) त्वत् त्वस्. (1) एष्यतौ, आगमिष्यती , [आगामिनी इति यावत]। धातूनामनेकार्थत्वाद् उक्तार्थ सिद्धि । अथवा (ii) आङ्पूर्व पाठ । "एत्येधत्यूठसु" [पा ६।१।८९] इति वृद्धि । (6) "लृट' सद् वा ' [पा ३।३।१४] इति शतृ-प्रत्यय.। (7) 'उगितश्च [पा ४।१।६] इति ङीप्। (8) "आच्छीनद्योर्नुम' [पा ७।१।८०] इति विकल्पात् नुम् अभाव । भियो भयहेतून् विपद इत्यर्थ । चिन्तयति आलोचयत्येव । * अहो बलवद् विरोधिता' 'दुरन्ता' दुष्टावसाना। (9) सार्वभौमस्यापि प्रबले सपत्ने. सह वैरम् † अनर्थपर्यवसायि एव इति तात्पर्यम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास अलङ्कार: ॥

(1) [The king might reply] "If he is so zealously and indifatiguably active then we must remain inactive, [it being absolutely hopeless for us, exiles in the forest, to cope

* स एवाह—Added here in N S Press Ed

† प्रबले: सह वैरायमाणत्वम्—N S Press Ed

with him"]. Anticipating this, the spy shows that there is still scope for exertion (on the king's part)

(2) आवारिधि is an अव्ययीभाव compd of आ and वारिधि। आ is used in the sense of 'inclusion or 'exclusion' In either sense it is compounded with a पञ्चम्यन्त word and the comp thus formed is अव्ययीभाव. Here it is better to take it in the sense of अभिविधि (inclusive of) (3) See under sl 17

(5) एष्यती. (इ + स्यतृ) means here 'proceeding from, or coming from' But the root इ means 'to go', it is only when it is preceded by the उपसर्ग आ that it means 'to come' Mallinatha tries to get over the difficulty by the dictum "अनेकार्था हि धातवः" i e, roots have many meanings, only a few being recognised in grammars Hence इ can be used to denote 'come' also Or we may read त्वदैष्यती. for त्वदेष्यती: ऐष्यती: = आ + इ + शतृ in place of लृट् = आ + इ + स्य + तृ = आ + एष्यत् = ऐष्यत्। आ combines with ए to form ऐ by the rule

एत्येधत्यूठ्सु—वृद्धि is the single substitute for अ or आ + ए (of एति or एधते) and for अ आ + ऊ of ऊठ् [the substitute of वा in वाह् (by the rule वाह ऊठ् ६।४।१३२)] (6) See sl 1

(7) उगितश्च — (पा. ४।१।६) उक् (उ, ऋ and ऌ) इत् यत्र सम्भवति यथाकथञ्चित् तद् उगिच्छब्दरूप', तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति। भवन्ती, पचन्ती &c धातोरुगित' प्रतिषेधो वक्तव्यः। पर्णध्वत् ब्राह्मणी। अञ्चतेश्च उपसंख्यानम् प्राची, प्रतीची। The feminine of what has an indicatory उ, ऋ or ऌ is formed by adding ङीप् (ई) Of roots with indicatory उ, ऋ etc only अञ्च् takes ङीप् in fem Now since शतृ has an indicatory ऋ, ई is added in the fem. and we thus have ऐष्यती।

(8) आच्छीनद्योर्नुम् (पा. ७।१।८०)

अवर्णान्तात् अङ्गात् उत्तरस्य शतुः वा नुम्-आगमो भवति, शी-नद्योः परतः। When the affix शतृ comes after a verbal stem ending in अ

or नौ * it may optionally take the augment नुम् † before the neutral case-ending औ (1/2 and 2/2) and before the feminine affix ई.

(9) Enmity with rivals leads even a sovereign ruler to disaster—this is the gist.

कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद् व्यथते नताननः
‡सुदुःसहान्मन्त्रपदादिवोरगः ॥ २४ ॥

Eng Equivalents कथाप्रसङ्गेन—(1) in course of conversation, (2) by a curer of poison § उदाहृत—uttered आखण्डलसूनु-विक्रमः—(1) the pro... (विक्रम) of Arjuna, the son (सूनु) of Indra, (2) the swoop (...म) of the ...

---

* i e, in the case of तुदादिगणीय and आकारान्त अदादिगणीय roots and लट् प्रत्यय In the case of भ्वादि and दिवादि the न् is compulsory by the next rule शप्-श्यनोर्नित्यम् ।

† i e. न् after its final vowel (मिदचोऽन्त्यात् परः—when the म् of an augment or substitute is इत्, it is to come after the last vowel).

‡ स दुःसहात् इति पाठान्तरम् ।

§ In the second case, though singular, it is an adj. to जनैः, कथाप्रसङ्गेन जनैः meaning 'by people who are curers of poison.' This outrage on grammar can be avoided by regarding कथाप्रसङ्गेनजनैः as one compound word and resolving it thus : कथाप्रसङ्गे इनाः च ते जनाश्च meaning 'people who are adepts in the art of curing poisons'.

of the younger brother ([illegible]), of Indra. [illegible]—(1) at the utterance of your name; (2) containing the names of Garuda and Vasuki (the initial letters ता and वा standing respectively for तार्क्ष्य i.e Garuda and वासुकि) ।

Prose-Order. कथाप्रसङ्गेन जनैः उदाहृतात् [मुहुःसहात्] [illegible] अभिधानात् सुदुःसहात् मन्त्रपदात् अनुस्मृताखण्डलसूनुविक्रमः उरग इव [सः] नतानन: [सन्] व्यथते ।

Bengali. সুনিপুণ বিষবৈদ্যগণকর্ত্তৃক উচ্চারিত গরুড় ও বাসুকির নামযুক্ত একটী পদ শ্রবণ করিলেও, গরুড়ের পদবিক্ষেপ স্মরণ করিয়া সর্প যেরূপ অবনত মস্তকে যন্ত্রণাভোগ করে, সেইরূপ কথাপ্রসঙ্গে কেহ আপনার নাম উচ্চারণ করিলে অর্জ্জুনের পরাক্রম স্মরণ করিয়া দুর্য্যোধন অতি দুঃসহ যন্ত্রণায় মস্তক অবনত করিয়া রাখেন ।

English At the (mere) mention of your name by people in the course of conversation, (he is) reminded of the prowess of the su of Indra (and) in pain he hangs down his head, like a serpent under the overpowering magic of *mantra*

Elucidation ight you wonder how I came to learn that he was mortally afraid seeing that he is perfect master of his emotions and takes particular care that his features and gestures may not betray his thoughts But inspite of all his effort, there are occasions when the veil of inscrutability wears off and the slight drooping of the head, the almost imperceptible quiver of the lips reveal to the trained eye his emotion of fear. When, for instance, any one happens to mention your name in the course of conversation, he is reminded of Arjuna's might of arm (by the law of Association of Ideas) and bends down his head in silent anguish.

Word-Notes.

कथाप्रसङ्गेन—(*in the case of Duryodhana*) कथायाः प्रसङ्गः तेन, प्रकृत्यादित्वात् तृतीया in course of conversation *In the case of the serpent* (1) विषविद्यं सिनोः कथाः प्रसञ्जयति इति क्रियायोगात् ... विषवैद्यस्य अभिधानं कथाप्रसङ्गः, तेन, or कथानां मन्त्राणां प्रसङ्गो ... सः, तेन adj to जनैः The singular in कथाप्रसङ्गेन is not emphatic, hence it is an adj to जनैः. Should this prove too difficult to swallow, M is ready with another explanation. This time he takes कथाप्रसङ्गेनजनैः as one compound word. कथाप्रसङ्गेषु इनाः कथाप्रसङ्गेनाः, ते च ते जनाः च, तैः men who are expert snake-charmers or जन may be taken to mean समूह, a collection of expert snake-charmers

जनैः—अनुक्ते कर्तरि तृतीया nom. to उदाहृतात्.

उदाहृतात्—pp adj to अभिधानात् in the case of Duryodhana, and to मन्त्रपदात् in the case of a serpent

अनुस्मृताखण्डल-सूनु विक्रमः—(दुर्योधनपक्षे) आखण्डलस्य (इन्द्रस्य) सूनु. (पुत्रः), तस्य विक्रमः (पराक्रमः), (सर्प-पक्षे) आखण्डलस्य (इन्द्रस्य) सूनु. (अनुजः) उपेन्द्र., विष्णु, इति यावत्, तस्य वि. (पक्षी), तस्य क्रमः (पादनिक्षेपः)। अनुस्मृत. आखण्डलसूनुविक्रम. येन सः (बहु)।

तवाभिधानात्—(दुर्योधनपक्षे) two separate words : तव अभिधानात् (नाम्नः), हेतौ पञ्चमी or ल्यब्लोपे कर्मण्यधिकरणे च इति ५मी, अभिधानं श्रुत्वा इत्यर्थः। (सर्पपक्षे) one compound word त. (तार्क्ष्य.) च व. (वासुकिः) च तवौ (द्वन्द्व), तयो. अभिधानं यस्मिन् (बहु) तस्मात् adj. to मन्त्रपदात्

व्यथते—व्यथ् + लट् ते Nom. सः (understood if the reading be ...) लट् व्यथते) लिट् विव्यथे। लुङ् अव्यथिष्ट।

नतानन:—नतम् आननं यस्य स. (बहु)।

सुदुःसहात्—सु + दुर् + सह् + खल् (कर्मणि) adj to मन्त्रपदात्।

मन्त्रपदात्—पद्यते प्रख्याप्यते अनेन अर्थः इति अर्थप्रतिपत्तिसाधनं शब्दः पदम्। मन्त्रस्य पदात् (अवयवात्)। भञ्जय ... इत्यादिना ... ...-

-देशात् इत्यर्थः। न हि समस्त एव मन्त्रः सर्वस्य कथाप्रसङ्गः मन्त्रकर्हयोऽपि इति तन्त्रिदां प्रसिद्धिः। "लोकेऽभिज्ञो न खलु मणि मन्त्र-महौषधादीनां प्रभावः" इति चाहुः। हेतौ पञ्चमी or ल्यब्लोपे पञ्चमी।

उरगः—उरसा गच्छति इति उरस्+गम्+ड (कर्त्तरि), 'उरसो लोपश्च' (पा. ३।२।४८) इति सकारलोप.।

घण्टापथः—(1) ननु गूढाकारेङ्गितस्य तस्य भय त्वया कथं निरधारि इत्यत आह—"कथा"-इति। (1) कथाप्रसङ्गेन गोष्ठीवचनेन जनैः तन्मध्ये: इत्यर्थः। अथवा (ii) कथाप्रसङ्गेन विषवैद्येन। (2) "कथाप्रसङ्गो वार्त्तायां विषवैद्येऽपि वाच्यवत्" इति विश्व। (3) एकवचनस्य अतन्त्रत्वात् जनविशेषणम्। यद्वा, (4) कथाप्रसङ्गेनाम* ते जनाश्च इत्येकं पदम्। "उदाहृतात्' उच्चारितात् तव 'अभिधानात् नामधेयात्, नामधेयस्मरणात् हेतो.। हेत्वर्थे पञ्चमी। (5) "आख्याह्वे अभिधानञ्च नामधेयञ्च नाम च" इत्यमरः। अन्यत्र 'तवाभिधानात्' (6) "नामैकदेशग्रहणे नाममात्रग्रहणम्" [Cf महाभाष्य—p 6] इति न्यायात् तव वश्च तवो तादृर्थ्यासक्तौ, तयो. अभिधान यस्मिन् पदे तस्मात्। 'अनुस्मृताखण्डलसूनुविक्रम.' स्मृतार्जुनपराक्रम. सन् 'सुदु'शब्दात्' अतिदुःसहात् 'मन्त्रपदात्' मन्त्रशब्दात् स्मारकात् हेतो। आखण्डलसूनु. वृन्दानुज:, उपेन्द्रो विष्णु: इति यावत्। (7) "सूनु पुत्रेऽनुजे रवौ" इति विश्वः। तस्य वि: पक्षी, गरुड इत्यर्थ.। तस्य क्रमो पादविक्षेप। स' अनुस्मृत' येन सः तथोक्त स्मृतगरुडमहिमा। उरग इव नतानन' सन् व्यथते दु.खायते। "पीडा बाधा व्यथा दु खम्" इत्यमरः। (8) अत्युत्कटभयदोषादिविकारा दुर्वारा इति भाव.। (9) "सर्वतो जयमन्विच्छेत् पुत्रादिच्छेत् पराजयम्" इति न्यायात् अर्जुनोत्कर्षकथन युधिष्ठिरस्य भूषणम् एव इति सर्वम् अवदातम।

(1) How did you ascertain that he was afraid, seeing that his features are inscrutable and his emotions unfathomable. (गूढाकारेङ्गितस्य Raghu I. 20)

(2) कथाप्रसङ्ग (m.) means वार्त्ता (conversation). It also means "a curer of poison" and then takes the gender of its noun

* कथाप्रसङ्गेन इनाम ते जनाश्च—All except A.

(3) M. construes कथाप्रसङ्गेन as an adj. to जनैः It might be objected that कथाप्रसङ्गेन being sing. cannot be an adj to जनैः which is plural M meets the objection with the remark एकवचनस्य अतन्त्रत्वात् (i.e. the sing. no. is not emphasised). The sense is this—when an epithet applies to both the दृष्टान्त and the दार्ष्टान्तिक (or the उपमान and the उपमेय), it must agree in number, gender etc, with the दार्ष्टान्तिक or उपमेय, but some latitude may be allowed in its construction with the दृष्टान्त or उपमान।

(4) Or, कथाप्रसङ्गेषु ज्ञाः (श्रेष्ठाः) कथाप्रसङ्गिनाः, ते च ते जनाश्च।

(5) आख्या, आह्वा, अभिधान, नामधेय and नामन् are synomynous.

(6) A part of a name stands for the whole name Just as भीम stands for भीमसेन, भामा for सत्यभामा, A for Amarendra, &c., so त stands for तार्क्ष्य (Garuda) and व for Vasuki

(7) सुतः (m) means (i) a son, (ii) younger brother and (iii) the sun.

(8) Changes due to excessive fear or such other causes are hard to repress (9) Acc to the maxim, "One should desire victory over every one, but defeat from one's son," the description of Arjuna's superiority is a feather in his cap—hence every thing is clear (consistent).

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वताम्
प्रवृत्तिसाराः खलु मादृशां गिरः ॥ २५ ॥

Analysis तत् तत्र (दुर्योधने) विधेयम् उत्तरम् आशु विधीयताम् । Adj. to तत्र—त्वयि जिह्मम् कर्तुम् उद्यते You have given me all the information, why not suggest the remedy also? मादृशां गिरः प्रवृत्तिसाराः खलु—speeches of persons like myself have their

worth only in the transmission of a message. Adj. to वाचः—पर-प्रणीतानि वचांसि चिन्वताम्—who gather news from the utterances of others.

Prose-Order. तत् त्वयि जिह्मं कर्त्तुम् उद्यते तत्र (दुर्योधने) विधेयम् उत्तरं (प्रतिक्रिया) विधीयताम् (क्रियताम्)। परप्रणीतानि (अन्योक्तानि) वचांसि चिन्वतां (संग्रहतां) मादृशां (चाराणां) गिरः (प्रवृत्तिसाराः) वार्त्ता-मात्रसाराः) खलु।

Bengali. সুতরাং আপনার প্রতি কপটতাচরণে উদ্যত দুর্য্যোধনের প্রতি তাহার উপযুক্ত উত্তরের ব্যবস্থা করুন। আমরা অন্য লোকে যে সকল কথা বলে তাহা সংগ্রহ করিয়া বেড়াই, আমাদের বাক্যে বার্ত্তামাত্রই সার। [শত্রুসম্বন্ধে যাহা যাহা অবগত হইয়াছি সমস্তই সবিস্তরে নিবেদন করিলাম। এখন এই সমস্ত বিষয় বিশেষ বিবেচনাপূর্ব্বক তাহার প্রতি যাহা কর্ত্তব্য মনে করিবেন তাহাই করুন। কর্ত্তব্যবিষয়ে উপদেশ দিবার মত বুদ্ধি আমার ন্যায় অজ্ঞ জীবের নাই।]

English It seems, therefore that he is hatching some plot against you, (and) against that you should contrive the proper measures Spies such as we (are) only gather what is spoken by the public (and our) words convey the facts alone

Elucidation Duryodhana is going to play crooked tricks with you There is no time to be lost Let counter-measures be taken against him as early as possible. It is not for spies like myself to advise you on the line of policy you are to follow under these circumstances. My duty is to gain all the necessary information about the doings of the enemy and I have performed my duty to the best of my ability, and put you in possession of all the facts. To advise you on state-policy is beyond my power It now remains for you to find out the measures to be adopted to

circumvent the enemy and to adopt them without loss of time.

Word-Notes.

तत्—उपसंहारे Cf तदेषा भवत: कान्ता त्यज वैनां गृहाण वा &c Sak.
त्वयि—विषये सप्तमी।

आशु—adv mod उद्यते—[उत्+यम्+क्त (कर्त्तरि) adj to वच]
जिह्मम् adj. used as a noun विधीयताम् (वि+धा+कर्म्मणि लोट् ताम्).
nom. त्वया understood , obj उत्तरम् In the active—विधेहि.

तत्र—विषये ७मी। तद्+सप्तमीस्थाने त्रल् विधेयम—वि+धा+यत्
(कर्म्मणि)। उत्-तरम्—that which follows, the course to be followed
next अनन्तकरणीयाम् cf Engl ut-ter). As a noun in the sense of
'answer' or 'reply' it is invariably neut. and not both masc.
and neut as one editor holds. उक्तौ कर्म्मणि प्रथमा। Cf.
क्रिया केवलमुत्तरम् Si१ II 22

पर-प्रणीतानि—परै: प्रणीतानि (तृतीया तत्) adj to वचांसि।

चिन्वताम्—चि+शतृ adj to मादृशाम्।

प्रवृत्ति-सारा.—प्रवृत्ति. (वार्त्ता एव) सार: यासां ता. (of which the
essence is news, or excitement to action). सार in the sense of
'essence' is always masc.

मादृशाम्—माम् इव दृशाम् पश्यन्ति जना:, ते इमे अहमिव दृश्यमाना माम्
इव आत्मानं पश्यन्ति इति अस्मद्+दृश्+क्विन् कर्म्मकर्त्तरि। त्व is sub-
stituted for युष्म and म् for अस्म् *when the signify a single
individual*, when an affix or the second member of comp.
follows. Thus for अस्मत् the substitute is मत् This मत् is
changed into मा by the rule आ सर्वनाम्न:—before दृक्, दृश, and
the affix वतु, आ is substituted for the final of the pronouns
त्वद् etc.

सप्रसङ्गपदार्थ:—(१) जिगमयति, "तत्" इति। 'तत्' तस्मात् कारणात्
'त्वयि' 'जिह्मं' कपटं 'कर्तुम् उद्यते' त्वां जिघांसौ शत्रौ:, 'तत्र' तस्मिन् दुर्योधने
'विधेयं' कर्त्तव्यम् 'उत्तरं' प्रतिक्रिया 'आशु' 'विधीयतां क्रियताम्। (२) मनु

कर्त्तव्यम् अपि त्वया एव उच्यताम् इति चेत्, तत्राह—"पर" इति। 'पर-प्रणीतानि' परोक्तानि 'वचांसि' 'चिन्वता' गवेषयता* 'मादृशां' वार्त्ताहारिणाम् इत्यर्थः। 'गिरः' 'प्रवृत्तिसाराः' वार्त्तामात्रसारा 'खलु'। "वार्त्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः। (3) वार्त्तामात्रवादिनो वयं, न तु कर्त्तव्यार्थोपदेशसमर्थाः, अत. त्वमेव निर्धार्य कार्य्यम् इति भावः। सामान्येन विशेषसमर्थनात् अर्थान्तरन्यासोऽलङ्कारः।

(1) Concludes Cf M. under II. 22 उक्तार्थोपसंहरणं निगमनं उच्यते। (2) Should you say, "Well tell me yourself what is to be done"—in answer to this he says परप्रणीतानि etc (3) We are mere informers and are not competent to advise as to the course to be followed, so you should yourself decide on your line of action.

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम्।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः॥ २६॥

Prose-Order वनसन्निवासिनां पत्यौ इति गिरम् ईरयित्वा आत्त सत्क्रिये गते [सति]. अथ महीभुजा कृष्णासदनं प्रविश्य अनुजसन्निधौ तत् वचः आचचक्षे, (or महीभुजा सदनं प्रविश्य तत् वच. कृष्णा आचचक्षे)।

Bengali বনচরপতি এই কথা বলিয়া পুরস্কারগ্রহণ করিয়া চলিয়া যাইলে পর, নৃপতি দ্রৌপদীর ভবনে প্রবেশপূর্ব্বক ভ্রাতৃগণসমক্ষে সেই বাক্য বলিলেন, অথবা গৃহে প্রবেশ করিয়া ভ্রাতৃগণসমক্ষে দ্রৌপদীকে সেই কথা বলিলেন।

English. After these words, when the chief of the

* A reads संवदताम् for गवेषयताम्

foresters had departed having received his reward, the king entered the apartment of Draupadi and reported them in the presence of his younger brothers,(or his words were repeated to Krishna in the presence of his younger brothers by the king when he had returned home).

Word-Notes.

ईरयित्वा—ईर (चुरादि) to utter + क्त्वा। लुङ् ऐरिरत्।

आत्तसत्क्रिये adj to पत्यौ। आत्ता (गृहीता) सत्क्रिया (समादरः पारितोषिकरूपः) येन सः (बहु), तस्मिन्। आ + दा + क्त (कर्मणि)—आत्त "अच उपसर्गात् तः" (पा ७।४।४७)—the vowel of दा is changed to त् before an affix which has an indicatory क् and begins with त् provided the root is preceded by an उपसर्ग ending in a vowel Thus आ + दा + त = आ + द् + त् + त = आत्त। Similarly प्रत्त, अवत्त &c. सत्, तस्य क्रिया सत्क्रिया (गतिसमास) (vide under sl 10)

पत्यौ—भावे सप्तमी What will be the form if you compound it with वनसन्निवासिनाम्? ०पतौ।

वनसन्निवासिनाम्—वने सन्निवस्तुं शीलम् एषाम् इति (उपपद तत्)। वन + सम् + नि + वस् + णिनि 6/3 शेषे षष्ठी।

कृष्णासदनम्—as M. points out, may be regarded as a comp कृष्णायाः सदनम् गृहम् or as two separate words कृष्णा—(उक्तकर्म of आचचक्षे), and सदनम् (obj to प्रविश्य) The first construction appears to be preferable for there is no reason why Yudhisthira should relate these things particularly to Krishna, ignoring the presence of his younger brothers. The fact that Krishna is the first to reply merely shows that as a woman (प्रमदा) she could not control her emotions and burst out as soon as the spy had finished.

कृष्णा—विद्याविनयविवेकमाधुर्यधैर्यक्षान्त्यादिभिर्गुणैः इयं गरीयसां मनांसि कर्षतीति कृष्णाशब्दस्य निरुक्तिः "प्रिया च दर्शनीया च पण्डिता च पतिव्रता।

ततः कृष्णा धर्मराजमिदं वचनमब्रवीत्॥' इत्यादौ भारते प्रतीयते।' इति चित्रभानुः।

महीभुजा—महीं भुनक्ति इति मही+भुज्+क्विप् (कर्त्तरि); अनुक्ते कर्त्तरि तृतीया, verb आचचक्षे।

आचचक्षे—आ+चक्ष्+कर्म्मणि लिट् ए, nom महीभुजा, obj either (तत्) वच. or कृष्णा and वचः। चष्टे, अचष्ट, चख्यौ, चख्ये, चक्ष्यौ, चक्ष्ये, चचक्षे, समचक्षिष्ट (in the sense of त्याग), अख्यत्, अख्यत, अक्षास्त।

अनुजसन्निधौ—अनुजानां सन्निधिः तस्मिन्। अनु पश्चात् जायते इति अनु+जन्+ड (कर्त्तरि)। सन्निधि—सम्+नि+धा+कि। "उपसर्गे घोः किः।"

घण्टापथः—'इति' इति। 'वनसन्निवासिनां पत्यौ' वनेचराधिपे 'इति गिरम्' 'ईरयित्वा', उक्त्वा 'आत्त-सत्क्रिये' गृहीत-पारितोषिके 'गते' सति। "तुष्टिदानम् एवं चाराणां हि वेतनम्, ते हि तल्लोभात् स्वामिकार्येषु अतीव त्वरन्ते" इति नीतिवाक्यामृते (Chap XIV)। 'अथ' 'महीभुजा' राज्ञा 'कृष्णा-सदनं' द्रौपदी-भवन 'प्रविश्य अनुजसन्निधौ' 'तत्' वनेचरोक्त 'वच. वाक्यम् 'आचचक्षे' आख्यातम्। अथवा कृष्णा इति पदच्छेदः। सदन प्रविश्य अनुजसन्निधौ तद् वच. कृष्णा आचचक्षे आख्याता। (3) चक्षिङो दुहादेर्द्विकर्म्मकत्वात् अप्रधाने कर्म्मणि लिट्।

(1) तुष्टिदानम् = पारितोषिकप्रदानम्। [Spies should not be engaged on any fixed salary for that would make them idle but] the granting of rewards forms their salary. They covet these rewards and so execute their master's business with all possible despatch (2) Or we may regard कृष्णा and सदनम् as two separate words (3) महीभुक अनुजसन्निधौ कृष्णां वचः आचचक्षे Here कृष्णा is the गौणकर्म्म (for it might be used in other *karakas* also, e g सम्प्रदान—कृष्णायै) and वच the मुख्य कर्म्म Now when a root with *two* objects is turned into the passive, the गौणकर्म्म in the case of the roots दुह् etc agrees with the verb, but in the case of the four roots नी, हृ, कृष् and वह् the मुख्यकर्म्म agrees with the verb. Cf.

गौणे कर्म्मणि दुह्यादेः प्रधाने नी-हृ-कृष्-वहाम् ।
बुद्धि-भक्षार्थयोः शब्द कर्म्मणां च निजेच्छया ॥
प्रयोज्यकर्म्मण्यन्येषां ण्यन्तानां लादयो मताः ॥

Here चक्ष् is a द्विकर्म्मक root belonging to the दुह्यादि group; hence the tense affix is added with reference to the अप्रधान कर्म्म (कथाः).

निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्यु-व्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

English Equivalents. नि-शम्-य—having heard. सिद्धिं—success द्विषताम् (द्विष् to hate + शतृ 6/3) enemies अपाकृती'—[अप + आ + कृ + क्तिन् (भावे)] lit removal, here, agitation of mind ततस्त्या. [तत + त्यप् + स्त्रियां टाप्, adj to अपाकृती'] arising from them वि-नि यम् तुम्—to restrain मन्यु—anger व्यवसाय—exertion दीप्—to inflame, kindle उदाजहार—(उत् + आ + हृ लिट् 3/1) spoke, said आत्मजा—[आत्मन् + जन् + ड (कर्त्तरि)] Sprung from one's self, hence daughter

Analysis द्रुपदात्मजा गिरः उदाजहार। कदा ? द्विषतां सिद्धिं निशम्य। किम्भूता द्रुपदात्मजा ? ततस्त्या अपाकृती' विनियन्तुम् अक्षमा। किम्भूता गिरः ? नृपस्य मन्यु-व्यवसाय-दीपिनीः ।

Prose-Order द्रुपदात्मजा द्विषतां सिद्धिं निशम्य ततः ततस्त्याः अपाकृतीः विनियन्तुम् अक्षमा [सती] नृपस्य मन्यु-व्यवसाय-दीपिनीः गिरः उदाजहार।

Bengali, শত্রুগণের সমৃদ্ধির বিষয় শ্রবণ করিয়া তজ্জনিত মানসিক বিকার দমন করিতে অসমর্থ হইয়া দ্রুপদরাজতনয়া নৃপতি যুধিষ্ঠিরের ক্রোধ ও উৎসাহের উদ্দীপক নিম্নলিখিত বাক্য বলিয়াছিলেন।

English Hearing of the prosperity of the enemy, and unable to control her emotions in consequence, the daughter of Drupada burst out with these words in order to enkindle the king's wrath and to rouse him to action.

Elucidation The daughter of king Drupada listened to the recital of the prosperity attending the fraud of her enemies. All the insults, indignities and humiliations she had been subjected to by these enemies came crowding in her mind and all her efforts to restrain the outward manifestations of the indignation failed. She made one last attempt to bring home to the truthful king the dire consequences of his lethargy to his brothers and himself and thus to rouse him to action.

Word-Notes.

निशम्य—नि + शम् + ल्यप्। [With णिच् निशम्य or निशमय्य, this शम् is दि प शाम्यति। शशाम, अशमत्, (अशमीत् also acc to Vopadeva) Causal निशामयति *to see*, otherwise निशमयति *to hear* "शमोऽदर्शने" the दिवादिगणीय root शम् is मित् except in the sense of seeing There is another root शम् which is चुरादि गण (उ acc to some) शामयते &c cf Vamana—"निशम्य-निशमय्यशब्दौ प्रकृतिभेदात्" (V 2 15) शमेर्दैवादिकस्य 'निशम्य' इति रूपम्। 'शमोऽदर्शने' इति चुरादौ णिचि मित्संज्ञकस्य 'निशमय्य' इति रूपम्।]

Cf Bhattamalla : निशाम्यतीति श्रवणे तथा निशामयतापि।

ततक्षा.—ततः + क्षप् + क्रियां टाप् 2/3. See Sl 5

द्विषताम्—द्विष् + शतृ द्विषत् Here शतृ forms a noun by the rule द्विषोऽमित्रे (३।२।१३१)।

अपाकृतौ:—"निराकरणमि प्रत्याख्यान-क्षेपनिराकरणदर्शन-स्वभावप्रभृतीनि, विनियन्तुम् विस्मृतं मोढ़ वा"। [illegible]।

अद्यमा—क्षम्+पचादित्वात् अच्+स्त्रियां टाप् क्षमा। न क्षमा अक्षमा।

नृपस्य—शेषे षष्ठी or कर्त्तरि षष्ठी in connexion with the कृत्प्रत्यय' in मन्यु and व्यवसाय.

व्यवसाय—वि+अव+सो+घञ् (भावे) उत्साह, उद्योग। वि+अव +सो is used in the sense of 'making effort' of अमीषतां केतुम् अधिर्व्यवस्यति (Sak) मन्युश्च व्यवसायश्च (द्वन्द्व) मन्यु-व्यवसायौ, तयोः दीपिन्यः, (षष्ठी तत्) ताः। दीपयन्ति इति दीपिन्यः दीप्+ग्रहादित्वात् णिनिः।

उदाजहार—उत्+आ+हृ and वि+आ+हृ are used in the sense of 'to speak, to utter'

घण्टापथः—'निशम्य' इति। अथ 'द्रुपदात्मजा' द्रौपदी 'द्विषतां' 'सिद्धि' इविरूपां 'निशम्य' 'ततः' तदनन्तरं, ततः [1 e] द्विषद्भ्यः आगता. ततस्त्याः। "अवग्रयात् ल्यप्" [पा ४।२।१०४] इति ल्यप्। अपाकृतीः विकारान् 'विनियन्तुं' निरोद्धुम् 'अक्षमा' सती 'नृपस्य' युधिष्ठिरस्य मन्यु-व्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्धिनीः [मन्युव्यवसायदीपिनीः] 'गिरः' वाक्यानि उदाजहार जगाद इत्यर्थः। २७।

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम्।
तथाऽपि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः॥ २८॥

English Equivalents अधिक्षेप—rebuke अनुशासन—counsel. व्यवसाययन्ति—prompt समय—propriety दुराधयः—exquisite mental agony

Prose-Order. भवादृशेषु प्रमदाजनोदितम् अनुशासनम् अधिक्षेप इव भवति। तथाऽपि निरस्तनारीसमया दुराधयः मां वक्तुं व्यवसाययन्ति।

Bengali. ভবাদৃশ জনের প্রতি স্ত্রীজনোক্ত উপদেশ বাক্য তিরস্কারের ন্যায় হইয়া থাকে। তথাপি আমার অসহ্য মনোবেদনা স্ত্রী-জনোচিত আচারকে নিরস্ত করিয়া আমাকে বলিতে উদ্যত করিতেছে।

English. To persons like you advice given by a woman looks like a rebuke. In spite of that, intolerable anguish breaking all bounds of female propriety induces me to speak.

Elucidation. For me—a woman "unschooled, untaught and uncontrolled"—to presume to advise you, the greatest and noblest of rulers on matters of state policy would be indecorous in the highest degree. You may welcome my advice on domestic matters, but you are sure to look upon any advice from me with regard to politics as a rebuke. But desperate times requi redesperate measures. So pardon me, if my feelings prompt me to speak setting at naught all principles of propriety.

Word-Notes.

भवादृशेषु—भवत् + दृश् + कञ् (कर्म्मकर्त्तरि) विदितवेदितव्येषु अधीत-सर्वशास्त्रेषु कुशाग्रीयधिषणेषु नीतिशास्त्रपारङ्गमेषु इति गुणगत व्यज्यते। विषये सप्तमी।

प्रमदाजनोदितं—प्रकृष्ट मद. यस्या. सा (बहु) प्रमदा, प्रमदा एव जनः, तेन उदितम्। "हर्ष-शोक-विवशतया विज्ञानशक्तिविकला स्त्री सन्ततम् अनुशास-

---

* A reads निकारान् (insults, humiliation) which gives a very good meaning and also suits M's explanation of ततस्त्याः as द्विषद्भ्य. आगताः But विनियन्तुम् must, then, be taken to mean not निरोद्धुम् but विस्मर्तुम् or सोढुम्। Cf Ki III. 44.

प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्तुं न शक्य. किमुताधिकर्तुम्।
नवीकरिष्यत्युपशुष्यदार्द्र. स त्वद्विना मे हृदयं निकारः॥

[illegible] आकृति [illegible] प्रयुज्यमान [illegible] अधिक्षेप—अधि + क्षिप् + घञ् (भावे); lit., *laying upon, throwing thence abuse, insult, rebuke.* 'अधिक्षेपः अधिक्षिते कुत्सिते भर्त्सिते विषु—विश्वः।

अनुशासनम्—"properly an order or direction as to the course to be followed, implying superiority or authority in the person from whom it proseeds"; hence advice, counsel

व्यवसाययन्ति—वि + अव + सो + णिच् + लट् अन्ति lit to cause to make efforts, hence to urge, induce, prompt Before णिच् सो is changed into सा by the rule * आदेच उपदेशेऽशिति (पा ६।१।४५)। † य (यक्) is then added instead of पुक् (प्) by the rule शा-छा-सा-ह्वा-व्या-वे-पां युक् (पा ७।३।३७)

अमम्—प्रयोज्य कर्म of व्यवसाययन्ति, takes द्वितीया by the rule गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्माकर्मकाणाम् अणि-कर्त्ता स णौ (पा १।४।५२) the कर्त्ता in the non-causal of all verbs implying motion, knowledge, eating and drinking (प्रत्यवसान), making sound (शब्दकर्म) and all intransitive verbs become कर्म in the causal Here व्यवसो is an instransitive root, hence अहम् the nom in the non causal form (अहं व्यवस्यामि) becomes कर्म in the causal form दुराधय. मा व्यवसाययन्ति)

निरस्त नारी समया.—नारीणा समय (आचार:) नारीसमय: (इतत्) निरस्त: (निराकृत:) नारीसमय: (स्त्रीजनसमुदाचार शालीनतारूप) यै: ते। निरस्त—निर् + अस् + क्त (कर्मणि) This अस् is दिवादि य अस्यति, आस, आस्यत्। नारी – नृ or नर + ङीन्। समय – सम् + इ + अच् (भावे)।

दुराधय.—दुष्टा आधय: (प्रादि) आधि: (masc) – आ + धा + कि (कर्मणि), (आधीयते चिन्ता अनेन इति) by the rule उपसर्गे घो: कि:

---

* Roots ending in ए, ओ, ऐ, औ change their final to आ except when an affix with an indicatory श् follows † Roots ending in आ generally take the augment प् (पुक) before णिच् but the roots री तनूकरणे, ह्री लज्जायां, [illegible] [illegible], [illegible], ली [illegible] and पा पाने take प (पुक्)।

(३।३।९२)—the roots technically known as घु (i e दा and धा) admit कि in the भाववाच्य as also in कारकवाच्य s except कर्तृवाच्य (1) बन्धकं व्यसनं (3,4) चेतःपीडाधिष्ठानम् आधयः" *e g*, आधिर्विंशत्येद् द्विगुणे धने यदि न मोक्ष्यते (pledge) , (2) आधिं प्राप्तो यो न मुञ्चेत् स धीरः (calamity) , (3) mental agony (4) site or place

घण्टापथः—"भवादृशेषु" इति। भवादृशा. भवद्विधा. पण्डिता इत्यर्थ.। तेषु [भवादृशेषु] विषये। (1) "त्यदादिषु——" [पा ३।२।६०] इत्यादिना कञ्। "आ सर्वनाम्न. [पा ६।३।९१] इति आकारादेश । प्रमदा-जनोदित मनौजनोक्तम। वदेः क्त । (2) "वचि-स्वपि—— " (पा ६।१।१५] इत्यादिना सम्प्रसारणम्। अनुशासन' नियोगवचनम् 'अधिक्षेपः' तिरस्कार इव भवति। तथापि वक्तुम अनुचितत्वेऽपि' 'निरस्तनारी-समया ' त्याजित शालीनता -रूपस्त्रीसमाचारा । (3) 'समयाः शपथाचार-काल-सिद्धान्त-संविदः" इत्यमर । दुराधय ' समयोल्लङ्घनहेतुत्वात् दुष्टा मनोव्यथा । (4) पु स्याधि-र्मानसी व्यथा ' इत्यमर । मा वक्तु' 'व्यवसाययन्ति' प्रेरयन्ति। न किञ्चिदयुक्त दु खिनाम् इति भाव.।

(1) The full rule is त्यदादिषु दृशोऽनालोचने कञ् च (पा ३।२।६० सि ४२९) "The affix कञ् as well as क्विन् comes after the root दृश् to see' when it is in combination with त्यद् &c which precede it, and when it does not signify perception' आ सर्वनाम्न (सि ४३०)—before the words दृक्, दृश् and the affix वतु the final of the pronouns is changed into आ Thus भवत् + दृश् – कञ् = भवा + दृश् + अ = भवादृश With क्विन् भवादृक्

(2) "वचि-स्वपि-यजादीनां किति" (See under sl 21)

(3) समय means (1) oath, (2) usage, mode of conduct, (3) time, (4) demonstrated conclusion, 5) agreement, bargain Exs. 'शपथे यथा—कृतसमय'। आचारे यथा—समयाञ् श्रावयेत् शिष्यम्। काले यथा—सन्ध्यासमये। [विधि-समय-नियोगात् I 46]। सिद्धान्ते यथा—बौद्धसमयः। संविदि यथा –अ. योन्यसमय । [न समयपरिरक्षण क्षम ते – 45]—क्षीरस्वामी। *Samaya*—1 (a coming together, i e , *like*

Eng convention) agreement ;—2 (*like Eng* juncture) a point of time, *and so* time or season, occasion ,—3.a concurrence of circumstances, i e a case' —**Lanman**.

(4) आधि masc. means 'mental agony'. [व्याधि—disease]

अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥ २९ ॥

English Equivalents : अखण्ड धृता—held entire or undivided आखण्डल (lit. the Breaker)—Indra धाम—prowess मदच्युता (मद्+च्युत्+क्विप् कर्त्तरि 3/1) discharging ichor मतङ्गज—elephant स्रक्—(सृज्+क्विन्) garland अपवर्जिता—thrown away.

Analysis त्वया मही आत्महस्तेन अपवर्जिता। केन का इव ? मदच्युता मतङ्गजेन स्रग् इव। किम्भूता मही ? आखण्डल-तुल्य-धामभि. स्ववंशजै भूपतिभिः चिरम् अखण्डं धृता।

Prose-Order आखण्डलतुल्यधामभि' स्ववंशजै' भूपतिभि चिरम् अखण्ड धृता मही, त्वया मदच्युता मतङ्गजेन स्रग् इव, आत्महस्तेन अपवर्जिता ।

Bengali. ইন্দ্রের ন্যায় পরাক্রান্ত নিজবংশসম্ভূত ভূপতিগণ কর্ত্তৃক দীর্ঘকাল সমগ্রভাবে পরিপালিতা পৃথিবীকে, মদস্রাবী হস্তী শুণ্ডদ্বারা যেরূপ মালাকে পরিত্যাগ করে, সেইরূপ স্বহস্তে আপনি পরিত্যাগ করিয়াছেন ।২৯

English. The earth, held all along undivided by kings of your own race who rivalled Indra in prowess (lit possessed prowess like that of Indra), is now thrown away by you with your own hand like a garland cast away by an elephant discharging ichor (with its trunk)

Elucidation Alas the depth of your folly ! Are you not

proud of the heroic achievements of your mighty ancestors—your ancestors who equalled Indra in valour? The vast earth they won with their arms and preserved intact with their might It has been the heritage in your family for centuries And instead of exerting all your strength, all your energy, all your resources for the maintenance of the sacred trust, you betray it of your own accord This noble heritage you throw away like an elephant in rut throwing away a perfumed garland placed on its head.

Word-Notes

अखण्डम्—न खण्डं भिन्नम् adv mod धृता, undivided, in its entirety समग्रं सकलं पूर्णम् अखण्डं स्यादनूनके—अमर ["अखण्डम् अविभक्तावयवं कृत्स्नम् इत्यर्थः। इति क्रियागतम् अखण्डत्वं धार्य्यमाणमहीगतम् अखण्डत्वं द्योतयति, कारककार्त्स्न्याधीनत्वात् क्रियाकार्त्स्न्यस्य।"]

आखण्डल-तुल्य धामभि—आखण्डलेन तुल्यम् (३या तत्) आखण्डलतुल्यम् आख० धाम येषां (बहु) तैः a j. to भूपतिभि This epithet indicates that the kingdom though handed down from father to son was held by his ancestors through prowess and not through philosophic resignation यथा खड्गधारिणा हृत इत्युक्ते धृतेन खड्गेन हृत इति प्रतीयते, तद्वत् अत्रापि पराक्रमेण एव मही तैर्धृता न तु शमेन इति व्यज्यते।

चिरम्—अव्यय। अत्यन्तसंयोगे द्वितीया। चिराय चिररात्राय चिरस्याद्याश्चिरार्थका.। धृता—धृ+क्त (कर्म्मणि)। भूपतिभि.—अनुक्त कर्त्तरि तृतीया। भुव. पतय (६तत्) तैः। भूपति is declined like मुनि।

स्ववंशजैः—स्व. वंश' (कर्म्मधारय तस्मात् जायन्ते इति स्ववंश+जन्+ड (कर्त्तरि) adj to भूपतिभि।

आत्महस्तेन—आत्मन' हस्त तेन (with your own hand) In the case of the elephant हस्त means 'trunk' "Here she indirectly refers to gambling in which the dice are thrown with the

hand'—Prof Kale. ['ननु द्विषता हृता मही न मया त्यक्ता' इति राज्ञः शङ्काम् अपाकरोति— 'आत्महस्तेन" इति। चतुर्विधो हि त्यागः—(1) मनसा (2) चक्षुषा (3) वचसा (4) हस्तेन इति। तत्र हस्तकरणत्यागः स्फुटतर इति महीत्यागस्य स्फुटतरत्वं द्योतयितुं त्यागे हस्तः करणत्वेन उक्त, न चक्षुरादि। अभिच्छिरण्यादिपणीकरणे द्यूते च करणभूतः करः महीत्यागेऽपि करणमेव इति भाव.। नदीवेगादिप्रवृत्तस्य हस्त इव तव हस्तो न परतन्त्र अपि तु स्वतन्त्र एव इति द्योतयितुम् आत्मेति हस्तविशेषणं कृतम् ।—CHITRABHANU]

मही—"महीशब्देन त्यागविषयस्य अनल्पत्व द्योत्यते"। उक्ते कर्म्मणि प्रथमा।

मदच्युता—मद + च्युत् + क्विप् (कर्त्तरि) 3/1 adj to मतङ्गजेन—मतङ्ग + जन् + ड (कर्त्तरि)। अनुक्ते कर्त्तरि तृतीया।

स्रक्—उक्ते कर्म्मणि प्रथमा। सृज् + क्विन् (कर्म्मणि) "ऋत्विग् दधृक्-स्रग्-दिग्-उष्णिग् अञ्चु युजि क्रुञ्चा च" (३।२।५९) इति निपात्यते (from सृज् to twist cf wreath from A S wridhan 'twist')

अपवर्ज्जिता—अप + वृज् + णिच् + क्त (कर्म्मणि) cast away "यथा महाद्रिशिरसि महानदीम् इव, महागजमस्तके शोभातिशय पुष्यन्ती पुष्पमालां मदान्धेन मतङ्गजेन निरस्तां निरीक्ष्य लोकः शोचति, तद्वत् सामान्यगुणान्वितेन कृतार्थताभ्रान्तिविगलितविवेकेन भवता अपवर्ज्जिता वसुमती विलोक्य सकललोको विलपति॥"

घण्टापथः—"अखण्डम्" इति। आखण्डल तुल्य धामभिः इन्द्रतुल्यप्रभावैः। 'धाम रश्मौ गृहे देहे स्थाने जन्म-प्रभावयो.' इति हैम. *। स्ववंशजैः भूपतिभि.' भरतादिभि 'चिरम्' 'अखण्डम्' अविच्छिन्नं 'धृता' मही त्वया'। मदं च्योतति इति मदच्युत् क्विप्, तेन [मदच्युता] मदस्राविणा 'मतङ्गजेन स्रग् इव' 'आत्म-हस्तेन स्वकरेण स्वचापलेन इत्यर्थः। 'अपवर्ज्जिता' परिहृता त्यक्ता। (1) स्वदोषाद् एवायम् अनर्थागम. इति भावः।

(1) You have only yourself to thank for this advent of misfortune.

* This quotation from the अनेकार्थसंग्रह of Hemachandra is dropped in A and in the N. S. Press ed.

Extracts from other Commentaries.

"सामान्यवाचिनः शब्दा भवन्ति श्रेष्ठगामिनः" इति न्यायेन मतङ्गजशब्दो मतङ्गश्रेष्ठ महेन्द्रोपवाह्यम् ऐरावत विषयीकर्तुं शक्नोति । तद्वैव स्रक्शब्दोऽपि तेनैव न्यायेन प्रशस्ततमाया मालायां वर्तते । यथा मतङ्गजेन गजश्रेष्ठेन ऐरावतेन स्रक् प्रशस्यतमा माला अपवर्ज्जिता दूरं क्षिप्ता तथा वसुमती त्वया सन्त्यक्ता इति वाच्य. अर्थ । प्रतीयमानस्तु भूयान् । तथाहि—विनयावनतया विद्याधराङ्गनया सादर दत्ताम् उत्तमां स्रज सगृह्य, गुणवती इय माला महागुणाय एव दातव्या इति विमृश्य भुवनेषु सञ्चरता दुर्वाससा मुनीन्द्रेण सा मार्गदृष्टाय महेन्द्राय दत्ता । ततो महेन्द्रो मुनिदत्ता महनीया मालाम् आदाय द्विपाधिराजस्य निजोपवाह्यस्य ऐरावतस्य मस्तके न्यस्तवान् । ऐरावतस्तु तस्या. स्रजो गुण-विशेष, तस्य मुनीन्द्रस्य महानुभावता दारुणरोषता च अवगच्छन्नपि * नियतिनियन्त्रितमतिर्महनीयां माला महीतले क्षिप्तवान् इति प्रतीयमानेन दृष्टान्तगतेन अर्थेन विपश्चिता विवेकिना अपि त्वया विधिप्रणुन्नेन परिपाल्या वसुमती परित्यक्ता इति दार्ष्टान्तिकगतोऽर्थं द्योत्यते ।

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधान्
असंवृताङ्गान् निशिता इवेषवः ॥ ३० ॥

---

* It is hardly correct to say that his mind was entirely influenced by fate He was under great excitement and consequently did not know what he was doing (Vide Vishnu Purana 1 9 10) Exactly the same was the case with Yudhishthira He was blinded by his passion for dice which landed him in disaster

Prose-Order ये मायाविषु मायिनः न भवन्ति ते मूढधियः पराभवं व्रजन्ति । हि शठाः तथाविधान् असंवृताङ्गान् निशिताः इषवः इव प्रविश्य घ्नन्ति ।

Bengali. "লভে সদা পরাভব সেই মূঢ়মতি
ধরে যে সরলভাব কুটিলের প্রতি ।
নাশে তারে শঠগণ, প্রবেশি শরীরে
নাশে যথা তীক্ষ্ণ শর বর্ম্মহীন নরে ॥" নবীনচন্দ্র

English. Those dull witted men meet with defeat who do not practise deception on the deceitful, for artful persons entering into (the confidence of) such persons destroy them, as sharp arrows penetrating the body destroy those whose limbs are bare (i. e. unprotected with armour)

Elucidation. Fools are they that meet fraud with honesty and share the fate of all fools viz defeat In our encounter with unscrupulous rogues, deceit serves as our coat-of-mail If we are frank and honest with these people and do not avail ourselves of the service of this splendid armour, these artful people are sure to ingratiate themselves into our confidence and thus finding out all our weak spots compass our ruin, just as sharp arrows penetrate beyond the surface into the interior of the body of a person, not under the protection of the armour and cause his death

"The acts of the state cannot be judged by the standard of individual morality If the state wished to conform to this standard, it would often find itself at variance with its own particular duties. The morality of the state must be judged by the nature and *raison d'etre* of the state, and not of the individual citizen. But the end-all and be-all of a state is power, and 'he who is not man enough to look

this truth in the face should not meddle in politics" BHERNHARDY, *Germany and the Next War*, *Chap. II*

"The present manner of living is so different from the way that ought to be taken that one who neglects what is done to follow what ought to be done will sooner learn how to ruin than how to preserve himself, for a tender man and one that desires to be honest in everything, must needs run a great hazard among so many of a contrary principle. Therefore it is necessary for a prince who is willing to subsist to harden himself and learn to be good or otherwise according to the exigence of his affairs" MACHIAVELLI, *The Prince*, *Chap XV*

"A prince, therefore, who is prudent, cannot and ought not to keep his parole, when the keeping of it is to his prejudice, and the cause for which he promised removed Were men all good this doctrine was not to be taught, but because they are wicked and not likely to be punctual with you, you are not obliged to any such strictness with them, nor was there ever any prince that wanted lawful pretence to justify his breach of promise . . Nevertheless it is of great consequence to disguise your inclination and to play the hypocrite well. *Ibid Chap XVIII*.

Word-Notes.

व्रजन्ति—व्रज + लट् अन्ति लुङ्—अव्राजीन्तत्। सर्वे गत्यर्थाः प्राप्त्यर्थाः ज्ञानार्थाश्च।

मूढधिय.—मूढा धीः, येषां ते मूढधियः (बहु)। मुह् + क्त (कर्त्तरि)—मुग्ध or मूढ। ध्यायति अनया इति ध्यै + क्विप्—धीः।

The epithet मूढधी is tautologous, for मूढ by itself means dull-witted मोहनाम्न मूढत्वस्य बुद्धिधर्मत्वात् धीशब्दस्य पौनरुक्त्यम्।

तथा अवगच्छति मूढचेतन: प्रियनाशं हृदि शल्यमर्पितम्" [रघु० ८।८८] इति कविकुलचूडामणे प्रयोगोऽपि स दोष एव।

पराभवम् - परा + भू + अप् (भावे).

मायाविषु 7/3—विषये ७मी। माया अस्ति एषाम् इति माया + विन् (अस्त्यर्थे माया + इन् = मायिन् and माया + मतुप् = मायावत्।

तथाविधान् - तथा विधा (प्रकार) येषा ताम् (बहु)। तद् + थाल् = तथा।

असंवृताङ्गान्—संवृतानि (completely covered or protected) अङ्गानि येषां ते संवृताङ्गा., न संवृताङ्गा', (नञ् तत्) तान्।

निशिता—नि + शो तनूकरणे (to whet) + क्त (कर्मणि) Alt form निशात। 'शाच्छोरन्यतरस्याम्" (पा ७।४।४१) इति वा इत्वम्।

इषव.—इष्यति इति इषु: (इष् to go + उ कर्तरि) arrow.

घण्टापथ:—स्वदोषाद् एव अयम् अनर्थागम. इत्युक्तम्। स च दोष. कुटिलेषु अकौटिल्यम् एव इत्याह—'व्रजन्ति" इति। 'मूढ धिय' निर्विवेकबुद्धय 'ते पराभव व्रजन्ति ये' 'मायाविषु' मायावत्सु विषये। "अस् माया-मेधा——" [पा ५।२।१२१] इत्यादिना विनि-प्रत्यय.। 'मायिन:' मायावन्त: (1) व्रीह्यादित्वात् इनि प्रत्यय.। 'न भवन्ति'। अत्रैव अर्थान्तर न्यस्यति—— "प्रविश्य" इति। 'शठा.' अपकारिणो धूर्ता तथाविधान्' अकुटिलान् 'असंवृताङ्गान्' अवर्मितशरीरान् 'निशिता. इषव. इव' 'प्रविश्य' प्रवेश कृत्वा, आत्मीया भूत्वा घ्नन्ति हि। (3) "आर्जव हि कुटिलेषु न नीति:" [Nai V 103] इति भाव:।

(1) अस्-माया-मेधा-स्रजो विनि:—the suffix विन् is added optionally to words ending in अस् and to माया, मेधा and स्रज् in the sense of अस्ति, as, पयस्वी, मायावी, मेधावी, स्रग्वी. As this is optional we have also the forms मायावान् and मायी (2) इन् is added to माया in the sense of अस्ति by the rule व्रीह्यादिभ्यश्च (पा ५।२।११६)—व्रीह्यादिभ्य' प्रातिपदिकेभ्य: इनि ठनौ प्रत्ययौ भवत: मत्वर्थे, मतुप् भवत्येव। व्रीही। व्रीहिक:। व्रीहिमान्। मायी, मायिक, मायावान् (also मायावी) (3) Frankness is not the policy (to be pursued) towards the crooked

Extracts from Chitrabhanu.

ते "पराभवं व्रजन्ति" इत्युक्तम्, न तु तान् पराभवो व्रजतीति। तेन पराभवप्राप्तावमायिनां स्वातन्त्र्यावगमात् स्वप्रवृत्तिकृत: पराभवो न परप्रवृत्तिदैवादिकृत इति द्योत्यते। "मूढधिय" इत्युक्तम्, न तु मूढमनस.। तेन मूढस्य सङ्कल्पविकल्परूपस्य मनसो बुद्धिरालम्बनं भवेत्। सा बुद्धिरेव येषां मूढा विपर्यस्ता तेषां किमालम्बनमिति द्योत्यते।

इषव इवेति। यथा निशितास्तीक्ष्णतरा इषव. शरा अभ्युद्यतान् अनामुक्तकवचान् प्रकटतरवक्षोहृदयाद्यवयवान् प्रविश्य अपुनरुत्थानाय हिंसन्ति तथेत्यर्थः।

अयमभिप्राय —विदुरादिमुखेन गुरुशासनं निवेद्य तत्कर्तव्यताप्रत्ययमुत्पाद्य त्वाम् अमायिन सर्वस्वपणे द्यूते प्रवर्त्य छद्मना जितवन्त. शकुन्यादयो नृशसा: पुनरपि भवतोऽभिप्रायभङ्गादिपरिभवम् इहागत्य प्रमादेऽवश्याहित वा कुर्युरिति। निशिता अपि शरा स्वयमचेतना: वेदपुरुषायत्तवेगगतयो व्यंसनच्छेदनादिसमर्था यथा कदर्थीक्रियन्ते, तथैव तीक्ष्णस्वभावा सुयोधनादय. स्वल्पतरबुद्धिबलशक्तयो भीष्माद्यायत्तप्रवृत्तिवेगा सर्वातिशायिप्रवृत्तिशक्तिभिरस्माभि. बाधितु शक्या इत्ययं चार्थ इषुदृष्टान्तेन द्योत्यते। अन्यथा द्विषत्सु मायाविष्वार्जवेनास्माकं कार्यसिद्धिर्न स्यादिति तात्पर्यार्थ.।

गुणानुरक्तामनुरक्तसाधन:
कुलाभिमानी कुलजां नराधिप: ।
परैस्त्वदन्य: क इवापहारयेन्-
मनोरमामात्मवधूमिव श्रियम् ॥ ३१ ॥

English Equivalents.—गुणानुरक्ताम् [गुणै (1) सन्धिविग्रहादिभि:, (2) सौन्दर्यादिभि. अनुरक्ताम् अनुरागिणीम्] (1) श्रीपक्षे—attached to him because of (his proper application) of the (six) political expedients, (2) वधूपक्षे—attached to him for his excellences such as beauty, valour etc अनुरक्तसाधन —अनुरक्त साधन (सहाय.) यस्य स.—who has allies devoted to him कुलाभिमानी—possessed

of the 'boast of heraldry', proud of his lineage. कुलजाम्—(1) hereditary, (2) सद्वंशे—sprung from a noble family. परैः अपहारयेत् (अप+हृ+णिच्+लिङ् यात्) would cause others to rob क इव ?—who possibly ?

Analysis.—त्वदन्यः क इव जनाधिप, परैः श्रियम् अपहारयेत् ? किम्भूतः जनाधिप ? (1) अनुरक्तसाधनः (2) कुलाभिमानी किम्भूतां श्रियम् ? (1) गुणानुरक्ताम् (2) कुलजाम् (3) मनोरमाम् आत्मवधूम् इव।

Prose-Order —अनुरक्तसाधन कुलाभिमानी त्वदन्य क इव नराधिप, गुणानुरक्तां कुलजां मनोरमाम् आत्मवधूम् इव श्रिय परैः अपहारयेत्।

Bengali আপনি ভিন্ন কোন অনুকূলসহায়যুক্ত আভিজাত্যাভিমানী নরপতি গুণানুরক্ত প্রশস্তবংশোৎপন্ন মনোহারিণী স্বীয় পত্নীর ন্যায় সন্ধিবিগ্রহপ্রভৃতি গুণের যথাযথপ্রয়োগদ্বারা জাতানুরাগা, কুলক্রমাগতা, মনোহারিণী রাজলক্ষ্মীকে শত্রুদ্বারা অপহরণ করাইবেন ?

English Though possessed of devoted followers and the pride of a heroic race, which king other than thyself would allow his royal glory to be snatched away by his enemies—his royal glory which is attached to him because of his judicious employment of the six political expedients and which is a noble heritage in his family and gratifying to his heart like unto his own wife lovely, devoted to his merits and come of a noble family

Elucidation Think for a moment of the enormity of your crime. You have practically encouraged your enemies to snatch away the Goddess of Royal Fortune from your grasp, just as you allowed Duhsasana to carry me away and drag me through the mire Was the Goddess of Royal Fortune disaffected towards you that you felt rather relieved than otherwise at her abduction ? No, she was most devotedly attached to you because of your judicious application of the six political expedients just as a wife is

attached to her husband because of his beauty, valour etc Were your subjects disloyal to you that you found it beyond you power to protect her from the aggression of powerful enemies ? No they were most loyal and devoted to you Did you win her only recently that she being a stranger you did not particularly mind losing her ? No, she had been in the family for generations, and was as dear as a wife sprung from a noble family Are you a *Paramahamsa* that does not glory in his noble descent that you could forget so for the noble traditions of your family ? No, your breast so full of the boast of heralday. And is she not like your own wife of fair form and rare charms. sprung from a noble family and possessed of the most deep-rooted affection for you ? What extenuating circumstances can you then plead for your criminal neglect ? What justification do you offer for your execrable conduct ? Is there another king on the face of the earth who would have acted as you did, who would have allowed his enemies to snatch away a charming and affectionate, noble and devoted wife from under his very nose without lifting a finger to protect her ? I pause for a reply

Word-Notes.

गुणानुरक्ताम्—' गुणे (शौर्य्यवीर्य्यादिभि) अनुरक्ताम् (सततम आरूढ-प्रणयाम), – क्षणमात्रवियोगमपि असहमानाम् इत्यर्थं ' चित्रभानु । This suits both cases Or, with Mallinatha गुणे सौन्दर्यादिभि (in the case of वधू) and सन्धिविग्रहादिभि (in the case श्री) गुणो जरासून तन्तुष । रज्ज्वौ सत्त्वादौ सन्ध्यादौ शौर्य्यादौ भौम इन्द्रिये । रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे" —हैम । अनुरक्त—अनु + रञ्ज् + क्त (कर्त्तरि)। रजति, ररञ्ज अराङ्क्षीत् रङ्क्ष्यति Also Atm. लुङ् अरङ्क्त । अनुरक्तसाधन — अनुरक्त (सततस्निग्धम्) साधनं (करणम् अमात्यजनपद-सेनादि or भ्रातृसम्पत्) यस्य सः (बहु)।

कुलाभिमानी – कुलस्य (वंशस्य) अभिमान (गर्व्व) स विद्यते अस्य इति—

कुलाभिमान+इन्। N. B. कुल–वंश, but कूल=तट। "गर्वोऽभिमानोऽहङ्कारः"—अमरः।

कुलजां (i) कुले (स्वकीये वंशे) जाताम् कुलक्रमागताम् इत्यर्थः (कुल+जन्+ड (कर्त्तरि) (ii) प्रशस्ते कुले जाताम्।

परैः—शत्रुभिः 'हृक्रोरन्यतरस्याम्'' इति अणि कर्त्तरि पाक्षिकी तृतीया Alt. form—परान् The rule means that in the case of the roots हृ and कृ that which was the nom in the non-causal form becomes acc. optionally in the causal, भृत्य कटं करोति, भृत्यं भृत्येन वा कटं कारयति, परे श्रियम् अपहरेयुः, परान् परैर्वा श्रियम् अपहारयेत्।

मनोरमाम् 2/1—मनस्+रम्+णिच्+अण् (कर्त्तरि), स्त्रियां टाप्। स्वदन्य. may be regarded as a पञ्चमीतत्पुरुष compound, or (with M) as two separate words पर श्रेष्ठारिदूरान्योत्तरे क्लीब तु केवले—मेदिनी।

क इव—who possibly, or इव may be regarded as an expletive (वाक्यालङ्कारार्थं); Or क इव may be regarded as a compound 'इवेन सह समासो विभक्त्यलोपश्च।' अपहारयेत्—अप+हृ+णिच्+सम्भावनाया 3/1. आलश्रियोऽपहारयितु. कस्यचिद् भूतस्य भवतो भाविनो वा न प्राप्ति. इति द्योतयितुम् अपहारयेत् इति सम्भावनार्थी लिङ प्रयुक्तः।

मनोरमाम्—मनो रमयति इति मन.+रम्+णिच्+अण् (कर्त्तरि), स्त्रियां टाप्।

Comparison Royal glory is here compared to one's own wife Both are attractive—one because of its splendour, the other because of her loveliness, both are कुलज, the one is a noble heritage, the other is of noble lineage, and both are equally devoted to the king—the one because of his judicious employment of the six means सन्धि, विग्रह, यान, आसन, द्वैधीभाव and समाश्रय, the other because of his beauty, valour and a thousand other merits

वचटापथः—(1) न च लक्ष्मीवाधकत्वात् अयमनर्थागम किन्तु *स्त्रोपेक्षा-

* स्त्रोपेक्षादोषमूलत्वात्—All.

दोषमूल: इत्याशयेन आह—'गुण' इति। अनुरक्तसाधनः' अनुकूलसहायवान्। उक्तञ्च कामन्दकीये (२,—

(2) उद्योगादनिवृत्तस्य सुसहायस्य धीमत.।
छायेवानुगता तस्य नित्य श्री. सहचारिणी ॥

इति। 'कुलाभिमानी' क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च। 'त्वदन्य.' त्वत्तोऽन्य.। (3) "अन्याराद्——" [पा २।३।२९] इत्यादिना पञ्चमी। 'क इव नराधिप.' गुणै: सन्ध्यादिभि सौन्दर्यादिभिश्च अनुरक्ताम् [गुणानुरक्ताम्] अनुरागिणी 'कुलजा कुलक्रमादागता कुलीना च 'मनोरमा 'प्रियम्' 'आत्मवधूम् इव'। 'वधूर्जाया स्नुषा स्त्री च" इत्यमर.। 'परै.' शत्रुभि अन्यैश्च अपहारयेत्' स्वयमेव अपहार कारयेत् इत्यर्थ.। (4) कलत्रापहारवत् लक्ष्म्यपहारोऽपि राज्ञा मानहानिकरत्वात् अनुपेक्षणीय इति भाव: ॥ ३१ ॥

(1) Nor is this misfortune due to the fickleness of royal glory, but to your own criminal negligence

(2) Royal glory becomes the constant companion o a prince who is untiring in his exertions, who has noble allies and who is possessed of great intelligence, and follows him like his own shadow.

(3) अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते—

(अन्य + आरात् + इतर + ऋते + दिक्शब्द + अञ्चूत्तरपद + आच् + आहि)
In connection with the words अन्य, आरात्, इतर, ऋते, or a word denoting direction or one having the root अञ्च् as its final element or the affixes आच् and आहि a word takes पञ्चमी ग्रामात् अन्य., वनात् आरात्, तस्मात् इतर , रमाद् ऋते, अश्वात् प्राक्

(4) The loss of royal glory, like the loss of wife is not to be tolerated by kings, as it entails loss of dignity

भवन्तमेतर्हि मनस्विगर्हिते
विवर्त्तमानं नरदेव ! वर्त्मनि: ।

कथं न मन्युर्ज्वलयत्युदीरित:
शमीतरुं शुष्कमिवाग्निरुच्छिख ॥ ३२ ॥

English Equivalents. एतर्हि—at present. वर्त्मन्—path. मन्यु—anger उदीरित—roused, excited उच्छिख.—with flames shooting upwards

Analysis हे नरदेव ! उदीरित मन्यु भवन्तं कथं न ज्वलयति ? किम्भूत भवन्तम् ? एतर्हि मनस्वि-गर्हिते वर्त्मनि विवर्त्तमानम्। क. कम् इव ? उच्छिख' अग्नि शुष्कं शमीतरुम् इव ।

Prose-Order हे नरदेव ! एतर्हि (इदानीम्) मनस्वि-गर्हिते (शूरजनजुगुप्सिते) वर्त्मनि (पथि) विवर्त्तमानम् (अवतिष्ठमानम्) भवन्तम् उदीरित (उद्दीपित) मन्यु (क्रोध), शुष्क शमीतरुम् उच्छिख (उद्गतज्वाल) अग्नि, इव, कथ न ज्वलयति ?

Bengali. হে নরপতি, মনস্বিজনঘৃণিত মার্গে আপনাকে এখন বিচরণ করিতে হইতেছে, ইহাতেও কি আপনার ক্রোধ উদ্দীপ্ত হইয়া অগ্নি যেরূপ শিখাবিস্তারপূর্ব্বক শুষ্ক শমীতরুকে প্রজ্বলিত করে সেইরূপ আপনাকে প্রজ্বলিত করিতেছে না ?

English Oh saintly monarch ! at present treading the path which heroes disdain to tread, why does not flaming wrath consume thee, just as tongues of fire bursting outwards consume the dried Sami tree ?

Elucidation The foremost spirit of the age, you are now trudging along paths which anybody with a grain of high spirit would disdain to tread Think of your conquests, glories and triumphs of the past and the life of a dog that you are leading in the present Does not the contrast of your noble past with your ignoble present stir you into activity

and prompt you 'to cry havoc and let slip the dogs of war?" Are you grown more inert than stocks and stones that even your present plight fails to touch you and so kindle the fire of wrath in your heart and consume you even as the tongues of fire shooting outwards consume the Sami tree Yudhishthira is compared to a Sami tree The fire of wrath burning within his breast is compared with the fire in the interior of the Sami tree. Just as the plant when dry manifests fire by means of attrition, so Yudhishthira who had been sucked dry by being deprived of all his possessions by blood sucking leeches in the shape of his kinsmen should manifest the fire of his wrath because of the indignities heaped on his devoted head by his enemies

Word-Notes.

भवन्तम्—obj to ज्वलयति । भा + डवतु = भवत् ।

मनस्वि गर्हिते—मनस्विभि गर्हित तस्मिन्, adj to वर्त्मनि । प्रशस्त मन: अस्ति अस्य इति मनस् + प्राशस्त्ये विन् । 'अस्-माया मेधा-स्रजो विनि" इति विनि (प्राशस्त्ये)। The स् of मनस् is not changed into *visarga* before this व, for the rule तसौ मत्वर्थे (पा १।४।१९) directs that before मत्वर्थीय affixes a word ending in त् or स् it not regarded as a *pada* but as भ, and hence the *sandhi* rule applicable to padas only does no apply Hence मनस्वी and not मनोवी. [The suffixes मतुप्, विन् etc are used in the following senses :

भूम निन्दा-प्रशंसासु नित्ययोगेऽतिशायने ।

सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादय ॥

(1) भूमा abundance, गावो बह्व: अस्य सन्ति इति गोमान् (एकस्य द्वयोर्वा विद्यमानत्वेऽपि गोमान् इति न व्यपदिश्यते—न्यास), (2) निन्दा (censure) कुष्ठी, (3) प्रशंसा (praise), as here, or प्रशस्तं रूपं यस्य अस्ति रूपवान् इति उच्यते (4) नित्ययोग (constant combination) as क्षीरिणो

(द्रष्टा.), नित्यः सम्बन्धः शेषां ते उच्यन्ते , (5) अतिशायन excess (quantitative). उदरिणी कन्या (यस्या अतिशयेन उदरमस्ति सा एवम् उच्यते) , (6) संसर्ग (connection or accompaniment) , दण्डी पुरुष. (दण्डसंसर्ग उच्यते तेन इह गृहस्थिते विद्यमानेऽपि दण्डे, दण्डीति नाभिधीयते) and (7) अस्तिविवक्षा – mere existence, as अस्तिमान् ।]

विवर्तमानम् – वि + वृत् + शानच् । वर्तते , ववृते , अवृतत्, अवर्तिष्ट ; वर्त्स्यति, वर्तिष्यते । [विवर्त as a technical term in Vedanta philosophy means an illusory appearance presented on a real substratum, an apparent or phenomenal change (as opp. to real or noumenal change which is विकार) Thus the idea of a serpent on seeing a rope in the dark is a विवर्त, whirlpools, bubbles and waves are the विवर्तs of water Mr Kale thinks there may be a shadow of this meaning here Dharma, no doubt, passed through the vicissitudes of his life without being affected by them, but this can hardly be the meaning intended by Draupadi]

ज्वलयति - nom मन्यु , obj. भवन्तम् Alt form ज्वालयति , [but प्रज्वलयति]

उदीरित —उत् + ईर् + क्त (कर्मणि) । ईरयति, ऐरिरत् &c

शमीतरुः—शमी नाम्न तरुः त (शाकपार्थिवादित्वात् समास), or शमी चासौ तरुश्च (कर्मधा) उतइन्तवत् समास. । The Sami plant is supposed to contain fire in its interior Sf शमीम् इवाभ्यन्तरलीनपावकाम (Raghu III 9) अग्निगर्भा शमीम् इव (Sak IV. 3) अरणीs or sticks of attrition were made of the branches of this tree Agni bearing the तेजस् of शिव felt itself consumed by its terrible heat and took shelter successively in the waters, the Asvattha tree and the Sami tree where he was discovered by the gods Thenceforward the Sami tree became the permanent abode of Agni.—*Mahabharata* अनुशासनपर्व 2 The Bhrigus cursed Agni to be *Sarvabhaksha* He hid himself out of fear in the interior of the Sami-tree where he was discovered by the gods and taken back—*Mahabharata*

गह्वापर्थं । 3 The Goddess Parvati, being one day under strong passion, reposed on the trunk of the Sami-tree whereby an intense heat was generated in the interior of the wood, which ever after broke into a sacred flame on the slightest attrition. Cf कैलसाद्रि., वसन्तसमय, चन्दनतरु. etc

उच्छिख.—उद्गता शिखा यस्य स (बहु) Alt form—उद्गतशिखः. Rule : **प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः"** (पा २।२।२४ वा)— 'प्रादिभ्यः परं यत् धातुज प्रकृतिक-प्रथमान्त' तस्य अन्येन प्रथमान्तेन बहुव्रीहि' वाच्यः। तत्र बहुव्रीहौ प्रादिभ्य परस्य उत्तरपदस्य धातुजस्य लोपश्च विकल्पेन वाच्य '—बालमनोरमा। A word which is formed from a root (by a कृत् affix) and which follows an उपसर्ग constitute a Bahuvrihi comp with another word, and in such a case, the word formed with the कृत् affix is optionally dropped

घण्टापथः ।—अथ दृशभि. कोपोद्दीपन करोति—' भवन्तम्" इति। हे 'नरदेव' ! नरेन्द्र ! 'एतर्हि' इदानीम् अस्मिन् आपत्कालेऽपि इत्यर्थः। "एतर्हि सम्प्रतीदानीम् ना साम्प्रत तथा" इत्यमर । (2) ' इदमोर्हिल्" [पा ५।३।१६] इति र्हिल् प्रत्यय । (2) "एतेतौ रथो." [पा ५।३।४] इति एतादेश'। आपद्सेवाह— मनस्वि गर्हिते शूर-जनजुगुप्सिते 'वर्त्मनि मार्गे 'विवर्त्तमानम्' अत्र कृता दुःखाम् अनुभवन्तम् इत्यर्थः। 'भवन्तम्' त्वाम् 'उदीरित ' उद्दीपित. 'मन्यु ' क्रोध 'शुष्कं नीरसम्। (3) "शुष' क " [पा ८।२।५१] इति निष्ठातकारस्य ककार । शमी चासौ तरुश्च इति विशेषणसमास , तम् [शमीतरुम्] (4) शमीग्रहण शीघ्रज्वलनस्वभावात् कृतम्। 'उच्छिख ' उन्नतज्वाल । (5) "छवि ज्वाले अपि शिखे ' इत्यमर । 'अग्निरिव' वह्निरिव 'कथ न ज्वलयति' ? ज्वलयितुम् उचितम् इत्यर्थ । (6) "मिता ह्रस्वः" [पा ६।४।९२] इति ह्रस्व ॥३२॥

(1) The suffix र्हिल् is added to इदम् *when it ends in सप्तमी* and denotes time र्हिल् supersedes ह Thus अस्मिन् काले एतर्हि but अस्मिन् स्थाने इह। (2) [By the rule इदम इश् , इ is substituted

for इदम् before a प्राग्दिशीय affix, but the rule एतेतौ रथोः supersedes the previous rule and directs that] before a प्राग्दिशीय affix beginning with र or थ, एत and इत are to be substituted respectively for इदम् Thus इदम् + र्हि = एत + र्हि = एतर्हि , इदम् + थम् = इत् + थम् = इत्थम्। (3) After the root शुष्, the त् of the past part is changed into क् , शुष् + क्त = शुष् + क = शुष्क। (4) The poet does not say शुष्कं तरुम् इव but mentions the Sami-tree specifically, because it is very highly inflammable by nature (5) शिखा means रश्मि (ray) and ज्वाला (flame) (6) Before the causal affix णिच्, roots technically known as मित् shorten their penults मितो धातवः, "घटादयो मित" इत्येवमादयो ये प्रतिपादितास्तेषाम् उपधाया ह्रस्वो भवति णौ परत । व्यथयति instead of व्याथयति, जनयति instead of जानयति, रजयति &c ज्वल is included under घटादि hence it is मित् But the rule "ज्वल-ह्वल ह्मल-नमाम् अनुपसर्गाद् वा' (ग स १८९) directs that these four roots are optionally मित् when not preceded by an उपसर्ग So ज्वलयति and ज्वालयति but प्रज्वलयति (and not प्रज्वालयति).

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥

English Equivalents अवन्ध्यकोपस्य -whose anger is not barren अमर्ष—intolerance, deep seated anger, wrath हार्द—affection. आदर.—respect.

Prose-Order अवन्ध्य-कोपस्य [अत एव] आपदां विहन्तु' देहिनः स्वयमेव वश्या. भवन्ति। अमर्ष-शून्येन जन्तुना जातहार्देन सता जनस्य आदरो न, विद्विषा च [सता] आदरो न, or जातहार्देन सता जनस्य आदरो न विद्विषा च सता दरो (भयं) न ।

Bengali. যাঁহার কোপ নিষ্ফল নয়, সুতরাং যিনি সমস্ত বিপদের বিনাশ করিয়া থাকেন, লোকে আপনা হইতেই তাঁহার বশীভূত হয়। [আর] ক্রোধশূন্য পুরুষ মিত্র হইলেও লোকে তাঁহার সমাদর করে না, শত্রু হইলেও তাঁহাকে গ্রাহ্য করে না, অথবা ক্রোধশূন্য পুরুষ মিত্র হইলেও লোকে তাঁহার সমাদর করে না, আর শত্রু হইলেও লোকে তাঁহার সমাদর করে না। [এরূপ পুরুষের রাগ ও দ্বেষ অকিঞ্চিৎকর ।]

English Men spontaneously submit to those who show no empty rage and who always overcome their troubles But for a faint, forgiving creature whether friendly or otherwise, one feels neither respect nor fear.

Elucidation It is manliness, courage, spiritedness that command respect everywhere People readily yield to a person who when his anger is once excited never rests till he has inflicted injury on the object of his wrath and who never permits the slightest insult without avenging it His friends respect him, for he will be of service to them when neccesity arises, and his foes are in perpetual dread of him A spiritless fellow, on the other hand, who patiently puts up with all wrongs without lifting a finger to punish the wrong-doers is looked down upon by friend and foe alike His friendship or enmity is negligible, for the one cannot help nor the other injure

Word-Notes.

अवन्ध्यकोपस्य—न वन्ध्य अवन्ध्य, अवन्ध्य कोप. यस्य स (बन्धु), तस्य। वन्ध्य lit sterile वन्ध + ण्यत् (कर्म्मणि)। वि + हन् + शीलार्थे तृन्—विहन्तृ then 6/1 आपदाम्—आ + पद् + क्विप् भावे, शेषे षष्ठी न तु कृद्योगलक्षणा षष्ठी, "न लोकाव्ययनिष्ठा—" इत्यादिना कर्म्मणि षष्ठ्या निषेधात्। ["अनिर्ज्जयेन द्विषतां यस्यामर्षः प्रशाम्यति" स वन्ध्यकोप.। 'शुष्केन्धनमिरिवामर्षी यैरारातिषु पात्यते"

ते अवन्ध्यकोपाः। For a similar use of अवन्ध्य Cf इयेष सा कर्तुम् अवन्ध्यरूपताम्—Ku. V 73].

अमर्ष-शून्येन—अमर्षेण शून्य. (३या तत्.) तेन। नञ्+मृष्+घञ् (भावे)—अमर्ष।

जनस्य—कर्त्तरि षष्ठी, आदर इत्यत्र कृद्योगात्।

जन्तुना—जन्+तु.(कर्त्तरि)। "प्राणी तु चेतनो जन्मी जन्तु-जन्यु-शरीरिणः"—अमर। "कन्यया शोकः" इतिवत् हेतौ तृतीया।

जातहार्द्देन—जात हार्द्दं यस्य तेन (बहु)। हार्द्दम्—हृदय+अण्।

आदर :—Cf नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान् पुमान् XI 73

घण्टापथः—(1) ननु अन्त.शत्रुत्वात् अयं क्रोध त्याज्य एव इत्याशङ्क्य आह—"अवन्ध्य" इति। अवन्ध्य कोपः यस्य तस्य 'अवन्ध्यकोपस्य', अत एव 'आपदा विहन्तु.' निग्रहानुग्रहसमर्थस्य पुंस. इति शेष.। 'देहिन' जन्तव 'स्वयमेव' वश्यता ' वशङ्गता 'भवन्ति'। (2) "वशङ्गत" [पा ४।४।८६] इति यत्-प्रत्यय.। अतस्त्वया कोपिना भवितव्यम् इत्यर्थं। (3) व्यतिरेके तु अनिष्टम् आचष्टे—'अमर्षशून्येन' निष्कोपेण 'जन्तुना'। "कन्यया शोक" इतिवत् "हेतौ" [पा २।३।२३] इति तृतीया। हृदयस्य कर्म्म हार्द्दं स्नेह.। (4) "प्रेमा ना प्रियता हार्द्दं प्रेम स्नेहः इत्यमरः। (5) युवादित्वाद् अण् [ref पा ५।१।१३०]। "हृदयस्य हृल्लेखयदण्लासेषु" [पा ६।३।५०] इति हृदादेश.। जातहार्द्देन जातस्नेहेन सता जनस्य आदरो न। 'विद्विषा' द्विषता च सता आदरो न। अमर्षहीनस्य रागद्वेषौ अकिञ्चित्करत्वात् अगण्यौ इत्यर्थ.। अथवा विद्विषा सता दरो भय न। (6) "दरोऽस्त्रियां भये श्वभ्रे" इत्यमर.। (7) एतस्मिन्नेव प्रयोगे सन्धिवशाद् द्विधा पदच्छेदः। * पुवाक्येषु न दोष। अत. स्थाने कोप कार्यः, त्याज्यस्तु अस्थाने कोपः इति भाव ॥३३॥

(1) Now this anger (you are speaking of) is to be shunned, as it is one of the internal (deadly) enemies—anticipating this objection he says (1) The suffix यत् is

* Cf. न च पुंवाक्येषु अनेकार्थत्वं दोषाय—M under Sis II. 43.

added to the word वश ending in द्वितीया in the sense of गत. Thus वशं गतः वश्य.। कामप्राप्तो विधेय इत्यर्थः। (3) व्यतिरेक—on the contrary supposition. अनिष्ट—evil, disaster आचष्टे—आ + चक्ष् + लट् ते—speaks

(4) प्रेमन् masc प्रियता, हार्द, प्रेमन् (n) and स्नेह are synonymous (5) हृदय + अण्=हार्द। अण् is added by the rule हायनान्तयुवादिभ्योऽण् (see sl 9) Before the affixes यत् and अण् and the words वास and लेख, हृदय is changed into हृद्, thus हृदय + अण् = हृद् + अण् = हार्द् + अ = हार्द (6) दर m n means भय and श्वभ्र (a hole, cavity) (7) M suggests the following alternative construction अमर्षशून्येन जन्तुना जातहार्देन सता जनस्य आदरो न, विद्विषा च सता जनस्य दरो न—thus in the same sentence he breaks up विद्विषादर first into विद्विषा आदर construing आदर. with जनस्य and in the same breath he breaks it up into विद्विषा दर, construing दर. with the second half This sort of indiscriminate breaking up of the *same* word *simultaneously* in two different ways is open to objection in the Vedas but not in classical Sanskrit In the Vedas, the पदपाठ directs how the words are to be broken into their component parts and since it analyses one word in *one* way we cannot according to our sweet will break it up in other ways पुंवाक्येषु—पौरुषेयवाक्येषु as opp to वैदिकवाक्येषु Cf Sabdakaustubha p 87 न चैवमनाम्नायस्यानेकार्थत्वमित्यस्य निर्विषयता। पौरुषेयसङ्केतनिरपेक्षस्य प्रसिद्धतरसम्बन्धस्य विना प्रमाणं बहुषु न कल्पनमिति तदर्थात्।

The process by which the same word is made to yield different meanings simultaneously is known as तन्त्र Here by तन्त्र on the part of the writer and आवृत्ति of the word दर on the part of the hearer we arrive at the following construction अमर्षशून्येन जन्तुना जातहार्देन सता जनस्य आदरो न विद्विषा च सता जनस्य दरो न। (Vide शब्दरत्न on इदन्त्वाम् and M. on Ki IX 60) Cf. चित्रभानु—

केचित् आदरशब्दं दरशब्दं च तत्रैव प्रयुक्तं मन्यमाना: जातहार्देन इत्यनेन आदरशब्दं विद्विषा इत्यनेन भयार्थं दरशब्दं योजयन्ति। एकेनैव शब्देन समीहितसिद्धौ द्वयो: कल्पनम् इति तेषां कल्पनागौरवं स्यादेव।

Remarks. Mammatabhatta, the author of the Ka ya-prakasa takes अमर्षशून्येन as opp to अवन्ध्यकोपस्य and जन्तुना as opp to आपदां विहन्तु: by which last phrase he understands दारिद्र्यस्य नाशकस्य, consequently जन्तु must mean अदाता a niggardly person who makes no gifts, but जन्तु cannot mean this Hence this sloka is, acc to him, open to the fault of अवाचकत्व It is clear from the context, however, that आपदां विहन्तु: here does not refer to one who removes poverty by means of his munificence but who avenges wrongs by means of his heroism जन्तु here refers to a spiritless fellow—one who is merely born but who is not worthy of the name of man.

Mahimabhatta remarks that the sloka will be greatly improved if we read न विद्विषा भी: सुहृदा च नादर. for the last line.

परिभ्रमंल्लोहितचन्दनोचित:
पदातिरन्तर्गिरि रेणुरूषित:।
महारथ: सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदर:॥ ३४॥

Prose-Order [पूर्वं] लोहितचन्दनोचित महारथ. अयं वृकोदर. (अधुना) रेणुरूषित. पदाति. अन्तर्गिरि परिभ्रमन् सत्यधनस्य [ते] मानसं नो दुनोति कच्चित्।

Bengali. পূর্ব্বে যিনি রক্তচন্দন ব্যবহারে অভ্যস্ত ছিলেন, আজ তাঁহার দেহ ধূলিধূসরিত, পূর্ব্বে যিনি মহারথ আরোহণ করিয়া ভ্রমণ করিতেন, আজ তিনি পাদচারে গিরিমধ্যস্থ দুর্গম প্রদেশে ইতস্ততঃ বিচরণ করিতে-

ছেন ; সত্যধন আপনি । এই বৃকোদরকে দেখিয়াও কি আপনার মনে কষ্ট হয় না ?

English. Wandering about through mountain-paths and covered with dust though used to grand chariots and red sandal paste, this Bhima, I think, does not trouble your mind at all, the son of virtue that you are

Elucidation Does not this Bhima whose body used to be anointed with red sandal-paste but is now covered with dust, who used to drive in splendid chariots but now plods his weary way on foot in this mountain-country cause pain to your mind ? It is evident you care only for truth and not for your brothers

Word-Notes

परिभ्रमन्—परि + भ्रम् + शतृ I/1 Alt form परिभ्राम्यन् । लुङ् अभ्रमीत् , लिट्, बभ्राम, बभ्रमतु भ्रेमतु etc There is another भ्रम् which is दिवादि , लट् भ्रमति भ्राम्यति , लुङ् अभ्रमत् etc शतृ – भ्राम्यन् ।

लोहितचन्दनोचित.—लोहित चन्दन (कर्मधा) (1) तत्र or तस्य उचितः (सप्तमी or षष्ठीतत्), or (11) उचित लोहितचन्दन यस्य स (बहु) Here उचित should have been placed first, being a past participle, but the order is optionally reversed by the ruleवाहिताग्न्यादिषु ; Cf सुरापीत , पीतसुर., जढ़भार्य , भार्योढ़ नृजाध , जाधनृक &c परिभ्रमन् + लोहित=परिभ्रमल्लोँहित, the न् being changed to ल nasal before ल An instance of assimilation Rule तोर्लि—८।४।६० तु means तवर्ग , तवर्गस्य, लकारे परे, परसवर्णादेश भवति । तल्लयः, विद्वाँल्लिखति (In this latter case the nasal element of 'न' is shown by the चन्द्रबिन्दु)

पदाति—पादाभ्याम् अतति (सतत गच्छति) इति पाद + अत् + इण्, पाद being changed to पद before आति by पादस्य पदाज्यातिगोपहतेषु ।

"पदाति-पत्ति-पदग-पादातिक-पदाजयः पद्ग पदिकश्च" इत्यमरः ।

अन्तर्गिरि—गिरिषु इति विभक्त्यर्थे अव्ययीभाव., similarly हरौ इति

अधिगिरि, तटे इति अनुतटम् etc Alt form अन्तर्गिरम् by गिरेश्च सेनकस्य. Or (ii) गिरे., गिरीणां वा अन्त (अव्ययीभाव:)।

रेणुरूषित.—रेणुभि. रूषित. (रूष भूषायाम् भ्वा प + कर्मणि क्त.)

महारथ —(here) one with a great chariot, [it generally means a great warrior 'एको दशसहस्राणि योधयेद् यस्तु धन्विनाम्। शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते ॥']

मानसम्—मन एव मानसम्, मनस् + अण् स्वार्थे obj to दुनोति

दुनोति—दु + लट् ति। दुङ् उपतापे।

नो—lit 'and not' न उ cf अथो, उतो besides अथ, उत

वृकोदर.—वृक उदर यस्य or वृकोदरम् इव उदर यस्य or वृकस्य इव उदर यस्य (बहु) वृक —wolf Bhima was called वृकोदर from his voracious appetite 'यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहन। मया दत्त स तेनासौ कथितो हि वृकोदर"॥ इति भविष्यपुराणे।

शब्दार्थचन्द्रिका। एवम् उपपत्तियुक्तेषु द्विषदभियोगफलेषु वाक्येषु उदाहृतेषु अपि अलक्षितकोपचिह्नम् अजातशत्रुमालोक्य सञ्जातचिन्ता समुचितज्ञा याज्ञसेनी भीमादिसोदरक्लेशोपवर्णनेन सोदरवत्सलस्य युधिष्ठिरस्य धैर्यं शिथिलयितु प्रकारान्तरेण आत्मपक्षम् उपपादयति—"परिभ्रमन्" इत्यादिना श्लोकत्रयेण।

वृकोदर' सत्यधनस्य तव मानस नो दुनोति कच्चित्? 'सत्यधनस्य' इति असाधारणविशेषणाकाङ्क्षित तव इति विशेष्यपदम् अन्वयार्थम् आपतत्येव। कीदृशो वृकोदर इति तत्राह—पदाति' इति। पद्भ्या सतत गच्छति इति पदाति, तेन अविरतगमनजनितक्लेशविशेषो द्योत्यते। गमनस्य सातत्यमेव न, कौटिल्य चास्ति इत्याह—परिभ्रमन् इति। परित सर्वदिक्षु अनवस्थया चङ्क्रम्यमाण. क्वचिदपि स्थितिसुखमलभमान इति लभ्यते। गमनस्य कौटिल्ये हेतुमाह—अन्तर्गिरि इति। अन्तर्गिरि गिरे: अन्त शर्कराकण्टकाद्याचिते विषमतमे पर्वतमध्ये इत्यर्थ। पूर्वम् एवविध' गमनक्लेश' कदाचिदपि नानुभूतवान् इत्याह—महारथ इति। महान्तो बृहन्त प्रकृष्टाश्च परार्ध्यकाञ्चनविततचित्रपरिकरा: सदश्वयुक्ता रथा यस्य स। पूर्वं भुवनकद्यास्वपि स्वेच्छानुविधायिना रथेन स्वैरं सञ्चरितवान्, इदानी शिलोच्चयमध्येऽपि पद्भ्यामेव परिसञ्चरन्त्यते इति-

महापथप्रचेतुः यस्य वनवासक्लेश इति भावः। रेणुरूषितं चरणं चङ्क्रमणं भ्रमण-परिवर्त्तनजनितेन पांशुना परिदिग्धवर्णकान्ति इत्यर्थः। लोहितचन्दनोचितः इति। प्रशस्तशिरास्त्रं हरिचन्दनम् इह लोहितचन्दनशब्देन उच्यते। कश्मीरानं महाकटाहनिचित निखिलमपि जल यद्विन्दुमात्रसम्पृक्तं सद्य एव शिशिरीभवति तस्य लोहितचन्दनस्य उचितो योग्य। उचितशब्दोऽभ्यस्तेऽपि वर्त्तते इति लोहित-चन्दनोऽभ्यस्तः इति चार्थं सिध्यति। य पूर्व्वं हरिचन्दनादिभि. प्रभूते अन्य दुर्लभे भोगे. सुखाग्रभूमिमधिरूढ, स एव इदानीं क्षितिरेणुरूषितत्वादिभिः दुःसहतरै अविरतैः क्लेशैः. दुःखकाष्ठां प्राप्त इत्यभिप्राय। क्षुत्तृष्णावर्धनो वृकाख्यो जाठरोऽग्निविशेष उदरे यस्य अस्ति स वृकोदर इति वृकोदरनाम केचित् निरु-च्यते। तेन तदानीम् उपवासभूयिष्ठतया फलमूलमात्राशनतया तस्य क्षुत्तृष्णाभि-भतत्व द्योत्यते। य. पूर्व्वं विशिष्टशाल्योदनादिमेदुरमनोज्ञरूप. स एव सम्प्रति उपवासकदशनकृतशोच्यशरीर संवृत्त इति तात्पर्य्यार्थः। वृकोदरशब्द एव पूर्व्वोत्तरावस्थानुसन्धानहेतु इत्यवस्थाद्योतक पूर्व्ववत् पदद्वय न प्रयुक्तम्। जटिलता मालिन्यकाश्यादीन् आकृतिपरिवर्त्तान् 'अयम इत्यभिनयेन दर्शयति। धिनोति प्रीणयति इति मुख्य धन मणिहिरण्यादि। तत् सर्व्वम् अनादृत्य सत्यमेव धनत्वेन अभिमन्यसे .इत्यपूर्वा सत्यपरता इति सोपहास उपालम्भः सत्यधनशब्देन द्योत्यते। "शिवानि वस्तीर्थजलानि कच्चित्' इतीष्टपरिप्रश्नविषय एव कच्चिच्छब्दः।

घण्टापथः—'परिभ्रमन् इति। लोहितचन्दनोचितः उचितलोहित-चन्दनः (1) 'वाहिताग्न्यादिषु' [पा २।२।३७] इति साधु। अभ्यस्तरक्तचन्दनः इत्यर्थ.। "अभ्यस्ते तूचित न्याय्यम्" इति यादव। 'महापथ' * रथचारी। उभयत्रापि प्राग् इति शेषः। अद्य तु 'रेणुरूषित' धूलिच्छुरितः। पद्भ्याम् अतति गच्छति इति 'पदाति' पादचारी। (2) "अज्यतिभ्या च" [उणादि ४।१३०] इत्यनुवृत्तौ "पादे च" [Ib ४।१३१] इति औणादिक इण् प्रत्यय.।

* A adds "महाकाया महात्मानो मेघदुन्दुभिनिस्वना.।
महायज्ञेषु युद्धेरस्तेन ते हि महारथा ॥"

"पाद्स्व पद्दाञ्यातिगोपह्नतेषु" [पा ६।१।५२] इति पद्दादेशः। 'अन्तर्गिरि' गिरिषु अन्तः *। विभक्त्यर्थेऽव्ययीभावः। (3) 'गिरेश्च सेनकस्य' [पा ५।४।११२] इति विकल्पात् समासान्ताभाव.। 'परिभ्रमन् अयं' 'वृकोदरः' भीमः (4) 'सत्य-धनस्य' इति सोल्लुण्ठवचनम्। अद्यापि त्वया सत्यमेव रक्ष्यते, न तु भ्रातरः इति भावः। तव इति शेषः। 'मानसं' नो दुनोति ? 'कच्चित्' न परितापयति ? (5) "कच्चित् कामप्रवेदने" इत्यमर'। स्वाभिप्रायाविष्करण कामप्रवेदनम् ॥ ३४ ॥

(1) The rule निष्ठा २।२।३६ enjoins that in a बहुव्रीहि comp a past participle is to be placed first as कृतकट , दत्तधन., गृहीतवेतन· &c The next rule वाहिताग्न्यादिषु directs that in the case of such बहुव्रीहि compounds as आहिताग्नि and others, the past participle may be optionally placed first, आहित अग्नि· येन स., आहिताग्नि. or अग्न्याहित । Cf Bhatti V 38 सुखजात. सुरापीतो नृजग्धो माल्यधारय'। अखिलङ्कं स्त्रियो दृष्ट्वा मारब्धा बलिविग्रहम् ॥ Again IV 15 भार्योढ' तमवज्ञाय तस्थे सौमित्रयेऽसकौ। Also दृढवद्धम् इव धर्ममभ्यगात् Raghu XI 35 *It is, however, decidedly better to regard* लोहित-चन्दनोचित. *as a tatpurusha comp* M explains भागधेयोचिते (Raghu I 50) भीमासुरशोणितोचित (Ib III 54) and गृध्रपक्षव्यपरोपणोचितम् (Ib III 60) where उचित is used exactly in the same sense as here as तत्पुरुष compounds उचित is used with षष्ठी or सप्तमी , cf. समुचितो हस्तसंवाहनानाम् Meghaduta सोचिता नलशिबस्य मारस्य बहुश. पुरा—N 23 40

[The other principal rules for पूर्वनिपात in the case of बहुव्रीहि compounds are (1) सप्तमी विशेषणे बहुव्रीहौ २।२।३५—in a Bah comp a word ending in सप्तमी or an adjective is to be placed first कण्ठेकाल: , चित्रगु. &c (2) सर्वनामसंख्ययोरुपसंख्यानम्—a pronoun or a numeral is placed first सर्वश्वेत', द्विशुक्ल: (3 वा प्रियस्य—प्रिय is

* 'अन्त'—seems to be an interpolation, for if अन्तर्गिरि is to be regarded as "विभक्त्यर्थे" अव्ययीभाव गिरिषु is sufficient and अन्त. is absolutely irrelevant. Cf तोयेष्वधि (शिवति ?) अधितोयम् Si. VIII 55

optionally placed first पुत्रप्रियः, प्रियपुत्रः (4) प्रहरणार्थेभ्यः परे निष्ठा-सप्तम्यौ भवतः—a past participle or a word ending in सप्तमी is placed *after* words denoting weapons, असुद्यतः, दण्डपाणिः ।]

(2) अज्यतिभ्यां च means that the suffix इण् is added to the roots अज् and अत्, as, आजि. (संग्राम) आति: (पक्षी). The next rule पादे च means पादे उपपदे अज्यतिभ्याम् इण्—इण् is added to the roots अज् and अत् with पाद as their उपपद Hence पाद + अत् + इण् (कर्त्तरि) । Now पाद is changed into पद् by the rule पादस्य पदाज्यातिगोपहतेषु—पाद is changed into पद् when आजि, आति, ग or उपहत follows, thus पदातिः, पदाजि पदग and पदोपहत .

(3) गिरि at the end of an अव्ययीभाव comp admits the समासान्त affix टच् (i e becomes गिर) optionally, अन्तर्गिरम्, अन्तर्गिरि, Cf निरुङ्क्षो विमद् स्वामी धनाना हृतपुष्पकः ।

अधारास्तेऽन्तर्गिर यस्मात् कस्तन्नावेति कारणम् । Bhatti V 87.

(4) The epithet सत्यधन is ironical, the implication being even now it is truth that you are preserving and not your brothers (5) कच्चित्—Vedic neuter of interrogative कद् + चिद् used in questions expecting the answer 'yes' (Lat 'nonne') ="I hope' कच्चिद् दृष्टा त्वया राजन् दमयन्ती I hope you have seen Damayanti, O king ? with negative = I hope not (Lat num) कच्चित् नापराधं ते कृतवानस्मि । I have not done you any injury, I hope" Macdonell Sanskrit Grammar p 150)

कामप्रवेदनम means "expressing one's own desire, wish or hope" क्षीरस्वामी says कामप्रवेदनम् इष्टपरिप्रश्न । कच्चिज्जीवति मे माता ।. [कच्चित् अहम् इव विस्मृतवान् असि त्वम् Sak VI]

विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनञ्जयः ॥ ३५ ॥

Prose-Order. বাসবোপমঃ যঃ উত্তরান্ কুরূন্ বিজিত্য প্রাজ্যং (প্রভূতম্) অকুপ্যং (হেমরূপ্যাত্মকং) বসু (ধনম্) অযচ্ছত্, স ধনঞ্জয়ঃ অধুনা তব বল্কবাসাংসি আহরন্ [তব] মন্যু কথং ন করোতি ?

Bengali. ইন্দ্রতুল্য যে ধনঞ্জয় উত্তরকুরুপ্রদেশ জয় করিয়া প্রভূত সুবর্ণরৌপ্যময় অর্থ প্রদান করিয়াছিলেন, তিনি আজ আপনার জন্য বৃক্ষ-বল্কলনির্মিত বস্ত্র আহরণ করিতেছেন, তাঁহাকে দেখিয়াও কি আপনার ক্রোধ উদ্দীপ্ত হয় না ?

English. How is it that the same Indra-like Arjuna who once brought you a vast treasure consisting not of base metals (i e of silver and gold) on conqering the North Kuruland but who is now engaged in bringing you bark-garments does not excite your pity or anger !

Allusion The reference is to Arjuna's conquest of the North Kuru-land during the Pandavas' conquest of quarters just before the Rajasuya sacrifice Arjuna was not allowed to enter the city, for no mortal eye could behold the glories of that land of perfect beautitude , but, at his desire, the people brought him fabulous riches.

Word-Notes.

প্রাজ্যম্—প্রাজ্যতে প্রাজ্যং প্রকর্ষেণ বীয়তে বা—ক্ষীরস্বামী। প্র+অজ্+ক্যপ্ or প্র+অজ্+ণ্যৎ , abundant, adj. to বসু

কুরূন্—The names of countries are plural, being really the names of the peoples (like 'Sweden' in English and Sachsen! in German)—Macdonell See under sls 1 and 27.

In the Aitareya Brahmana (VIII 14) the Uttara Kurus are located beyond the Himalaya (পরেণ হিমবন্তম্). Some scholars think that the land of the Uttara Kurus included modern Mongolia and Siberia. Drs. Macdonnel and Keith

remark, "It is reasonable to accept Zimmer's view that the Northern Kurus were settled in Kashmir, especially as Kurukshetra is the region where tribes advancing from Kashmir might naturally be found" (Vedic Index, Vol I)

अकुप्यम्—कुप्यम्—गुप्+क्यप् (कर्म्मणि) "राजसूयसूर्य्य मृषोद्य रुच्य-कुप्यकृष्टपच्याव्यथा (पा ३।१।११४) इति निपातनात्।" गुपेरादे: कत्वं च संज्ञायाम्।" कुप्यम् means base metals such as copper, tin &c. सुवर्णरजताभ्याम् अन्यद्, यत् कुप्यं, ताम्रपित्तलरीतिकादि, तत अन्यत् अकुप्यम्—gold and silver कुप्य is the form in this special sense, in other senses the form is गोप्यम् नञ् in used here in the sense of तदन्यत्व It has the following six senses —

(1) तत्सादृश्यम् (2) अभावश्च (3) तदन्यत्वं (4) तदल्पता।
(5) अप्राशस्त्य (6) विरोधश्च नञर्थाः षट् प्रकीर्त्तिता.॥

Exs, (1) अब्राह्मण, (2) असन्देह., (3) अकुप्यम्, (4) अनुदरम् (5) अकेशी (6) असुर।

वल्कवासासि—वल्कानि एव वासांसि। English *bark* is the same word as वल्क. वस्यते आच्छाद्यते अनेन इति वास, वस्+असुन् (करणे or कर्म्मणि) वस्ते, ववसे, अवसिष्ट, वत्स्यते &c. Cf. Lat *Vestis* English wear

आहरन्—1/1 आ+हृ+शतृ adj to स'. Some explain आहरन् as परिदधान' They construe thus—वल्कवासांसि आहरन् स तव मन्यु etc हरति, ते, जहार, जह्रे, अहार्षीत्, अहृत।

धनञ्जय—धन+जि+खच्। "संज्ञायां भृ-तृ-वृ-जि"—इत्यादिना खच्, "अरुर्द्विषद्—" इत्यादिना मुम्। "उत्तरकुरून् विजित्य धनाहरणाद् धनञ्जयोक्ति—" M. under Ki XI 45 सर्व्वान् जनपदान् जित्वा वित्तमादाय केवलम्। मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम्॥ महाभारते।

घण्टापथ:—"विजित्य इति। वासव इन्द्र' उपमा उपमानं यस्य स: "वासवोपम' इन्द्रतुल्य 'य. धनञ्जय। उत्तरान् कुरून्' मेरोरुत्तरान् अमानुष देशविशेषान् "विजित्य' 'प्राज्य" प्रभूतम्। "प्रभूतं प्रचुरं प्राज्यम्" इत्यमर.। कुप्याद् अ॰यत् अकुप्य हेमरूप्यात्मकम्। (2) 'स्यात् कोशश्च हिरण्यञ्च हेमरूप्ये कृताकृते

ताभ्यां यदन्यत् तत् कुप्यम्" इत्यमरः। 'वसु' धनम् 'प्रयच्छत्' दत्तवान्। (3) "पा-घ्रा——"[पा ७।३।७८] इत्यादिना दाणो यच्छादेशः। 'स' धन जयति इति 'धनञ्जयः' अर्जुनः (4) "संज्ञायां भृतृ-वृ-जि——" [पा ३।२।४६] इत्यादिना खच्-प्रत्यय. (5) "अरुर्द्विषद्——" [पा ६।३।६७] इत्यादिना मुम्-आगमः अधुना अस्मिन् काले। (6) "अधुना" [पा. ५।३।१७] इति निपातनात् साधु। तव 'वल्कवासांसि' आहरन्। कथ तव मन्युः क्रोधः दुःख वा न करोति॥

(1) Or वासवेन सदृश' वासवोपम नित्यसमास। "सुप्सुपरपदे त्वमी। निभ-सङ्काश-नीकाशप्रतीकाशोपमादय." इतमरोक्ते। (2) कोश (m) and हिरण्य (n.) mean wrought and unwrought gold or silver Metals other than these two are known as कुप्य

(3) पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्त्ति सर्त्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ पश्यर्च्छ-धौ-शीय-सीदाः।

Before a प्रत्यय with a श् as इत्, पा is changed to पिब, घ्रा to जिघ्र, ध्मा to धम, स्था to तिष्ठ, म्ना to मन, दाण to यच्छ, दृश् to पश्य, ऋ (अर्त्ति) to ऋच्छ, सृ to धौ, शद् to शीय and सद् to सीद्

(4) संज्ञायां भृ-तृ-वृ-जि-धारि-सहि-तपि-दमः।

The affix खच् (अ) is added to these roots preceded by a कर्म or any other सुबन्तपद as the case may be, when a संज्ञा (name) is denoted विश्वम्भरा, रथन्तरं साम, पतिवरा कन्या, शत्रुञ्जयो हस्ती, युगन्धर. पर्व्वत, सर्व्वंसहा पृथिवी, शत्रुन्तप., अरिन्दम।

(5) अरुर्द्विषदजन्तस्य मुम्।

A nasal (म) is inserted after the final vowels of अरुस्, द्विषत्, and words ending in vowels (except अव्ययs) when the next word ends in an affix with an indicatory ख (खित्) Thus अरुन्तुद cutting to the quick, द्विषन्तपः killing the foes, अरिन्दम, पुरञ्जय. &c But दोषामन्यम् अहः, दिवामन्या रात्रि., दोषा and दिवा being अव्यय do not admit मुम्

(6) अधुना इति निपात्यते। इदमः अश्भावो धुना च प्रत्यय'।

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेता धृति-संयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

Prose-Order वनान्तशय्याकठिनीकृताकृती विष्वक् कचाचितौ अग जौ गजौ इव एतौ यमौ विलोकयन् त्वं धृति-संयमौ बाधितं कथं न उत्सहसे ?

Analysis एतौ यमौ विलोकयन् कथं त्वं धृति-संयमौ बाधितुं न उत्सहसे—How is it that on seeing these twins you are not ready to drive away your contentment and self-control ? किम्भूतौ यमौ ? वनान्त-शय्या-कठिनीकृताकृती—(dual) whose bodies have been hardened by the ground of the forest which forms their bed (i e, by lying on the forest grounds) विष्वक् कचाचितौ—full of hair (due to absence of proper shaving) अग-जौ गजौ इव—looking like two mountain tuskers

Bengali. বনপ্রদেশে শয়নবশতঃ উহাদের দেহ কঠিন হইয়াছে, কেশসংস্কারের অভাববশতঃ রুক্ষকেশ চতুর্দ্দিকে ছড়াইয়া পড়িয়াছে, এখন উহাদিগকে ঠিক পর্ব্বতসম্ভূত গজবরদ্বয়ের ন্যায় দেখাইতেছে। যমজাত নকুল ও সহদেবের এই অবস্থা দেখিয়াও কেন আপনি সন্তোষ ও সংযম পরিত্যাগ করিতে উদ্যত হইতেছেন না।

Word-Notes.

वनान्तशय्याकठिनीकृताकृती – वनान्त एव शय्या (कर्म्मधा), तया कठिनीकृते आकृती देहौ ययोः (बहु) तौ। वनस्य अन्त (or वनमेव) वनान्त., अन्त being used in the sense of स्वरूप ।

शय्या—शी + क्यप् (अधिकरणे)। ["संज्ञाया समज-निषद-निपत-मन-विद-षुञ्-शीङ्-भृञ्-इणः" पा ३।३।९९ इति क्यप्] अकठिनं कठिनं सम्पद्यमाने कृते कठिनीकृते। कठिन + अभूततद्भावे च्वि + कृ + कर्म्मणि क्त ।

कचाचितौ—कचैः आचितौ (व्याप्तौ) covered with hair. भग्नकेशसंस्कारौ। "चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः"—अमरः।

विष्वक्—वि + सु [or विषु] + अञ्च् (to go) + क्विन्।

अगजौ—न गच्छति इति अगः नञ् + गम् + ड (कर्त्तरि) Alt. form नगः. "नगोऽप्राणिष्वन्यतरस्याम्" (पा ६।३।७७ सि. ७६०). The नञ् of नग remains unchanged optionally when it does not refer to an animate being. "शैलवृक्षौ नगावगौ"—अमरः but अगो वृषल शीतेन (the Chandala cannot move for cold), here the form is अग and not नग, as it refers to an animate being. अगात् जायेते इति अग + जन् + ड (कर्त्तरि)। "हिमवद् विन्ध्य मलयाः गजानां प्रभवा नगा"—गजायुर्वेद। "जनपदजाता गजा जघन्याः, वनजाता मध्यमा, पर्वतजाताः प्रशस्ततराः इति हि गजशास्त्रविदां प्रसिद्धि"—चित्रभानुः।

धृति-संयमौ—धृतिश्च संयमश्च तौ obj to बाधितुम्। स्नेहादिकृत चित्तचापल-विरोधिगुणः धृतिः। प्रियद्वेष्यविषयवागाद्यीन्द्रियोपरमहेतुगुण संयम। धृति—धृ + क्तिन् (भावे)। संयम—सं + यम् + अप् (भावे) Alt form संयाम "यमः सम-उप नि विषु च" (पा ३।३।६३) यम without उपसर्ग or with the उपसर्गs सम्, उप, नि and वि admits अप् optionally, hence यमः, याम, संयम, संयाम etc

उत्सहसे—उत् + सह् + लट् से। सहते, सेहे, असहिष्ट, सहिता, सोढा।

घण्टापथः—"वनान्त" इति। 'वनान्तः' वनभूमि. एव शय्या तया 'कठिनीकृताकृती' कठिनीकृतदेहौ। "आकारो देह आकृति." इति वैजयन्ती। 'विष्वक्' समन्तात्। 'समन्ततस्तु' परितः सर्वतो विष्वग् इत्यपि इत्यमरः। 'कचाचितौ कचव्याप्तौ, विशीर्णकेशौ इत्यर्थः। अत एव 'अगजौ गिरिसम्भवौ 'गजौ इव' स्थितौ एतौ 'यमौ' युग्मजातौ, माद्रीपुत्रौ इत्यर्थः। (1)'यमौ द्वन्द्वचरे ध्वाङ्क्षे संयमे यमजेऽपि च" इति विश्वः। विलोकयन् त्वं 'कथं' 'धृतिसंयमौ' सन्तोषनियमौ। (2) "धृतिर्योगान्तरे धैर्ये धारणाध्वरतुष्टिषु" इति विश्व.। बाधितुं 'न उत्सहसे' न प्रवर्त्तसे। (3) 'शक धृष—" [पा. ३।४।६५] इत्यादिना तुमुन्। अहो ते वद्दैर्ध्यम् इति भाव.॥

(1) यम means (a) दण्डधर i. e. the god of death, (b) काक a crow, (c) संयम (restraint), (d) यमज twin. (2) धृति means योगान्तर one of the 27 astrological *yogas*, विष्कुम्भ, प्रीति etc धैर्य fortitude, courage, self-command, धारण seizing, holding, अध्वर a sacrifice and तुष्टि contentment, pleasure, satisfaction

(3) शक-धृष-ज्ञा ग्ला-घट रभ लभ-क्रम सहार्हास्त्यर्थेषु तुमुन्—The affix तुम् is added to a root when the roots शक्, धृष्, &c and roots having the sense of अस्ति are in construction, भोक्तु शक्नोति etc

Parallel Passages (34-36) *B C VIII.* 55 ff

सुजातजालावततांङ्गुली मृदू निगूढगुल्फौ बिसपुष्पकोमलौ।
वनान्तभूमिं कठिनां कथं नु तौ सचक्रमध्यौ चरणौ गमिष्यत ॥
विमानपृष्ठे शयनासनोचितं महार्हकालागुरुचन्दनार्चितम्।
कथं नु शीतोष्णजलागमेषु तच्छरीरमोजस्वि वने भविष्यति ॥
शुचौ शयित्वा शयने हिरण्मये प्रबोध्यमानो निशि तूर्यनिस्वनैः।
कथं बत स्वप्स्यति सोऽद्य मे व्रती पटैकदेशान्तरिते महीतले ॥

इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

English Equivalents तावकीम् [तव इमाम्, युष्मद् + "तस्य इदम्" इति अण् + स्त्रियां ङीप्] belonging or pertaining to you धियम्—[ध्यै + क्विप् करणे धीः 2|1, obj to वेद] intelligence विचित्र-रूपाः [विचित्रं रूपं यासां ताः, or अतिशयेन विचित्राः]—Various चित्तवृत्तय — moods or states of mind. विचिन्तयन्त्याः adj to मम—while I think पराम् adj. to आपदम्—extreme रुजन्ति [nom आधयः, obj चेत] break प्रसभ —forcibly आधि [आ + धा + कि = आधि 1/3]—mental anguish

Prose Order. अहम् तावकीम् इमां धियं न वेद, चित्तवृत्तयः विचित्ररूपाः खलु। परां भवदापदं विचिन्तयन्त्याः मम चेतः आधयः प्रसभं रुजन्ति।

Bengali. আপনার এই মনের গতি আমি বুঝিতে পারিতেছি না, (কেন না) [জগতে ভিন্ন ভিন্ন লোকের] চিত্তবৃত্তি ভিন্ন ভিন্ন রকমের। আপনার এই উৎকট বিপৎ স্মরণ করিলে মনোবেদনা বলপূর্ব্বক আমার হৃদয় একেবারে ভাঙ্গিয়া দেয়।

English. I do not understand this state of your mind, (for) the workings of men's minds are strange and varied, but while I reflect on this terrible calamity that has befallen you, the anguish of my mind rends my heart

Elucidation. I must freely confess that I cannot understand what stuff your mind is made of, men's minds are so differently constituted Some men in your place would feel the present position most keenly and thirst for revenge But you are a strange being! The sudden fall from the highest eminence to the lowest depths does not affect you in the least Truly I do not understand you But of this I can assure you that the sight of your present misfortune fills my mind with unbearable sufferings and breaks my heart

Word-Notes.

इमाम्—"ईदृश सोदर-क्लेश दर्शनेऽपि अदृढिमन्येन प्रकटितार्द्रतविपर्य्ययाम्, ईदृशपरिभवानुभवेऽपि अनाविर्भूतमन्युतया अभिव्यक्तदीप्ताप्रचयाम्।"

तावकीम् (Adj. to धियम्) तव इमाम् इति युष्मद्+अण्। "तस्येदम्" इति अण्, with छ—त्वदीय and with खञ्—तावकीन In pl. यौष्माक, युष्मदीय, यौष्माकीण। त्वदेकसम्बन्धिनी त्वदन्यस्य कस्यचिद् ईदृशी बुद्धिर्नास्तीति भावः।

विचित्ररूपा—विचित्र+प्रशंसायां रूपप् अतिशयेन विचित्राः इत्यर्थः or better विचित्रं रूपं यासां ताः (बहु), शबलात्मान'।

चित्तवृत्तय—चित्तस्य (मनसः) वृत्तयः (व्यापाराः संकल्पविकल्पादयः)।

खलु—वाक्यालङ्कारे (expletive), "निषेध-वाक्यालङ्कार जिज्ञासानुनये खलु।"

पराम्—"पर श्रेष्ठारिदूरान्योत्तरे क्लीब तु केवले"—मेदिनी। (1) दूर far, distant, पर. पन्था (2) following, later, future, बाल्यात् परं साथ वय प्रपदे Ku I 31 (3) being beyond, surpassing, greatest, utmost परतोपि परश्चासि Ku II 14 For transition from (1) to (3) Cf Eng far and fore from पृ to bring across. (4) अन्य other, another, strange, stronger, enemy आत्मन प्रतिकूलानि परेषां न समाचरेत, उत्तिष्ठमानस्तु परो नोपेक्ष्य पथ्यम इच्छता।

रुजन्ति—रुज् तु प + लट् अन्ति। रुजति, अरोक्षीत्, रुरोज। (Cf Gk. *lugros*—painful, sad, lit *lug eo* –I grieve) नाम आश्रय obj चेत

प्रसभ—प्रगता सभा अत्र (बहु), सभाशब्देन युक्तायुक्तविचारो लक्ष्यते।

घण्टापथः।—(1) अथ राज्ञ दुर्दशा दर्शयितुम् उपोद्घातम् आह—[प्रकृताथ वर्णयितुम अर्थान्तरवर्णनम् उपोद्घात]—'इमाम्' इति। 'इमां' वर्तमानाम् तव 'इमां' तावकाम् त्वदीयाम्। (2) "तस्येदम्" [पा ४।३।१२०] इति अ प्रत्यय "तवकममकावेकवचने" [पा ४।३।३] इति तवकादेश.। "विद्" ज्ञानइत्यस्या चित्तवृत्तिम अहं न 'वेद्' कीदृशी वा न वेद्मि, परवृत्ते अप्रत्यक्षत्वात इति भाव। (3) "विदो लटो वा" [पा ३।४।८३] इति लटो णल् आदेश। (4) न चाप्रदृष्टान्ते नापन्नत्वात् दुःखित्वम् अनुमातुं शक्यते, घोरादिषु अनन्तानिकत्वात् इत्याशयेन आह—'चित्तवृत्तय' 'विचित्ररूपा' घोराघोराद्यनेकप्रकारा खलु। किन्तु 'पराम्' उत्कृष्टां 'भवदापदं' 'विचिन्त्या' भावयन्त्या 'मम' 'चेत' चित्तं 'आधय' मनोव्यथाः। "उपसर्गे घोः किः" [पा ३।३।९२] इति कि प्रत्यय। 'प्रसभ' प्रसह्य 'रुजन्ति' भञ्जन्ति। रुजो भङ्ग इति धातोर्लट्। (6) पश्यतामपि दुःसहं दुःखजननी त्वद्विपत्तिरनुभविता त्वां न विकरोति इति महच्चित्तम् इत्यर्थ.। (7) चेत इति "रुजार्थानां भाववचनानाम् अज्वरे" [पा २।३।५४] इति षष्ठी न भवति, तत्र शेषाधिकारात् शेषत्वस्य विवक्षितत्वात् इति॥ ३७॥

(1) Now she makes her preface for describing the miserable condition of the king. उपोद्घात or Introduction or

preface is the description of something else for the purpose of describing the matter in hand. (2) अण् is added to a प्रातिपदिक in the sense of 'belonging to' or 'pertaining to' (3) See under sl 20 (4) Nor can the fact of his being miserable because he is overtaken by calamity be inferred from her own condition, because misery is not an invariable consequent of being in trouble Take the case of persons of self control, for instance They are not miserable when beset with troubles अनैकान्तिक or सव्यभिचार is the name of one of the five divisions of हेत्वाभास। [We may point out the fallacy thus in Sanskrit 1 अयं दुःखी, 2 आपन्नत्वात्, 3 यः यः आपन्नः स सः दुःखी यथा अहम्, 4 अस्मिंश्च आपन्नत्वव्याप्यम् दुःखम् अस्ति, 5 तस्मात् अयं दुःखी। न चात्र एषा व्याप्तिः अदुष्टा इति सम्भावयितुं शक्यते, वीरपुरुषे सत्यपि आपन्नत्वे दुःखाभावेन व्यभिचारात। (5) See Introd (6) Strange indeed that your calamity which gives rise to unbearable pain in the hearts of those who see it does not move you who endure it । (7) Here the word चेतः does not take षष्ठी in connexion with the word रुजन्ति acc to the rule रुजार्थानां भाववचनानाम् अज्वरेः because the rule prescribes षष्ठी to denote शेषत्व i e relation in general and not any particular case relation such as कर्मत्व etc and whether relation in general is to be expressed or a particular case relation is to be expressed depends on the will of the speaker Here the speaker intends to emphasise the कर्म relation, hence चेतः takes द्वितीया otherwise it would have taken षष्ठी

Remarks Vidya'ma'dhava says ननु रुजार्थानामिति चेतस इति षष्ठ्या भवितव्यम्। आधिशब्देनैव मनोव्यथाया सिद्धत्वात् चेतोग्रहणस्यानर्थकमिति केचित्। सत्यमेतत्। गत्यन्तरमत्र ब्रूम। रुजन्ति च इतः इति पदच्छेदः कार्यः। इतः अस्मात् प्रागुक्ताद्धेतोः मामपि रुजन्ति व्यथयन्ति। यथा त्वद्भ्रातॄणां तथा मामपि रुजं कुर्वन्तीत्यर्थः।

दुःसहा दुःखजननी—all except A.

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः ॥ ३८ ॥

English Equivalents पुरा—formerly महाधनम्—[महत् धनम् i e मूल्यं यस्य तत्] valuable विबोध्यसे—(nom. वैतालिकैः) were roused (from sleep) स्तुति गीति मङ्गलैः —auspicious rites in the shape of praises and songs अदभ्र दर्भाम्—full of abundant *Kusha* grass जहासि—leave अशिवैः—inauspicious शिवा रुतैः — by the howlings of jackals

Prose-Order —यः त्वं महाधनं शयनं (शय्याम्) अधिरूढः [सन्] स्तुति गीति मङ्गलैः पुरा विबोध्यसे, स त्वम् [अधुना] अदभ्रदर्भां स्थलीम् अधिशय्य अशिवैः शिवारुतैः निद्रां जहासि ।

Bengali যে আপনি পূর্ব্বে বহুমূল্য শয্যায় শয়ন করিয়া (বৈতালিকগণের) স্তব ও গীতরূপ মঙ্গলশব্দে জাগরিত হইতেন, সেই আপনি (আজ) প্রচুর কুশময় বনভূমিতে শয়ন করিয়া অমঙ্গলকর শৃগাল চিৎকারে জাগরিত হইতেছেন ।

English Thou who formerly lying on a precious bed wert awakened (by the Vaitalikas) with auspicious praises and songs, dost now lie on a wild tract of ground overgrown with luxuriant *Kusha* grass and art roused (from slumber) by the inauspicious (ill boding) howling of jackals.

Elucidation Just think for a moment of what you have lost and then consider your present condition Food and sleep are the bare necessities of life; and I will ask you to consider how you fare in regard to them Time was when you slept comfortably on the most luxurious couch that human ingenuity could fashion, now you have been forced to

lie on the bare forest ground with your delicate frame pricked and pierced by the sharp ends of the Kusha grass with which the forest abounds. And the manner of your awakening is quite in keeping with this. You who were roused from sleep by the auspicious praises of bards and by the recitation of prayers are now awakened by the most inauspicious howls of the jackals of the forest

Your body was nourished on the auspicious food prepared with the utmost care for the learned Brahmans and now you are living on fruits growing luxuriantly in the forest No wonder that you are becoming more and more shrunk and shrivelled every day You may not care for physical comforts, you may think that you have risen superior to them, but does not the fact that your fame that had spread to the four ends of the earth and beyond is shrinking day by day along with your body make you pause to think ? Do you not know that to a man who had been once held in respect and esteem, infamy is worse than death ? (सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते ।)

Time was when your feet resting on bejwelled pedestals were nursed by the heads of hundreds of proud princes owing allegiance to you and powdered by the soft pollen of the flowers dropped from their chaplets But now no more princes, no more feudatories, no more marks of submission Your feet are now being cut and torn by the Kusa grass cropped by the deer and the hermit (38—40)

Sls. 38—40 Cf Ramayana II 12 97 ff

कथं रथैर्विभुर्यात्वा गजाश्वैश्च मुहुर्मुहुः ।
पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥
यस्य त्वाहारसमये सूदाः कुण्डलधारिणः ।
अहंपूर्व्वाः पचन्ति स्म प्रशस्तं पानभोजनम् ॥
स कथं नु कषायाणि तिक्तानि कटुकानि च ।
भक्षयन् वन्यमाहारं सुतो मे वर्त्तयिष्यति ॥

महार्हवस्त्रसंवीतो भूत्वा चिरसुखोचित' ।
काषायपरिधानस्तु कथ' भूमौ निवत्स्यति ॥

Substance—"यः पूर्व्वं प्रासादेषु मृदुतरस्पर्शप्रच्छदपराध्य पर्य्यङ्कशायी समनुभूतसुषुप्तिसुख' स्वरमाधुर्य्येण श्रवणतर्पणैः मङ्गलार्थतया मनोज्ञादिभिः वन्दिमागधशब्दैर्विबोधितः, स एव इदानीं दुर्ल्लभनिद्रः शिलाकण्टकदर्भ निर्भरां स्थपुटतरा (very uneven) स्थलीमधिशय्य तत्त्वणम् एव श्रुतिपरुषैः अमङ्गलैः शिवावाशितैः निशासमयसामर्थ्यमावापजाता निद्रा त्यजसि इति सर्व्वैव तव दुर्दशा ।"

Word-Notes

पुरा—formerly, generally refers to distant past, here, of course, the time, though only a few months, seems ages to her "स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा ।"

अधिरूढ—अधि + रुह् + क्त (कर्त्तरि), गत्यर्थकत्वात् "गत्यर्थाकर्म्मक-श्लिष शीङ् स्थास वस जन रुह-जीर्य्यतिभ्यश्च" (पा) इति कर्त्तरि क्त ।

शयन—शी + ल्युट् (अधिकरणे) ।

विबोध्यसे—वि + बुध + णिच् + कर्म्मणि लट् से । बुध्यते, बुबुधे, अबोधि, अबुद्ध, अभुत्सातम्, अभुत्सत । caus बोधयति, ते, अबूबुधत ।

स्तुति गीति मङ्गलैः (करणे तृतीया)—स्तुतयश्च गीतयश्च ता एव मङ्गलानि तैः. Or स्तुतयश्च गीतयश्च मङ्गलानि च (द्वन्द्व) तैः । Cf Devarāja सूत मागध-वन्दिभिः स्तुति गीति मङ्गलैः । अध्यारोपितगुणकीर्त्तनं स्तुतिः । स्वरतालयुक्तपद-प्रयोगो गीतिः । मङ्गलं जयजीवेत्यादिपदोच्चारणम । स्तुतिकृतो वन्दिनः, गीतिकृतो मागधाः ।

अदभ्रदर्भाम्—अदभ्र दर्भा यत्र सा (बहु) ताम्, न दभ्रः (अल्प) अदभ्रः. भूरि (Fig—Litotes.) "स्तोकाल्पक्षुल्लकाः श्लक्ष्णं सूक्ष्मं दभ्रं कृशं तनु" ।

अधिशय्य—अधि + शी + ल्यप् । शेते, अशयिष्ट, शिश्ये ।

स्थलीम्—स्थल + अकृतिमार्थे ङीष् । अधिशीङ्स्थासां कर्म्म इति अधिकरणस्य कर्म्मत्वम् । असंस्कृता शिलाकाष्ठकण्टकादि निचिता भूमिः स्थलीशब्देन उच्यते ।

जहासि—हा + लट् सि । लोट् 2/1 जहाहि, जहीहि, जहिहि, लुङ् अहासीत् । निद्राम्—नि + द्रा + अङ् भावे ।

अशिवैः—न शिवैः अमङ्गलैः inauspicious. Cf. नित्याशिवकरा युद्धे शिवा

घोरमिदशंना. etc Rám Ar 21 उपपन्नाश्च सर्ब्बे हे व्याहरन्त्यशिवं शिवा Lanka 10

शिवा रुतैः—(करणे तृतीया) शिवाशब्दो दर्शादिशब्दवत् विपरीतलक्षणया जम्बुक्यां रूढ.। तिर्य्यक्षु जम्बुकजातिरमङ्गला, तत्रापि विशेषेण स्त्री। शिवानां जम्बुकीनां रुतैः परुषैः वाशितैः इत्यर्थ.। रुतशब्दो मण्डूकजम्बुकादिध्वनौ प्रसिद्धः। रु + नपुंसके भाव क्तः

घण्टापथः।—तदापदमेव श्लोकत्रयेणाह—"पुरा" इति। 'यः' त्वं 'महाधन' बहुमूल्य श्रेष्ठम्। "महाधन महामूल्ये" इति विश्वः। 'शयन' शय्याम् 'अधिरूढ' सन्। स्तुतयो गीतयश्च ता एव मङ्गलानि तै [स्तुति-गीति-मङ्गलैः] करणभूतै 'पुरा विबोध्यसे,' वैतालिकैः इति शेषः। पूर्व्वं बोधित इत्यर्थः। (1) "पुरि लङ् चास्मे" [पा ३।२।१२१] इति भूतार्थे लट्। स त्वम् 'अदभ्रदर्भां' बहुकुशाम्। 'अस्त्री कुश कुथो दर्भ." इति, "अदभ्र बहुल बहु" इति चामर। 'स्थलीम्' अकृत्रिमभूमिम्। "जानपद—"[पा ४।१।४२] इत्यादिना अकृत्रिमार्थे ङीष्। एतेन दुःसहस्पर्शत्वम् उक्तम्। (3) "अधिशीङ्स्थासां कर्म्म" [पा १।४।४६] इति [अधिकरणस्य] कर्म्मत्वम्। 'अधिशय्य' शयित्वा। (4) "अयङ् यि क्ङिति" [पा ७।४।२२] इति अयङ्-आदेश.। 'अशिवे' अमङ्गले 'शिवा रुतैः' क्रोष्टुवाशितै.। (5) "शिवा हरीतकी क्रोष्टा शमी नद्यामलक्युमा"* इति वैजयन्ती। 'निद्रा जहासि' अद्य इति शेष ॥

(1) पुरि लुङ् चास्मे (पा ३।२।१२२ सि २७८१)

† लुङ् and लट् optionally come after a verb to denote past time not belonging to the current day when the word पुरा is used in the sentence, provided that the word स्म is not used

---

* For उमा the printed books read उभे ।।।

† अनद्यतनग्रहणम् इह मण्डूकप्लुत्या अनुवर्त्तते। पुराशब्दे उपपदे स्मशब्दवर्ज्जिते भूतानद्यतनेऽर्थे विभाषा लुङ् प्रत्ययो भवति, लट् च। ताभ्यां मुक्ते पक्षे यथाविषयम् अन्येऽपि प्रत्यया भवन्ति। वसन्ति इह पुरा छात्रा:। अवात्सुः इह पुरा छात्राः। ऊषुः इह पुरा छात्राः। अस्मे इति किम्? नडेन स्म पुरा अधीयते।

So the optional forms in the present case would be विबोधयाम्बभूविषे, व्यबोध्यथा and व्यबोधयिषाः or व्यबोधिषाः

[Remember also that with the particles यावत् and पुरा used as adverbs, लट् is used to denote futurity, as प्रत्यासीदति मुक्तिस्त्वां पुरा Ki XI 36. यावदस्य दुरात्मन समुन्मूलनाय शत्रुघ्नं प्रेषयामि (shall send) Rule यावत्-पुरानिपातयोर्लट् (पा ३।३।४)]

(2) जानपद कुण्ड गोण स्थल भाज नाग काल नील कुश कामुक कबराद् वृत्त्य-मत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु ।

जानपदादिभ्य एकादशभ्य प्रातिपदिकेभ्य एकादशसु वृत्त्यादिषु अर्थेषु यथा-सङ्ख्य ङीष् प्रत्ययो भवति । The suffix ङीष् is added to the प्रातिपदिक's जानपद &c in the sense of (1) वृत्ति living or profession, (2) अमत्र (a vessel), (3) आवपन (a sack), (4) अकृत्रिमा natural plot of ground, (5) श्राण (rice gruel), (6) स्थौल्य (stoutness), (7) वर्ण colour (black coloured), (8) अनाच्छादन [blue coloured] other than cloth (9) अयोविकार a plough share (10) मैथुनेच्छा desire for sensual pleasure (11) केशवेश a braid of hair Thus स्थली means a natural plot of land but स्थला ground artificially prepared (3) The आधार of the roots अधि + शी, अधि + स्था and अधि + आस् becomes कर्म and hence takes द्वितीया, शय्यायां शेते but शय्यामधिशेते, वने तिष्ठति but वनम् अधितिष्ठति, आसने अस्ति but आसनम् अध्यास्ते । (4) The final of शी is changed to अय् when an affix beginning with य् and having an indicatory क् or ङ् follows Thus अधि + शी + ल्यप् (The य of ल्यप् is to be regarded as a कित् affix, for it is substituted for क्त्वा which is कित्) = अधि + श् + अय् + य = अधिशय्य । शाशय्यते (यङन्त) । (5) शिवा means (a) हरीतकी (b) a jackal (male or female), (c) the शमी tree, (d) a river (e) आमलकी, and (f) the goddess Durga.

पुरोपनीतं नृप ! रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।

तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९* ॥

English Equivalents. *रामणीयकम्* (*रमणीय+वुञ्*) उपनीतम्—rendered pleasing or handsome. द्विजातिशेषेण [द्विजभुक्तावशिष्टेन] अन्धसा [=अन्नेन]—with food left by the Brahmans after their meal वन्यफलाशिनः ते [वपु] of you who are now feeding on wild fruits परं extreme कार्श्यम् [कृश+ष्यञ्] thinness

Prose Order. [हे] नृप। पुरा द्विजातिशेषेण अन्धसा यत् एतत् ते वपु रामणीयकम् उपनीतम् अद्य वन्यफलाशिनः ते तत् [वपु] यशसा समं परं कार्श्यम् उपैति।

Bengali রাজন। পূর্ব্বে ব্রাহ্মণগণের ভুক্তাবশিষ্ট অন্নে আপনার যে দেহ রমণীয়ভাবাপন্ন হইয়াছিল, আজ বন্যফলভোজনরত আপনার এই সেই দেহ অতিশয় ক্ষীণতা প্রাপ্ত হইতেছে যশ ও সঙ্গে সঙ্গে ক্ষীণ হইতেছে।

English This frame of time O king, formerly rendered handsome by the remants of rice eaten by the Brahmanas is now being reduced to extreme leanness along with your glory, feeding as you are on wild fruits

Word-Notes

उपनीतम्—उप+नी+क्त (कर्म्मणि), nom अन्धसा, retained obj रामणीयकम्, obj —वपु

---

* In many Mss Sl 40 (अनारतम् etc) is placed immediately after Sl 38 (पुराधिरूढ. etc) and after sl 40, sl. 39 This order seems preferable, for first of all Draupadi refers to Yudhisthira's physical discomfort and then adroitly speaks of the कार्श्य of यश. as well as वपु which she attributes to his enemies in the next sl So the natural order is परैति कार्श्यं यशसा समं वपुः, विपन्निमित्ता यदिय दशा etc.

रामणीयकम्—रम् + णिच् + अनीयर् (कर्त्तरि) [Only in a few rare cases are the कृत्य affixes added in the कर्त्तृवाच्य, "कृत्यल्युटो बहुलम्" इति बाहुलकात् कर्त्तरि अनीयर्।] रमणीयस्य भाव रामणीयकम्। रमणीय + वुञ्। The rule is * योपधाद् गुरूपोत्तमाद् वुञ् (पा ५।१।१३२)—In the sense of भाव or कर्म्म वुञ् is added to words consisting of three or more vowels with a penultimate य preceded by a long vowel As रमणीय has य as its penultimate (the last letter being अ) and this य is preceded by the long vowel ई of णी, वुञ् is added to it Thus रमणीय + वुञ् = रामणीय + अक = रामणीयक, वु of वुञ् being changed to अक by the rule युवोरनाकौ ७।१।१—अन and अक are substituted respectively for यु and वु in an affix. (Thus ल्युट् = अनट् etc) The first vowel is lengthened because of the indicatory ञ् of वुञ् Rule. तद्धितेष्वचाम आदेः ७।२।११७—तद्धिते ञिति णिति च प्रत्यये परत अङ्गस्य अचाम आदेः अच वृद्धिर्भवति।

द्वे जातौ (जन्मनी) यस्य स द्विजाति—the two births being the *physical* birth and the *spiritual* re birth at the time of the investiture with the sacred thread Cf Manu II 169 मातुरग्रेऽधिजननं द्वितीयं मौञ्जीबन्धने। द्विजाति though meaning the twice born castes—Bráhmanas, Kshatriyas and Vaishyas must here be restricted to Bráhmanas only तेषां (भुक्तात) शेष, तेन। द्विजातिशेषेण द्विजभुक्तावशिष्टेन, द्विजातिशब्देन द्विजात्युपयुक्तम् अन्नं लभ्यते। शेष—शिष् + घञ् (कर्म्मणि) उपयुक्तात् अन्यं शेष। Cf शेषोऽनन्ते वधे सीरिण्यप-युक्तेतरेऽपि च। शेषा निर्माल्यदाने स्यात्" इति हैम।

रामणीयकमुपनीतम्—स्वतो रमणीय विशिष्ट स्वादुपथ्यान्नभोजनेन उपजात-धातूपचय-वर्णस्निग्धतादिप्रकर्षरूपां रमणीयतरतां लम्भितम् इत्यर्थ।

अस्माभिः—अनुक्ते कर्त्तरि तृतीया। अद + असुन् (कर्म्मणि)।

अद्य—अस्मिन् अहनि। इदम + द्य। सद्यः परुत् परार्य्यैषमः परेद्यव्यद्य-पूर्व्वेद्युरन्येद्युरन्यतरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः (पा ५।३।२२)।

वन्यफलाशिन—वन्यानि वनजातानि फलानि व्रतार्थम् अश्नन्ति इति वन्य-

---

* त्रिप्रभृतीनाम् अन्त्यस्य समीपम् उपोत्तमम्। गुरु उपोत्तमं यस्य तद् गुरूपोत्तमम्। यकारोपधात् गुरूपोत्तमाद् वुञ् प्रत्ययो भवति भावकर्म्मणोः।

फल+अश् + णिनि (कर्त्तरि) 6।1 adj to ते। "व्रते"—a root preceded by a सुबन्त as उपपद admits णिनि to signify व्रत. [जानपद विशिष्टान्नभोजिनाम् असंस्कृतानि वन्यफलानि धातुवैषम्यादिदोषहेतुतया बलापचयकारीणि इति वन्यफलशब्देन द्योत्यते। व्रताद्यर्थं स्वल्पभोजने अशिधातु प्रसिद्ध न तु सौहित्यकरे पर्य्याप्ते इति अशिधातुना भोजनस्य स्वल्पता द्योत्यते।]

परम्—अतिमात्रम् adj to कार्श्यम्। परैति—परा+इ+लट् ति।

कार्श्यम्—कृश+ष्यञ्। "गुणवचन ब्राह्मणादिभ्यः कर्म्मणि च" इति ष्यञ्। कृश् +क्त—कृश। "अनुपसर्गात् फुल्ल-चीव कृशोल्लाघाः"—the following participles are irregualary formed (they must not be preceded by other उपसर्ग's) फुल्ल्+क्त=फुल्ल। चीव्+क्त=चीव। कृश्-क्त=कृश। उत+लाघ+क्त = उल्लाघ।

यश—अश्+असुन्। "अशेर्देवने युट् च' देवन—praise, सहार्थक "सम" शब्दयोगे तृतीया।

वपु—वप्+उस् a wonder, thence beautiful appearance, beauty, thence appearance, form

घण्टापथः ।—"पुरा" इति। हे नृप 'यत्' एतत् पुरोवर्त्ति 'वपु' 'पुरा' द्विजाति-श्रेणिषु' द्विजभुक्तावशिष्टेन 'अन्धसा' "भिस्सा स्त्री भक्तम्। अन्धोऽन्नम्" इत्यमर। *रमणीयस्य भाव 'रामणीयकम्' 'उपनीतम्' प्रापितम्। नयतेर्द्विकर्म्मकत्वात्" प्रधाने कर्म्मणि क्तः। "प्रधानकर्म्मण्याख्येये लादीनाहुर्द्विकर्म्मणाम्" ["अप्रधाने दुहादीनां ण्यन्ते कर्त्तुश्च कर्म्मणः॥" पा १।४।५१ वा] इति वचनात्। 'अद्य वन्यफलाशिन' 'ते' तव 'तत्' वपु. 'यशसा सम' 'परम्' अतिमात्र' 'कार्श्यम्' 'परैति' प्राप्नोति। उभयमपि चीयते इत्यर्थः। अत्र सहोक्तिरलङ्कारः। तदुक्त काव्यप्रकाशे [१०।२६]—"सा सहोक्ति सहार्थस्य बलादेक द्विवाचकम्" इति।

(1) नी being a द्विकर्म्मक root, the verb agrees with the प्रधान कर्म्म (वपु) When the object is referred to by the root, a द्विकर्म्मक root takes ल etc (the tense affixes etc), in agreement with the प्रधान कर्म्म

---

* द्वे जाती येषां ते द्विजातय.। तदुक्तम् 'जन्मना जायते शूद्र संस्कारैर्द्विज उच्यते" इति। "दन्त विप्राण्डजा." इत्यमर।—added in all except the N. S. Press ed.

(I) When a single expression, by the force of a term meaning 'with', signifies two facts, the F is termed सहोक्ति

P. R defines सहोक्ति thus

सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः ।
कल्पितौपम्यपर्य्यन्ता सा सहोक्तिरितीष्यते ॥

यत्र भेदेऽभेदरूपया कार्य्यकारणपौर्व्वापर्य्यविपर्य्ययरूपया चातिशयोक्त्या एकस्य प्राधान्येन अन्वये अपरस्य सहार्थेन सम्बन्धे उपमानोपमेयभाव कल्प्यते तत्र सहोक्ति ।

अनारतं यौ मणिपीठशायिना
वरञ्जयद् राज-शिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

English Equivalents, मणिपीठशायिनौ—resting on jewelled pedestals अरञ्जयत्—tinged, dyed रज —pollen द्विज—tooth (hermit acc to M) आलून—softly torn

Prose order [पूर्वं] राज शिर स्रजा रज अनारत मणि पीठ शायिनौ यौ ते चरणौ अरञ्जयत, [अधुना] तौ मृगद्विजालूनशिखेषु बर्हिषा वनेषु निषीदत ॥

English Thy feet resting on bejewelled pedestals and constantly tinged with the pollen (dropped from the flowers) of the garlands on the heads of princes, now rest on masses of Kusha grass cropped by the deer and the hermit

Bengali. আপনার যে পদদ্বয় পূর্ব্বে মণিময় পাদপীঠে স্থিত হইয়া নৃপতিবৃন্দের মস্তকস্থমাল্যস্থিতপুষ্পসমূহের পরাগে রঞ্জিত হইত, আজ সেই পদদ্বয় বনে মৃগগণ ও ব্রাহ্মণগণ কর্ত্তৃক অগ্রভাগ কর্ত্তিত হওয়ায় অতিমাত্র তীক্ষ্ণ কুশরাশির উপর অবস্থিত।

Word Notes-

अनारतम्—adv mod. अरञ्जयत्।

मणिपीठशायिनी—मणिपीठयोः शयितुं शीलम् अनयो' इति मणिपीठ+शी+णिनि (ताच्छील्ये), adj. to चरणौ। मणिमये पीठे (शाकपार्थिवादि)। मणिपीठयो. शयनशीलौ। सततकल्पितमृदुस्पर्शास्तरणयोः मणिमययो. पीठयोः असङ्कुचित सुखम अवस्थितौ इत्यर्थः।

अरञ्जयद्—रञ्ज्+णिच्+लङ् 3/1। (nom रजः and obj चरणौ) रञ्ज् is changed into रज before णिच् in the sense of hunting, as रजयति मृगान् व्याध.। रञ्जेर्णौ मृगरमणे नलोपो वक्तव्य।"

राज-शिरः स्रजा—राज्ञा शिरांसि तेषा or तेषु स्रजः। सृज्+क्तिन्—स्रज f. रज.—रञ्ज्+असुन् (करणे)। "रजो रेणु-परागयोः स्त्रीपुष्पे गुणभेदे च"।

निषेदुः—सङ्कुचिताङ्ग कथञ्चित् तिष्ठत, नि+सद+लट् 3/2 "सदिरप्रते' (८।३।६६) इति षत्वम्—The स् of सद is changed into ष् after an उपसर्ग ending in इ or उ but not after प्रति, as, विषीदति, न्यषीदत्, निषसाद &c, but प्रतिसीदति। लुङ्—असदत्, with नि—न्यषदत.

मृगद्विजालूनशिखेषु—(1) द्विजाश्च मृगाश्च (द्वन्द्व) इति मृगद्विजा, पूर्व्वनिपातशास्त्रस्य प्रायिकत्वात "अभ्यर्हितञ्च" इति द्विजशब्दस्य पूर्व्वनिपातो न भवति। तै आलूना: (श्यातन) शिखा येषा तानि (बहु)—acc to M (ii) "मृगाणा हरिणाना द्विजैर्दन्तैः आलूना. ईषच्छिन्ना शिखा अग्राणि येषा तानि मृगद्विजालूनशिखानि तेषु" —Chitrabhanu. The second exposition is decidedly better. Cf. प्राप मुदित-हरिणीदशन चतवीरुध वसतिम् ऐन्द्रसूनवीम्—XII 52 ["बर्हिषा वनेषु इत्यनेन पारुष्य, मृगद्विजालूनशिखेषु इत्यनेन चतकरणेन बर्हिषा रुधिरोतपादकत्व द्योत्यते। पूर्व्व पुष्परजसा रञ्जितौ चरणौ सम्प्रति विषमच्छिन्नदर्भस्पर्शजेन रुधिरेण रज्यते इति भाव"] Here बर्हिषाम् is connected with शिखा a part of the comp मृगद्विज etc Hence the comp. मृगद्विजालूनशिखेषु is irregular, the proper form being मृगद्विजालूनबर्हिःशिखेषु. The समास is to be defended by the dictum सापेक्षत्वेऽपि गमकत्वात् समास. मृगद्विज occurs frequently in the Ra'ma'yana in the sense of birds and beasts Ma'dhava says अत्र समासाद् बहि स्थिताऽपि बर्हिशब्द कस्य शिखेत्यपेक्षासामर्थ्यात् शिखाशब्देन सम्बध्यते। लूनशिखत्वे सति बर्हिषां कण्टकाकारत्वात् पादयोरुपरञ्जकत्व भवतीतीद' विशेषणम्।

बर्हिषाम् 6।3—बृह् pluck, tear + इस् [Cf. Nirukta VIII. 9. बर्हिः परिबर्हणात where परिबर्हणात् is thus explained by दुर्गाचार्य्य— "परिबर्हणात् परिच्छेदनात्, लूनं हि तद् भवति परिवृढं वा] Cf. Eng. hay from hew to cut The sacrificial ground on which oblations were poured on the fire was invariably spread over with 'barhis', hence the word came to mean 'fire' also

घण्टापथः—"अनारतम्" इति। 'अनारतम्' अजस्रं 'मणिपीठशायिनौ' मणिमयपादपीठस्थायिनौ 'यौ' चरणौ 'राजशिरःस्रजां' नमद् भूपाल मौलि स्रजां 'रजः' परागः 'अरञ्जयत्' 'तौ ते चरणौ' सम्प्रति द्विजेश्च तपस्विभि आलूनशिखेषु छिन्नाग्रेषु [मृगद्विजालूनशिखेषु] बर्हिषां कुशानाम्। "बर्हिः कुश हुताशयोः" इति विश्वः। 'वनेषु' 'निषीदतः' तिष्ठतः॥

> द्विषन्निमित्ता यदियं दशा ततः
> समूलमुन्मूलयतीव मे मनः।
> परैरपर्य्यासितवीर्य्यसम्पदां
> पराभवोऽप्युत्सव एव मानिनाम्॥ ४१॥

English Equivalents—द्विषन्निमित्ता [द्विषन्तः निमित्तं यस्याः सा] the cause of which is the enemy दशा—state, condition. उन्मूलयति—plucks out समूलम्—to its very roots परैः—by the enemy अपर्य्यासित-वीर्य्यसम्पदाम्—[अपर्य्यासिता वीर्य्यसम्पत् येषां तेषाम्] of those whose wealth of prowess has not been affected by the enemy पराभव—adversity, (lit defeat) उत्सव—festival. delight मानिनाम्—of persons possessed of self-respect

Prose-order यत् इयं दशा द्विषन्निमित्ता, ततः मे मनः समूलम् उन्मूलयति इव। परैः अपर्य्यासितवीर्य्यसम्पदां मानिनां पराभवोऽपि उत्सवः एव।

engali যেহেতু আপনার এই (শোচনীয়) অবস্থা শত্রুকর্তৃক কৃত, অতএব ইহা আমার মন সমূলে উন্মূলিত করিতেছে। যদি শত্রুকর্তৃক বীর্য্য ও সম্পৎ নাশিত না হয়, তাহা হইলে বিপদ্ ও মানীর পক্ষে উৎসবতুল্য।

English Because this state (of yours) has been caused by (your) enemies, it plucks out, from the very roots, my

heart, (for) as long as they are not deprived of their wealth or glory by their foes, heroes regard reverses as pure enjoyment

Elucidation This miserable condition of yours is not due to the freaks of fortune but to your enemies Had it been brought on by fate, I would have patiently submitted to it, but the fact that your enemies have thus dragged you down from your high state is gall and wormwood to me The very thought of it is enough to break my heart Affliction and adversity are the common lot of man and persons possessed of self respect welcome them, but when these are brought on by their enemies and all their strength and all their wealth are sapped by the machinations of foes, the case wears an entirely different aspect. It is then the imperative duty of every man worthy of the name to redeem his honour and recover his glory and wealth.

Word-Notes.

इयम्—अनुभूयमाना ईदृशक्लेशबहुला वनवासमयी।

समूलम्—मूलेन सह वर्त्तमानम् (बहु) तत् यथा स्यात् तथा। Alt form—सहमूलम् adv mod उन्मूलयति

उन्मूलयति—उत्+मूल (चुरादि)+लट् ति, nom दशा, obj मन.

परैः—अनुक्ते कर्त्तरि तृतीया verb—अपर्य्यासित।

अपर्य्यासित-वीर्य्य सम्पदाम्—वीर्य्यस्य सम्पत् (६ तत्) or वीर्य्यम् एव सम्पत् (कर्म्मधा) अपर्य्यासिता वीर्य्यसम्पत् येषां ते (बहु) तेषाम्—M Or (ii) वीर्य्यञ्च सम्पत् च वीर्य्यसम्पदौ, अपर्य्यासिते वीर्य्यसम्पदौ येषां ते, तेषाम् अपर्य्यासित—नञ् + परि + आस् + क्त (कर्म्मणि) or परि + अस् (दि प + णिच + क्त (कर्म्मणि) वीरस्य कर्म्म इति वीर्य्यम्। "वीर-वीर्य्यौ च" [पा ६।२।१२०] इति गण (सूत्र) पाठात् साधु इति चीरस्वामी। वीर + यत् heriosm, valour (वैरम् is formed with अण् in the same sense but the meaning is 'enmity' which is regarded as one of the characteristics of a hero)

पराभवः—परा + भू + अप् भावे। "ऋदोरप्"। Generally used in the sense of defeat, but here adversity, calamity.

उत्सवः—उत् + सु + अप् (भावे), festival, joy, a source of joy
मानिनाम्—मान + इनि (नित्ययोगे) मानिन् 6/3 कर्त्तरि षष्ठी ।

घण्टापथः ।—(1) ननु सर्व्वप्राणि साधारण्यामापदि का परिदेवना इत्यत्राह—"द्विषत्" इति । 'यत' यतः कारणात् 'इयं' 'दशा' अवस्था (2) "दशा वर्त्ताववस्थायाम् [वस्त्रांशे सूदशा अपि]" इति विश्वः । द्विषन्तः निमित्तं यस्याः सा [द्विषन्निमित्ता] । (3) "द्विषोऽमित्रे" [पा ३।२।१३१] इति शतृप्रत्ययः । 'सतो मे मनः' 'समूलं' निःशेषम् 'उन्मूलयति इव' उत्पाटयति इव । दैविकी तु आपत् न दुःखाय इत्याह—"परै" इति । 'परैः' शत्रुभिः अपर्य्यासिता अपर्य्यावसिता वीर्य्यसम्पद् येषां तेषाम् [अपर्य्यासितवीर्य्यसम्पदाम्] 'मानिनां' 'पराभवः' विपत् 'अपि उत्सवः एव' इति (4) वैधर्म्येण अर्थान्तरन्यासः । (5) मानहानिर्दुःसहा न तु आपत् इति भावः ॥

1 What is there to lament for in calamity, seeing that it is the common lot of all creatures ?—in reply to this [she] says 2 दशा means (a) a wick (b) condition and (c) [always plural] the threads at the end of a piece of woven cloth (छिला in Bengali) , as, (a) "गत एव न ते निवर्त्तते स सखा दीप इवानिलाहतः । अहमस्य दशेव पश्य माम् अविषह्यव्यसनेन धूमिताम् ॥" Ku IV 30 (b) नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण Me 109 (c) छिन्ना इवाम्बरपटस्य दशा पतन्ति ।

(3) शतृ is added to द्विष् in the sense of 'an enemy'

(5) सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।

यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥

When a general statement is strengthened or corroborated by a particular one, or a particular by a general, either under a resemblance or a contrast, the fig is अर्थान्तरन्यास In the present sl the particular statement about the peculiarly distressing nature of the misery brought on by the enemy is supported not by a general statement showing all sorrows due to enemies are doubly distressing but by one showing

the other side of the thing, viz., calamities are welcome to heroes provided they do not owe their origin to the enemy Other examples of वैधर्म्येण अर्थान्तरन्यास are Ki II 30, and—

इत्थमाराध्यमानोपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जन: ॥ Ku II. 40

Extracts from other commentaries

"रामादिभिराचरितं वनवासमधर्म्मं सद्भिर्विगर्हितं ज्ञातिवधं धर्म्मं मन्यसे क्लेशासहिष्णुतया साम्राज्यभोगाभिलाषेण च" इति धर्म्मात्मजस्य मतमाशङ्क्याह—द्विषन्निमित्तेत्यादि। कार्य्यनिष्पत्तौ स्वतन्त्रं कारणं निमित्तशब्देन उच्यते यथा घटादिनिष्पत्तौ कुलालादि:। अस्या दशाया द्विषता निमित्तत्वम् एव अस्ति न हेतुतामात्रम् इति द्विषन्तस्ते निग्राह्या एव इति [द्योत्यते]। समूलम्—मूलशब्देन आश्रय इह विवक्ष्यते, धैर्य्यविज्ञानादय मनस आश्रय, तानपि उन्मूलयति इत्यर्थ.। मन उन्मूलयति इत्यनेन मनस कार्त्स्न्येन उत्खननं प्रतीयते, न तदाश्रयस्य इत्यर्थाधिक्यविवक्षया समूलम् इत्युक्तम्। वृक्षमुन्मूलयति इत्युक्ते वृक्षस्यैव कार्त्स्न्येन उत्खननं प्रतीयते, न तदाश्रयभूताया भुवोऽपीति। इव—दुर्ह्रशाकृतस्य मनोविकारस्य दारुणतया दुर्निरूपत्वम् इवशब्दो द्योतयति। मन·—सङ्कल्पविकल्पात्मक मम मन एव शोकेन विकलीकृतं न सत्वात्मिका निर्णयहत्तिर्मति. अह वा, तेन कृत्याकृत्ये विविच्य निगदितम् इद वच प्रमाणम् एव इति भाव:।

वनवासादिकृतम् इद व्यसनं न गुरुनियोगदैवादिकृतं किन्तु नैसर्गिकद्वेषै: सपत्नै कृतम् परिभवत्वं प्रापितम्। तस्मादसौ क्लेशो दुसहो भवति। धर्म्मार्थ: परिक्लेशस्तु सीतादिभिरिव मया सह्यते इति तात्पर्य्यार्थ.।

मानविरोधितया क्लेश: मानिनामसह्यो भवति, न स्वरूपेण इत्यन्वय मुखेन उपपाद्य, व्यतिरेकमुखेण उपपादयति। मानिन:—मानेन नित्ययुक्ता व्यसनमपि उत्सवत्वेन जानन्ति न जातु व्यसनत्वेन। उत्सव:—विपदस्पृष्टाया. सम्पद: समयतायां गृहपतेर्नगरपतेर्वा—गृहे, नगरे, जनपदे वा तत्प्रतीतये तदीयैर्जनै: क्रियमाणो मङ्गलोत्तरो विधि. उत्सव:। सम्पदो विपदसम्पर्कं द्योतयितुम् उत्सव इत्युक्तम्।

एव—एवमुत्सवत्वप्रतीतेः व्यसनत्वप्रतीतिमिश्रतामेवकारो व्यावर्त्तयति। अपर्य्यासिते अपरिवर्त्तिते। प्रवृद्धवेगस्य सरित्प्रवाहादेः सेतुबन्धादिना झटिति प्रतिघातः परिवर्त्तनम्। वीराणां समुद्धाना भूभुजां सहसा सपत्नैः कृतो वीर्य्यसम्पत्प्रतिघातो यथा मानभङ्गहेतुर्भवति न तथा क्रमेण कृतो निगूढकृतो वा इति द्योतयितुम् अपर्य्यासित इत्युक्तम्, नाविरसितेत्यादि। अप्राप्तपरिभवाना गुरुनियोगविधायिनां रामादीना वनवासादिक्लेशो न क्लेशतया प्रत्यभात्, अस्माकं तु परैः परिभूताना राज्यात् परिच्यावितानां क्लेशो दुःसहतर इति तात्पर्य्याय। CHITRABHANU.

इय दशा अवस्था। द्विषन्निमित्ता द्विषन्तो निमित्तं यस्याः शत्रुकारणेति यत् यस्मात तत् तस्मात् इय दशा मे मनः समूलमुन्मूलयतीव अत्यन्तमाश्रयतीत्यर्थः। अथवा समूलमिवोन्मूलयति निर्मूलं निराधारमिव करोति। मूलमादिकारणं साहङ्कारमन उन्मूलयतीवेति। अहङ्कारो हि मनस कारणम्। द्विषन्निमित्तत्वादेव इय दशा दुःखङ्करोति नान्यथेत्यत आह—परैः शत्रुभिः अपर्यासितवीर्यसम्पदाम् अनुल्लाविक्रमसम्पदां मानिनां पराभवोऽपि [दारिद्र्य] मप्युत्सव एव। शत्रुभिरजितानां धर्माथिन्दानादेवदृशा यदि दारिद्र्य स्यात् तर्हि स उत्सव एव न तु दुःखप्रदः। तथाहि नीति "दानेन चीणवित्तस्य दारिद्र्यमपि शोभते। देवर्षिपितृपीतस्य चन्द्रस्येव कलाक्षय ॥" इति। तथाच "कलाशेषश्चन्द्र सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥" [नीतिशतक ५०] इति। तस्मादस्माकं परैर्ध्वसितवीर्यसम्पदाम् अमानिना च अस्य पराभवस्य अनुद्भवत्वात् इय दशा मे मन उज्ज्वलयतीति मनुादीपकोऽयमर्थः। अन्यो यथा युष्माकमपि वीर्यसम्पच्छत्रुभिः नाऽपनीता। तस्मादियमपि परैः अपर्यासितवीर्यसम्पदां मानिनश्च अत एव युष्माकमप्यय पराभव उत्सव एव। कथन्तर्हि दुःखहेतुरित्याह—द्विषन्निमित्ता शत्रुभिः बलादकृताऽपि दूरतश्छलेन कृतेति हेतोरियं दशा मे मन उन्मूलयतीव वीर्यसपत्तु तैर्नापनीतैव। अतो महद्दुःखमन्यथ वा योद्धव्यमिति स्तुतिरूपोय व्यवसायदीपकोऽर्थः॥ Vidyamadhava

विहाय शान्तिं नृप! धाम तत् पुनः
प्रसीद सन्धेहि वधाय विद्विषाम्।

व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

English Equivalents. धाम [धा + मनिन्] prowess सन्धेहि [सम् + धा + लोट् हि]—have recourse to अवधूय—having conquered, having given a wide berth to

Prose-Order. हे नृप, प्रसीद। शान्तिं विहाय तत (प्रसिद्धं) धाम (क्षात्रं तेजः) विद्विषां वधाय पुनः सन्धेहि (अङ्गीकुरु)। निःस्पृहाः मुनयः शत्रून् अवधूय शमेन सिद्धिं व्रजन्ति, भूभृतस्तु न।

Bengali হে নৃপ! প্রসন্ন হউন। শত্রুগণের বিনাশের জন্য পুনরায় সেই ক্ষত্রিয়োচিত তেজ অবলম্বন করুন। নিষ্কাম মুনিগণ কামাদি ছয় রিপুকে উপেক্ষা অথবা দমন করিয়া ক্রোধবর্জ্জনদ্বারা সিদ্ধিলাভ করেন, নৃপতিগণ নহে।

English Be pleased, O king, to cast away this calmness and resort once more to thy wonted valour for the destruction of thine enemies, (for) it is the sages and not the kings that attain salvation by means of tranquillity after giving a wide berth to their enemies (or subduing all passions)

Elucidation You are not a weakling without resources that you should thus meekly put up with all these indignities at the hands of the enemy Only a few short months ago, the world resounded with the heroic achievements of you and your brothers Cast off all this sloth, I pray you, and resume your wonted valour It is sages that thoroughly master anger and other emotions which are inimical to their progress in virtue and attain salvation through tranquillity of mind. Remember you are not a sage free from all worldly desires seeking salvation, but a Kshatriya prince steeped in the joys and sorrows of this world and such a course would be suicidal for a Kshatriya. Rouse yourself up to action and wipe out

the stain of your insult with the blood of your enemies and the tears of their wives

Word-Notes

विहाय – वि + हा + ल्यप् । शान्तिम्—शम् + क्तिन् (भावे) obj. to विहाय. "अनुनासिकस्य क्वि झलोः क्ङिति" (पा ६।४।१५)। Before क्वि and before an affix with an indicatory क् or ङ् beginning with झल् the penultimate vowel of a stem ending in a nasal is lengthened. तत्—प्रसिद्धम्। (See Intr.) adj to धाम

प्रसीद—प्र + सद् + लोट् हि। लुङ् – असदत्, लृट् – सत्स्यति।

वधाय—हन् + अप् (भावे)। तादर्थ्ये चतुर्थी or तुमर्थाच्च भाववचनात् इति चतुर्थी—(pp 40, 41) विद्विषाम् – वि + द्विष् – क्विप्। कृद्योगे कर्मणि षष्ठी।

व्रजन्ति—लुङ् अव्राजीत्। अवधूय + अव + धू + ल्यप्। भ्वा स्वा क्र्या उ, तु. प. Cf धूनोति चम्पकवनानि धुनोत्यशोकम्, चूत धुनाति धुवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानन धवति चन्दनमञ्जरीश्च ॥

लुङ् अधावीत्, अधविष्ट, अधोष्ट। निःस्पृहा —निरस्ता स्पृहा ये ते (बहु)। शम—शम् + घञ् भावे। "नोदात्तोपदेशस्य मान्तस्यानाचमेः" इति वृद्ध्यभाव।

देवराजयज्वोयम् ॥ उपसहरति—विहायेत्यादि। यस्मादेव भ्रातॄणां तव च सर्वेषा रिपुकृतात परिभावाद्द ष्टा दशा वर्त्तते ततो हेतो, प्रसीद। शान्तिं विहाय विद्विषा वधाय विद्विषो विहन्तु धाम सन्धेहि तेज पुन समाश्रय। अथ नाहं रिपुवधात् सिद्धिमिच्छामि किन्तर्हि शमेनेत्यवाह—शम नवधूयोपेत्य शान्त्या सिद्धिं मुनयो व्रजन्ति निःस्पृहत्वान्न तु भूभुज। भूभृतो राज्यशालचणा सिद्धिं शम ननुपेत्यैव कुर्वन्ति। विद्विषा वधायेति विघातायेतिवत ॥४२॥

विद्यामाधवीयम् ॥ विहा। एव दुःखान्युक्त्वा इदानीं कार्यमाह—त्वं शान्तिं विहाय शम त्यक्त्वा। तत्प्रधाम राजतेजः। पुनस्सन्धेहि पूर्वमपि त्वयि स्थितमेव त्वम् इदानीमेव मुनिवत्तिष्ठसि। तदनुचितम्। तत पुनरपि तदेव राजतेज. सन्धेहि संधारय। विद्विषा वधाय वध कर्तुम्। प्रसीद प्रसादं कुरु। यद्यपि त्व निःस्पृहः तथापि शत्रुवधाख्यं प्रसादं मयि विधेहीति भावः। वधायेति "हनश्च वधः" इति वधादेशः। "तुमर्थाच्च भाववचनात्" इति चतुर्थी। रामस्य दूषणमाह—

निःस्पृहाः निष्कामा मुनयो हि शमेन .लभते शत्रुजयं राज्यमिद्धिं च न लभन्त इत्यर्थः । मुनीनां तु सिद्धिर्मुक्तिः । अत एव प्रशमो मुनीनां सिद्धिहेतुः भूभृताम् असामर्थ्यहेतुरिति सिद्धम् । तदुक्तं रामेण "प्रशमश्च क्षमा चैव मार्दवं प्रियवादिता । असामर्थ्यं फलन्त्येते निर्गुणेषु सदा गुणाः ॥" इति [रामायणे ६।२१।१४] अत्राप्यभिप्रायद्वयं स्फुटमेव ॥४२॥

घण्टापथः ।—"विहाय" इति । हे 'नृप शान्तिं'* विहाय' 'तत्' प्रसिद्धं 'धाम' तेजः 'विद्विषां वधाय पुनः' 'सन्धेहि' अङ्गीकुरु । 'प्रसीद' । (1) प्रार्थनायां लोट् । (2) ननु शमेन कार्यसिद्धौ किं क्रोधेन इत्यत्राह—"व्रजन्ति" इति । 'निस्पृहाः मुनयः शत्रून्' 'अवधूय' निर्जित्य 'शमेन' क्रोधवर्ज्जनेन 'सिद्धिं † व्रजन्ति' भूभृतस्तु 'न' । (3) कैवल्यकार्यवत्‡ राजकार्यं न शान्तिसाध्यम् इत्यर्थः ।

(1) By the rule लोट् च (पा ३।३।१६२) [following the rule विधि-निमन्त्रणा मन्त्रणाधीष्ट सम्प्रश्न प्रार्थनेषु लिङ्] which enjoins लोट् when the agent either commands, invites, permits, politely expresses a wish, asks questions or prays , as, कटं तावद् भवान् करोतु, अमुत्र भवान् आस्ताम् , इह भवान् भुङ्क्ताम्, अधीच्छामो भवन्तं माणवकं भवान् उपनयताम् । किं नु खलु भो व्याकरणमध्ययै । भवति मे प्रार्थना व्याकरणम् अध्ययै ;

(2) Well what is the use of anger, if the object can be accomplished by peaceful means ? (3) Unlike salvation the affairs of a king cannot be managed peacefully

Remarks 1 In this sloka between the words of the principal sentence विहाय शान्तिं नृप धाम तत् पुनः and सन्धेहि वधाय विद्विषाम् another sentence viz प्रसीद has been inserted ' This gives rise to the defect known as गर्भितत्व which is described thus in the Ka'vyapraka'sa

गर्भितम्, यत्र वाक्यस्य मध्ये वाक्यान्तरमनुप्रविशति । यथा—

परापकारनिरतैर्दुर्जनैः सह सङ्गतिः ।
वदामि भवतस्तत्त्वं न विधेया कथञ्चन ॥

---

* अनुद्योगम्—A शमम्—B.

† मोक्षाख्यां—added in Bengal eds ‡ कैवल्यवद्—A.

अत्र तृतीयपादो वाक्यान्तरमध्ये प्रविष्टः।

Pradipa explains गर्भितं जातगर्भम्। अन्तः स्थितवाक्यान्तरं वाक्यमित्यर्थः।

When, however, some special purpose is served by such insertion of one sentence into the parts of another गर्भितत्व is not regarded as a defect In the present instance, with a view to propitiate the king who was once the monarch of all he surveyed and who might otherwise resent her presumption in offering him advice she inserts the word प्रसीद in the middle of the sentence, thus गर्भितत्व here does not amount to a defect.

The second half of the verse is construed by Chitrabhanu thus निस्पृहा मुनयः शमेन सिद्धिं व्रजन्ति न भूभुजः। [भूभुजः] शत्रून् अवधूय [सिद्धिं व्रजन्ति]। This construction gives rise to the defect known as सङ्कीर्णत्व which consists in the insertion into a sentence of words belonging to a different sentence Thus the Kávyaprakása says सङ्कीर्णं यत्र वाक्यान्तरस्य पदानि वाक्यान्तरमनुप्रविशन्ति। यथा—

> किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेमम्।
> ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्॥

अत्र पादगतं बहुगुणं हृदयनाथं किमिति न पश्यसि। इमं कण्ठे गृहाण मनसस्तमोरूपं कोपं मुञ्चेति।

In the present instance since शत्रून् अवधूय which is a part of another sentence भूभुजः शत्रून् अवधूय सिद्धिं व्रजन्ति is inserted in the sentence व्रजन्ति etc, we have सङ्कीर्णत्व Chitrabhanu says that since Draupadi's mind was diverted by her indignation against the enemy she uses these words first, so this does not amount to a defect but is a positive merit

ननु धाम सन्धत्तेति वाक्यस्य मध्ये प्रसीदेति क्रियान्तरोपादानात् वाक्यगर्भितत्वं नाम वाक्यदोषोऽत्र प्रतीयते इति चेदुच्यते। उत्सर्गोऽयमपवादेन बाध्यते। यत्र वक्ता रसान्तराचिप्ततया प्रकृतं वाक्यं परिसमाप्य वाक्यान्तरं वक्तुं न शक्नोति, तत्र वाक्यगर्भितत्वं गुण एव। यथा 'सिद्धा सापि' 'विप्राय प्रतिपाद्यते' इति वाक्यस्य

मध्ये "वदन्त एव हि वय रोमाञ्चिताः पश्यत" इति वाक्यान्तरोपादानम्, तथैवापि महाराजं प्रति धामधारणं विधेयतया निर्दिश्यतो महानुभावस्य तस्याकृष्यता-विशेषेण सहसा चकिता न प्रसादयितुं वाक्यमध्ये प्रसीदेत्याह। तस्माद् धर्मात्मज-धर्मपत्न्या विमर्शविशेष विभावयद् वाक्यगर्भितत्वं गुण एव। हिवदमर्षाचितहृदयतया द्रुपदात्मजा अव् नवधूरिति पूर्वमुक्तवती इति हेतुकतं वाक्यसङ्कीर्णत्वमपि गुण एवेत्यलं बहुना।

2 Mallinatha explains अवधूय as having conquered It is however, better to accept Devarajayajvan's explanation उपेक्ष्य so that the contrast may be complete.

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम्।
भवादृशाश्चेदधिकुर्व्वते रतिं*
निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

Eng. Equivalents. पुरःसरा [पुर + सृ + ट कर्त्तरि)]—foremost धामवताम् [धामन् lustre + मतुप्] among the spirited यशोधनाः [यश धनं येषां ते] whose wealth is glory निकार—insult, humiliation रतिम् [प्रीतिम्]—pleasure अधिकुर्व्वते—resort to. निराश्रया—without any refuge हता—lost. मनस्विता—high mindedness, magnanimity सुदुःसहम् [सु + दुर् + सह् + खल् (कर्म्मणि)] extremely unbearable.

Prose-order धामवतां पुरःसरा यशोधना भवादृशाः सुदुःसहम् ईदृशं निकारं प्राप्य रतिम् अधिकुर्वते चेत, हन्त मनस्विता निराश्रया [सती] हता।

English If leaders of high-spirited warriors crowned with glory, like you accept contentedly such intolerable insults, where, then, alas! shall this discarded high souled Chivalry find refuge? (It shall be lost)

Elucidation We do not expect chivalrous spirit in

* परां—Haradatta, Bhattoji, Chitrabhanu and others.

hereditary bondsmen. It is from noble kings like you, foremost among the illustrious and rich in glory, that we look for chivalry and heroic virtue Shou'd you, however, prove so dead to all sense of honour, so callous to all insults as to remain cheerful and contented under such unbearable affronts, high-mindedness and chivalry will become things of the past and "honour's voice be heard no more"

Word Notes

पुरःसरा —पुरः सरन्ति ये ते (उपपद)। पुरः – पूर्व + असि, पूर्व being changed to पुर् by the rule "पूर्वाधरावराणामसि पुरधवश्चैषाम्"।

भवादृशा —(See under sl 25 and 28). nom to अधिकुर्वते।

ईदृशम्—अयम् इव दृश्यते इति इदम् + दृश् + कञ् कर्मकर्त्तरि, with क्विन् ईदृश् and कस—ईदृक्ष इदम् is changed to ई by the rule इदं किमोरीश्की—ई and की are substituted for इदम् and किम् respectively, when दृक्, दृश् or the affix वतु follows कीदृक्, कीदृश, also कीदृक्ष..

निकार—नि + कृ + घञ् (भावे), निकृष्टीकरणम्। "निकारो विप्रकारः स्यात्।" Cf यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।

तत्तेजस्विपुरुषः परकृतनिकृतिं कथं सहते॥ N S'

अधिकुर्वते—अधि + कृ + लट् अन्ते। Nom भवादृशाः, obj एकम्। क्रियाफलस्य कर्तृगामित्वात् आत्मनेपदम्।

देवराजयज्वोयम्—भवतां क्रियानुरूप पश्चादभिभविष्यामीत्यवाह—पुरेत्यादि। तेजस्विनां पुरःसरा तथा यश एव धनं येषां त एवगुणविशिष्टा भवादृशाः सुदुस्सहमीदृशं निकारं परिभवं प्राप्य यदि पश्चात् परानधिकुर्वते शत्रूनभिभवन्ति तर्हि मनस्विता निराश्रया आश्रयमलभमाना सती हन्त हता। हन्त खेदे। मनस्विनस्ते परिभवमप्राप्यैव परानभिभवन्ति। तस्माश्च भवादृशा एवाऽऽश्रयाः। अधिकुर्वते इत्यर्थे प्रसहन इत्यात्मनेपदम्। यद्वा शत्रूणां निकारमनुसृत्य सर्वं सहे इत्याशङ्कायामुच्यतेऽयं श्लोकः। एवमभिमानिनो भवादृशा ईदृशं निकारं प्राप्य परानधिकुर्वते यदि तान् क्षमन्ते तदा मनस्विता हतेति। अत्रापि तेनैवाऽऽत्मनेपदम्।

पूर्वत्र प्रसहनार्थोऽभिभवः। अत्रापराजय। तदुक्तम् वृत्तौ [का० १।३।३३]—प्रसहनमभिभवोऽपराजयो वेति। पराजेतुं समर्थस्यैव क्षमया यस्तदभावःसोऽपराजयार्थः। क्वचिदधिकुर्वते रतिमिति पाठः। यदि परिभवं प्राप्य रतिमधिकुर्वते प्रीतिं प्रवर्तयन्तीत्यर्थः। रतेरधिकारः प्रवर्तनम् ॥ ४२ ॥

विद्यामाधवीयम्—त्वया परिभवः उपेक्ष्यते चेत् लोके कोऽपि मनस्वी नास्तीत्याह—पुर. इति। धामवतां तेजस्विनां पुरस्सरा अग्रेसरा "पुरोऽग्रतोऽग्रेऽष्विति" ट। यशोधना यश एव धनं येषां तथा एवभूता भवादृशाः पुरुषाः सुदुस्सहम् ईदृशं निकारं परिभवं प्राप्य परान् अधिकुर्वते चेत् शत्रून् प्रसहन्ते चेत्। "अधेः प्रसहने" इत्यात्मनेपदम्। अथवा परानधिकुर्वते "अधिरीश्वरे" इति कर्मप्रवचनीयसंज्ञा। शत्रूनीश्वरीकुर्वन्तीत्यर्थः। अनाश्रया आश्रयरहिता मनस्विता हता। भवद्विधा यद्यमनस्विनः तर्हि निराश्रयं मनस्वित्वं लोके नष्टमित्यर्थः। हन्त कष्टमिति खेदे। हन्त सूचनवाक्यादिखेदमोदानुकम्पने। मनस्विलक्षणमुक्तं भावविवेके—

"क्लेशैरुपहतस्यापि मानसं सुखिनो यथा।
स्वकार्येषु स्थितं यस्य मनस्वी स प्रमान्मतः ॥"

इति। अत्र यशोधनत्वादिस्तुतिः व्यवसायदीपनी। ईदृशः पराभवोऽयं मनस्विना त्वया क्षम्यत इत्यधिक्षेपो मन्युद्दीपकः ॥४३॥

घण्टापथः।—"पुर." इति। किं च धामवतां तेजस्विनाम्। परनिकारासहिष्णूनाम् इत्यर्थः। पुरः सरन्ति इति 'पुरःसराः' अग्रेसराः। (1) "पुरोऽग्रतोऽग्रेषु सर्त्तेः" [पा ३।२।१८] इति ट प्रत्ययः। 'यशोधना भवादृशाः' 'सुदुःसहम्' अतिदुःसहम 'ईदृशम्' उक्तप्रकारं 'निकारं पराभवं 'प्राप्य' 'रतिं' सन्तोषम् 'अधिकुर्व्वते' स्वीकुर्व्वते 'चेत्' तर्हि 'हन्त' इति खेदे। 'मनस्विता' अभिमानिता निराश्रया सती हता। (2) तेजस्विजनैकशरणत्वात् मनस्वितायाः इत्यर्थः। अतः पराक्रमितव्यम् इति भावः। (3) यद्यपि अत्र प्रसहनस्य असङ्गते अधिपूर्व्वात् करोतेः "अधेः प्रसहने" [पा. १।३।३३] इत्यात्मनेपदं न भवति। 'प्रसहनम् अभिभवः"*

---

* परिभवः—All, but cf. M. on Ku. II. 57, Bhatti VIII. 20.

इति काशिका। तथापि अस्याकर्त्रभिप्रायविवक्षायाम् एव प्रयोजकत्वात् कर्त्रभिप्राये "स्वरितञित —" [पा १।३।७२] इत्यात्मनेपदं सिद्धम्।

(1) सृ preceded by पुरस् अग्रतस् and अग्रे as उपपद's admit ट, पुरःसर, अग्रतःसर अग्रेसर, fem with ई (2) For spirited men are the only refuge of high-mindedness, hence you should have recourse to valour

(3) The rule अधेः प्रसहने enjoins Atm in the case of अधि + कृ in the sense of प्रसहन which means overpowering or defeating or tolerating Here the sense is evidently 'resorting to' hence the rule cited above does not apply M defends the Atm acc to the general rule स्वरितञितः कर्त्रभिप्राये क्रियाफले which lays down that any उभयपदी root is to be used in the Atm when the benefit of the action accrues to the agent Here the speaker wishes to imply that the क्रियाफल is कर्तृगामि, hence Atm Bhattoji gets over the difficulty by reading परान् for रतिम्. He remarks अधिपूर्वात् कृञः प्राग्वत् [i e Atm] अभिभवे क्षमायाञ्च। * * * एतेन "भवादृशाश्चेद् अधिकुर्वते परान्" इति भारविप्रयोगो व्याख्यातः, क्षमन्ते इत्यर्थात्। Cf Saravali अधिकुर्वते अवलम्बन्ते। सेवनेऽर्थे— "गन्धनावक्षेपण सेवन-साहसिक्य—" इत्यात्मनेपदम्। क्वचित् अधिकुर्वते परान् इति पाठः। परान् अधिकुर्वते, प्रसहन्ते उपेक्षन्ते इत्यर्थः। "अधेः प्रसहने" इत्यात्मनेपदम्।

The real explanation is that the subtle distinction of the two *padas* was not observed in practice, and any उभयपदी root is used in either *pada* irrespective of the person to whom the benefit of the action accrues कृ is उभयपदी, hence it has been used here in the Atm The rule अधेः प्रसहने directs that it is to be used exclusively in the Atm in the sense of 'overpowering'

अथ क्षमामेव निरस्त-विक्रम-
श्चिराय पर्येषि सुखस्य साधनम्।

विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकं
जटाधरः सन् जुहुधीह पावकम् ॥४४॥

English Equivalents. निरस्त विक्रम —Casting aside all prowess पर्य्येषि [परि+इण्+लट् सि] deem. साधनम्—instrument, means. लक्ष्मी पति लक्ष्म—the insignia of a king कार्म्मुकम्—bow जटाधर [धरति इति धरः, धृ+अच् पचादित्वात ; जटाना धर] the bearer of matted locks इह [इदम्+ह] in this forest. जुहुधि [हु+लोट् हि]—offer oblations to, worship.

Prose Order. अथ निरस्त विक्रम [सन्] चिराय चमाम् एव सुखस्य साधनं पर्य्येषि, [तर्हि] लक्ष्मीपतिलक्ष्म कार्म्मुक विहाय जटाधरः [सन्] इह पावकं जुहुधि (= अर्च्चय, धातूनाम अनेकार्थत्वात्) ।

Bengali. আর যদি চিরকাল ক্ষমাকেই সুখের সাধন বলিয়া বুঝিয়া থাকেন, তাহা হইলে রাজচিহ্ন এই ধনুঃ পরিত্যাগ করিয়া জটাধারণ-পূর্ব্বক এই বনে অগ্নিতে আহুতি প্রদান করিতে থাকুন ।

English But if you, casting aside your valour, think that forgiving patience alone is the source of (all) happiness, then throw away your bow, the sign of your royal power, and wearing matted locks, remain here worshipping the fire

Elucidation A Kshatriya among Kshatriyas, you cannot afford to forgive your enemies who have usurped your kingdom, insulted your wife and heaped all sorts of humiliations on you Sages who have severed all worldly ties, who are not moved by the grim antitheses of life, regard forgiveness and peace as the sole means of happiness Should you, therefore, be inclined to suffer all these insults and indignities tamely and forgive their authors, exchange your bow for a hermit's rod, and your close cropped hair for the matted' locks of a hermit and go on offering oblations to the fire in very forest.

Cf. क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥

Word-Notes

क्षमा—क्षम्+अङ् भावे स्त्रियाम्। षिद्भिदादिभ्योऽङ्—अङ् is added to roots which have an indicatory ष् and to the roots भिद् &c and the words thus formed are fem निरस्त-विक्रम.—निरस्तः विक्रमः येन सः (बहु)। निर्+अस्+क्त कर्मणि। अस्यति, आस्यत्, आस। वि+क्रम्+घञ्—विक्रम। वि+क्रम् Atm in the sense of walking on foot. साधु विक्रमते वाजी। चिराय—अव्यय। पर्यैषि—परि+इ+लट् सि। लक्ष्मीपतिलक्ष्म—लक्ष्म्याः पतिः, तस्य लक्ष्म (The base is लक्ष्मन् n)। कार्मुक—कर्मणे प्रभवति इति कर्मन्+उकञ्। पावकम्—पू+ण्वुल् (कर्त्तरि), कर्मणि २या।

देवराजयज्वीयम् ॥ अथ इन्यता मनस्विता तदपि सहे इत्याह—अथेत्यादि। एवमत्याग्रहिलतया निरस्तविक्रमः क्षान्तिमेव यदि चिरस्य सुखस्य साधनं पर्यैषि अवगच्छसि तल्लक्ष्मीपतिलक्ष्म राजचिह्नं धनुस्त्यक्त्वा जटाधरः सन्निह वने पावकं जुहुधि। मुनिभिः सहाऽऽहिताग्निर्भूत्वा वस। किं धनुषा पौरुषचिह्नेन कार्यम्। जुहुधीहि पाठे जुहुधि इहि गच्छेति लोकोक्तिमात्रम्। यद्वा पावकं गच्छ तमेव जुहुधीति। गमनहोमयो पावक एव कर्म। वंशस्थं वृत्तम् ॥

विद्यामाधवीयम् ॥ क्षमैव यदीष्टा तर्हि मुनिकर्म क्रियतामित्याह—अथ प्रश्ने। "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ।" निरस्तविक्रमस्त्वं क्षमामेव चिराय सुखस्य साधनं पर्यैषि अवगच्छसि। केचिद् गत्यर्था ज्ञानार्थाः। तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय जटाधरस्सन् पावकं जुहुधि मुनिवदग्निहोमं त्वया क्रियतामित्यर्थः। केचित्तु कार्मुकं कर्मणे समर्थं लक्ष्मीपतिलक्ष्म राजचिह्नं कवचं विहायेति व्याचक्षते। विक्रमस्तव निसर्गाद्गतः। स त्वया निरस्यत इति व्यवसायदीपकम्। राजा निर्विक्रमस्सन् मुनिवदग्निं जुहुधीति सोऽयमविक्षेपो मनुादीपकः ॥

घण्टापथः—"अथ" इति। 'अथ' पक्षान्तरे। 'निरस्त-विक्रम' सन्

'चिराय', चिरकालेनापि 'क्षमाम् एव' क्षान्तिम् एव। (1) "क्षितिः क्षान्त्योः क्षमा" इत्यमरः। 'सुखस्य साधनं' 'पर्याप्ति' भवगच्छसि तर्हि 'धनञ्जयोपहित-सहज' राजचिह्न कार्मुकं विहाय। धरतीति धरः, पचाद्यच्। जटानां धरः जटाधरः सन् इह वने 'पावकं जुहुधि' पावके होमं कुरु इत्यर्थः। (2) अधिकरणे कर्मत्वोपचारः। चिरकालस्य किं धनुषा इत्यर्थः। (3) "हुझल्भ्यो हेर्धिः" [पा. ६।४।१०१]।

(1) क्षमा means 'the earth' as well as 'forgiveness' (2) The locative of हु is here represented as the object, we generally say पावके (हविः) जुहोति but if we regard पावक as the object we may say पावकं जुहोति। "विवक्षावशात् कारकाणि भवन्ति"। Cf अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः। सर्वदा सर्वथाभावात् क्वचित् किञ्चिद् विवक्ष्यते॥ "अग्निं जुहोति स्म तदा मन्त्रवत् कृतमङ्गला"—Ra II 13 15 (3) हि is changed into धि after the root हु and after stems ending in झल् (any consonant except the semi-vowels and nasals), thus जुहुधि, भिन्धि, छिन्धि &c This 'dhi' (corresponding to Grk 'thi' is the older form of 'hi' Cf Vedic श्रुधि, कृधि &c हु—लिट् जुहाव, जुहवाञ्चकार etc लुङ् अहौषीत्।

Remark The last line, as Hemachandra points out, is an instance of the figure of speech known as लोकोक्ति न चारिह्वि वा विजयश्च हस्ते [रघु ५।२५] इति लोकोक्तिः। यथा किराते "जटाधरः सञ्जुहुधीह पावकम्", मेघदूते च "शेषान् मासान् गमय चतुरो लोचने मीलयित्वा" इति।

> न समयपरिरक्षणं क्षमं ते
> निकृतिपरेषु परेषु भूरिधाम्नः।
> अरिषु हि विजयार्थिनः क्षितीशा
> विदधति सोपधि सन्धिदूषणानि॥४५॥

Eng. Equivalents समय-परिरक्षणम्—observance of plighted troth. निकृति परेषु—bent on deceit भूरिधाम्न [adj to ते] of great might सोपधि—by means of fraud or deceit. विदधति—fasten.

Analysis. समयपरिरक्षणं ते न क्षमम् [भवति or प्रतिभाति] you ought not to abide by your promise. Why ? परेषु निकृतिपरेषु—because the enemy is bent on deceit [and has never been is never likely to be punctilious with you]. What about the consequences of my breaking my parole ? The consequences will not at all be disastrous because you are भूरिधामन् i. e. mighty. [You are more than a match for your enemy and can easily afford to do as you please, to keep your word with the enemy or to invent some pretence to justify the breaking of your promise just as it suits you convenience.] Have no scruples in the matter. This is the way of kings who want to conquer. क्षितीशा अरिषु सन्धिदूषणानि विदधति kings lay the blame for the breach of the agreement at the door of their foes. Do all kings do so ? No, only विजयार्थिनः—those who are bent on conquest. How do they do so ? सोपधि—artfully.

Prose Order. परेषु निकृतिपरेषु [सत्सु] भूरिधाम्नः ते समयपरिरक्षणं न क्षमम्। [तथापि] विजयार्थिनः क्षितीशाः अरिषु सोपधि सन्धिदूषणानि विदधति।

Bengali. শত্রু যখন শঠতাপরায়ণ আর আপনি যখন প্রভূত বিক্রমশালী, তখন আপনার পূর্ব্বপ্রতিজ্ঞা পালন করা উচিত নহে। বিজয়ার্থী নৃপতিগণ কপটতাসহকারে সন্ধির দোষ উদ্ভাবন করিয়া শত্রুর সহিত সংস্থাপিত সন্ধি ভঙ্গ করিয়া থাকেন।

English. You (are) full of prowess, (so it is not proper on your part to keep your agreement with your foes who are bent on faithlessness. For princes who desire to conquer, artfully contrive to shift the blame for the breach of agreement on to their foes.

"Plighted faith with faithless foemen
Should not fetter thee for shame.
Artful monarchs bent on conquest
Fasten on their foes the blame."

Elucidation. Don't be led away by the platitudes of moralists. Plighted troth is but empty words, treaties are but scraps of paper and consequently too much attention need not be paid to these trifles It is for the weak person to keep his word, to observe the treaty conditions , the strong man's will is law You are strong enough to pay Duryodhana back in his own coin, so away with this state of inaction, this life of exile Explain away your oath, find fault with the circumstances under which the oath was extracted from you and like the wolf in the fable who found fault with the lamb for drinking from the some stream and thus rendering the water turbid, you will never lack pretexts As Machiavelli says

"A prince, therefore, who is prudent, cannot and ought not to keep his parole, when the keeping of it is to his prejudice, and the causes for which he promised removed Were men all good this doctrine was not be taught, but because they are wicked and not likely to be punctual with you, you are not obliged to any such strictness with them , nor was there ever any prince that wanted lawful pretence to justify his breach of promise . .Nevertheless it is of great consequence to disguise your inclination and to play the hypocrite well. MACHIAVELLI, *The Prince* Chap XVIII

Word-Notes

समय-परिरक्षणम्—समयस्य (वनवासादिविषयस्य) परिरक्षण (कात्स्न्येन पालनम्) । प्रातिपदिकार्थे प्रथमा । For समय see p 177

क्षमम्—क्षम + अच् । निकृति शाठ्यं परं येषां तेषु (बहु) । "कुसृतिर्निकृति शाठ्यम् ।" For पर see p 211 One word for निकृतिपर—नैकृतिक ।

परेषु—भावे सप्तमी । भूरिधाम्न —भूरि (भू + क्रिन्) विपुल अतितम् अनन्यसाधारणम्, धाम (धा + मनिन्) तेजः यस्य तस्य, adj. to ते ।

अरिषु—विषये सप्तमी। विजयार्थिन—विजय + अर्थिं + णिनि (कर्त्तरि)। वि + जि + अच् (भावे)—विजय।

विदधति—वि + धा + लट् अन्ति। Imp विधेहि। लुङ् व्यधात्, व्यधासीत्। क्षितीशा -क्षितेः ईशाः। क्षि + क्तिन् (अधिकरणे)। ईश + क (कर्त्तरि)।

सोपधि—उपधिना सह वर्त्तमानं यथा स्यात् तथा adv mod विदधति

सन्धिदूषणानि—सन्धेः दूषणानि। सम् + धा + कि (भावे)। दुष् + णिच् + ल्युट (भावे)। Before णिच् the उ of दुष् is lengthened by the rule दोषो णौ The next rule वा चित्तविरागे enjoins that the lengthening is optional in the sense of चित्तविराग Thus चित्तं दूषयति, दोषयति वा, कामः।

देवराजयज्वीयम् ॥ अथ वनवासप्रतिज्ञोल्लङ्घनाद्बिभेमीत्यवाऽऽह—नेत्यादि। परेषु शत्रुषु निकृतिपरेषु वञ्चनातत्परेषु सत्सु महातेजसस्तव समयपरिरक्षणं न क्षमं न योग्यम्। कथमित्याह—हि यस्माद् ये विजयार्थिन क्षितीशास्ते निकृतिपरेष्वरिषु सोपधि सच्छल सन्धिदूषणानि कुर्वन्ति। किमपि व्याजमुत्पाद्य सन्धिभङ्गं कुर्वन्तीत्यर्थः। योऽसमर्थः स वचनं भक्त्वा किं कुर्यादित्यवोक्तम्—भूरिधाम्न इति। अन्ये त्वाहु—शत्रुषु वञ्चनातत्परेषु सतम् समयपरिरक्षणं न क्षमम्। स्वधान्वेषिवात्तेषां तव समयपरिपालन न शक्यमित्यर्थः। कथमस्मासु समयसन्धि भित्त्वा ते निकृति कुर्वन्तीत्यवाऽऽह—अरिषु हि विजयार्थिन इत्यादि। 'क्षितिक्षान्त्योः क्षमा युक्ते क्षमं शक्ते हिते त्रिषु।'

विद्यामाधवीयम् ॥ "सत्यधर्मव्यपेतेन न सन्दध्यात् कथञ्चन। सुसंहितोऽप्यसाधुत्वादचिराद् याति विक्रियाम् ॥" [९ ४२-४३] इति कामन्दकीयोक्तां नीतिम् अनुसृत्याऽऽह—

न समयेति॥ निकृतिपरेषु व्याजरतेषु। परेषु शत्रुषु। समयपरिरक्षणं सन्धिकालपरिपालन ते तव न क्षम न युक्तम्। अशक्तस्य तत् क्षमं किन्न स्यादित्याशङ्क्य आह—भूरिधाम्न महितपराक्रमस्य तव तन्नोचितमिति भाव। अन्यैरेवं न क्रियत इति मतिस्ते मा भूत्। यत बलादीन् सत्यधर्मव्यपेतान्स्तान् विश्वतिपुरुषानुक्त्वा "एतैस्सन्धिन्न कुर्वीत विगृह्णीयात् केवलम्। एते विगृह्यमाणा हि क्षिप्रं यान्ति

रिपोर्वधम् ॥" [का० ९।२२] इति कामन्दकीयमतमनुहत्य अर्थोऽपि सन्धिभङ्ग कुर्वन्तीत्याह—विजयार्थिन' चितीशा. अरिषु सोपधिसन्धिदूषणानि विदधति हि। परेषाम् अनार्यत्वे सति तद्दोषेण सोपधेः सव्याजस्य सन्धे' दूषणानि विध्वंसनानि कुर्वन्ति हि यस्मात् .."कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे। कुसृतिर्निकृतिश्शाठ्यम्" इत्यमरः। इति। इदं पुष्पिताग्राख्यमर्द्धसमवृत्तमुक्तम्। सर्गान्ते विभिन्नवृत्तस्य वक्तव्यत्वात्। तथाऽभिहित "सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्न-सर्गान्तैरुपेत लोकरञ्जनैः॥" इति ॥४५॥

घण्टापथ :—अथ समयोल्लङ्घनाद बिभेषि, तदपि न किञ्चित् इत्याह—"न" इति। 'परेषु' शत्रुषु। 'निकृतिः' शाठ्य 'परं' प्रधान येषु तेषु तथोक्तेषु अपकारतत्परेषु सत्सु 'भूरिधाम्नः' महौजस प्रतीकारक्षमस्य 'ते' तव समयः त्रयोदश स वत्सरान् वने वत्स्यामि इत्येव रूपा स वित्। "समया शपथाचार-कालसिद्धान्तस विदः" इत्यमरः। तस्य परिरक्षण प्रतीक्षण 'न क्षम' न युक्तम्। (1) "युक्ते क्षम शक्ते हिते त्रिषु" इत्यमरः। 'हि' यस्मात् कारणात् 'विजयार्थिन.' विजिगीषव' 'चितीशा' 'अरिषु' विषये 'सोपधि' सकपट यथा तथा। (2) 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्म-कैतवे" इत्यमरः। 'सन्धिदूषणानि विदधति' केनचिद्व्याजेन दोषमापाद्य सन्धि दूषयन्ति विघट्टयन्ति इत्यर्थ · (3) शक्तस्य हि विजिगीषो सर्व्वथा कार्य्यसाधनं प्रधानम्, अन्यत् समयरक्षणादिकम् अशक्तस्य इति भाव:। अर्थान्तरन्यासोऽलङ्कारः। (4) पुष्पिताग्रा वृत्तम्।

(1) क्षम means (a) proper, suitable, as here, or तन्नो यदुक्तम् अशिव न हि तत् क्षमं ते, (b) equal to a thing, able मलिनो हि यथादर्शो रूपालोकस्य न क्षमः, (c) friendly, favourable, स्वशंक्षम.

(2) कपट m n व्याज, m दम्भ m. उपधि m. (उप+धा+करणे कि) छद्मन् n and कैतव n —these are synonymous.

(3) For a person desirous of conquest, it is only the execution of his designs that matters, (he must never be too scrupulous as to the means he uses to achieve the end),

all else such as observing agreement etc. are of consequence only in the case of the weak.

(4) The metre is पुष्पिताग्रा which is thus defined—

अयुजि न-युग-रेफतो यकारो

युजि तु नजौ जरगाश्च पुष्पिताग्रा ।

i e The metre पुष्पिताग्रा contains in the odd lines (1st and 3rd) न, न, र, य and in the even lines न, ज, ज, र, ग

न			न			र			य		
⏑	⏑	⏑	⏑	⏑	⏑	–	⏑	–	⏑	–	–
अ	यु	जि	न	यु	ग	रे	फ	तो	य	का	रो
न	स	म	य	प	रि	र	च	णं	च	म	ते

न			ज			ज			र			ग
⏑	⏑	⏑	⏑	–	⏑	⏑	–	⏑	–	⏑	–	–
यु	जि	तु	न	जौ	ज	र	गा	श्च	पु	ष्पि	ता	ग्रा
नि	कृ	ति	प	रे	षु	प	रे	षु	भू	रि	धा	म्न

Extracts from Chitrabhanu

द्वाभ्यां बहुभिर्वा मिथ. संवादेन धर्मार्थं कृता प्रवृत्तिविशेषप्रतिज्ञा समय ।
ननु सद्भि. समयरक्षणार्थं यतितव्यमेव समयरक्षणस्याशक्यताशङ्कया समय-विरतिस्तु न युक्तेत्याशङ्का उत्सर्गविधिरपवादविधिना बाध्यत इत्याह— अरिष्वित्यादिना । वितु वाद असमाप्ति. स्वानुकूलसमयकरणं च इतीत्रवमाष्टीनि कर्माणि दूषणानीति बहुवचनेन द्योत्यन्ते । विदधति कुर्वन्ति । सन्धि नाद्रियन्त इति लभ्यते । अथवा दूषणशब्दो दोषार्थः । सन्ध' दूषणानि दोषान् विदधति आविष्कुर्वन्ति इत्यर्थ. । समयस्य पौरुषेयतया भ्रान्तिविप्रलम्भादिमूलत्वमुपपाद्य दोषत्व प्रकाश्य अनादरणीयतामापादयन्ति इति भाव: । सन्धिदूषणं न स्वफलेप्सया विधीयते किन्तु लोकगुप्त्यर्थमिति विदधतीति परस्मैपदेन द्योत्यते । तदेव विवृणोति—क्षितीश

इति। विधिनियमनरचणाद्यधिकृता. अचिया इत्यर्थः। विधिरचाविरोधी समयो मुनिविषयोऽपि अविद्याणामनादरणीय एव, रिपुविषय किं पुनरित्याह— विजयार्थिन इति।

विधि-समय-नियोगाद्दीप्ति-संहार-जिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः॥ ४६॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये प्रथमः सर्गः।

English Equivalents विधि-समय-नियोगात—by the decree of providence and the influence of time. दीप्तिस हारजिह्मम्—dull through the loss of splendour (glory) शिथिल वसुम्—(i) whose rays are decaying, (ii) whose wealth is decaying रिपु-तिमिरम्—enemy in the form of darkness उदस्य—having chased away, अगाध—fathomless

Prose-order विधि-समय-नियोगात् दीप्ति स हार जिह्मम, अगाधे आपत्पयोधौ मग्न, शिथिलवसु, रिपुतिमिरम् उदस्य उदीयमान त्वा, दिनादौ दिनकृतम् इव, लक्ष्मी भूयः समभ्येतु।

Analysis लक्ष्मी त्वां भूयः समभ्येतु। किम्भूत त्वाम् ? (i) दीप्तिस हारजिह्म (दीप्त्याः वीर्यतेजसो' संहारेण सङ्कोचेन जिह्मम् कुटिलम्, अन्यथाभूतम् इत्यर्थ)। दीप्तिस हारे हेतुम् आह—विधि समय-नियोगात् (विधिसमययो ईश्वरकालयो. नियोगात शासनात्), (ii) शिथिल-वसुम् (शिथिला चीणा वसवः धनानि यस्य तम्); (iii) अगाधे (अतलस्पर्शिनि अत एव दुस्तरे) आपत् पयोधौ (व्यसनसमुद्रे) मग्न (निपतितम्), (iv) रिपु तिमिरम (शत्रुरूपान्धकारम्) उदस्य (उच्छिद्य) उदीयमानम् (उद्यन्तम्)। कम् इव ? दिनादौ दिनकृतम् इव।

Bengali দৈব ও কালের নিয়োগবশতঃ তেজোনাশহেতু মলিন,

ক্ষীণ-রশ্মি, অতলস্পর্শী বিপৎসাগরে নিমগ্ন সূর্য্য প্রাতঃকালে স্বকীয় শত্রু অন্ধকারকে দূর করিয়া উদয়োন্মুখ হইলে লক্ষ্মী (শোভা) যেমন পুনর্ব্বার তাঁহাকে প্রাপ্ত হন, সেইরূপ দৈব ও কালের নিয়োগবশতঃ প্রতাপক্ষয় হেতু হীনবীর্য্য, ক্ষীণবিভব, বিপৎসাগরে মগ্ন শত্রুরূপ অন্ধকার নাশপূর্ব্বক অভ্যুদয়োন্মুখ আপনাকে রাজলক্ষ্মী পুনরায় আশ্রয় করুন।

English By the combined weight of fate and circumstances, (like the sun) you (are) "pale through glory lost" (and) with your lustre dimmed (have) sunk into the fathomless ocean of distress (But now) may your royal splendour come back to you, (as light comes to) the rising sun at the break of a (new) day, dispelling the darkness of (encircling) foes

> "Fettered by oath, and pale through glory lost,
> Of power bereft, on seas of troubles tossed,
> Arise, O king, thy mighty foemen quell,
> As wakes the sun, night's darkness, to dispel" *Dutt.*

The Simile Yudhishthira overtaken by disaster is compared to the sun which has set Both are shorn of their splendour—the one by the decree of fate combined with the weight of his oath, and the other by the dispensation of Providence and the influence of time , both are bereft of power—the one deprived of all his wealth, the other of his rays , both are plunged in the ocean—the one metaphorically, the other literally And just as the sun rises up from the ocean after dispelling his enemy and regains all his glory, so Yudhishthira is exhorted to strive afresh and rise up scattering all his enemies and recover his royal glory "Yudhishthira is compared with the sun, the misfortune of the king with the ocean , the majesty of the king with the heat of the sun , the riches of the king with the rays of the sun , the enemies of the king with darkness , and the prosperity of the king with the splendour of the sun " Prof. Goswámi.

Word-Notes

विधिसमयनियोगात्—हेतौ ५मी। विधिश्च समयश्च (द्वन्द्व) तयोः नियोगः (६तत्), तस्मात्। नियोग —नि + युज् + घञ् (भावे)। नियुङ्क्ते, न्ययुङ्क्त, न्युयुजत etc दीप्ति स ह्वार जिह्मम्—दीप्तेः स ह्वारः, तेन जिह्मम्। दी + भावे क्तिन्। दीप्यते, दिदीपे ; अदीपि, अदीपिष्ट। जिह्म—crooked, thence dark, pale

शिथिल वसुम्—शिथिल वसु [(1) धनम्, (2) रश्मि] यस्य (बहु) तम्। शिथिल —श्रथ + किरच्। (उणादि १।५३) loose, hence decaying. The word शिथिल shows the influence of the Prakrits The *r* of the root vocalised as ऋ gives the इ in the Prakrit

अगाधे—(1) नास्ति गाध स्थितिः अत्र (बहु) इति अगाध.—Kshirasvámin and Bhanuji Better (11) न गाध, तस्मिन् not fordable, from गाध् to dive, (गाह is the later form of this root.)

मग्नम्—मस्ज + कर्त्तरि क्त, मज्जति, अमाङ्क्षीत, ममज्ज, मङ्क्ष्यति।

आपत् पयोधौ—आपत् पयोधि इव (उपमितकर्म्मधा व्याघ्रे दिनकृतम् इव इति लिङ्गात)। रिपु तिमिरम—रिपु तिमिरम् इव (उपमित कर्म्मधा)

उदस्य—उत + अस् + ल्यप्। अस् preceded by an उपसर्ग is opt Atm "उपसर्गादस्यत्यूह्योर्वा।"

उदीयमानम्—उत + ईङ् + शानच् कर्त्तरि। ईयते, अयाञ्चक्रे etc, एष्ट।

दिनकृतम्—दिन + कृ + क्विप्। "ह्रस्वस्य पिति कृति तुक्" इति तकारागम।

भूय·—बहु + ईयस्। "बहोर्लोपो भू च बहोः"—the उ of बहु is dropped and बह् changed to भू superl. भूयिष्ठ Abstr. noun भूमन्

समभ्येतु—सम् + अभि + इ + लोट् तु। "आशिषि लिङ् लोटौ" इति आशिषि लोट्।

घण्टापथः।—उक्तमर्थम् आशीर्व्वादपूर्व्वकम् उपसंहरति—"विधि" इति। 'विधि-समय-नियोगात्' विधिः दैवम्। (1) "विधिर्विधाने दैवे च" इत्यमरः।

समयः कालः, तयोः नियोगात् नियमनात् हेतोः, तयोर्दुरतिक्रमत्वात् इति भावः। 'अगाधे' दुस्तरे। (2) आपत् पयोधिः इव इत्युपमितसमासः, दिनकृतम् इव इति वक्ष्यमाणानुसारात्। तस्मिन् 'आपत्पयोधौ' मग्नम् (3) 'सूर्यो हि साय सागरे निमज्जति अपरेद्युरुन्मज्जति' * इत्यागमः। ['दीप्तिस हारजिह्मम्'] दीप्तिः, प्रताप आतपश्च तस्याः स हारेण जिह्मम् अवसन्नम्, 'शिथिलवसु' शिथिलधनम् अन्यत्र शिथिल-रश्मिम्। (4) "वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ" इति वैजयन्ती। (5) 'शिथिलबलम्' इति पाठे तु उभयत्रापि शिथिलशक्तिकम् इत्यर्थः। रिपुः तिमिरम् इव इति 'रिपुतिमिरम्' उदस्य निरस्य 'उदीयमानम्' उद्यन्तम्। "ईङ् गतौ" इति धातोर्दैवादिकात् कर्त्तरि शानच्। 'त्वा दिनादौ दिनकृतम् इव लक्ष्मीः भूयः' 'समभ्येतु' भजतु। (6) "आशिषि लिङ्लोटौ" [पा॰ ३।३।१७३] इति लोट्।

(7) चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्द-प्रयोगः। यथाह भगवान् भाष्यकारः [1 3 1]—"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते† वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्ति, अध्येतारश्च प्रवक्तारो भवन्ति" इति। (8) पूर्णोपमेयम्। (9) मालिनी वृत्तम्। (10) सर्गान्तत्वाद्वृत्तभेदः। यथाह दण्डी—

सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसन्धिभिः।
सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम्॥ ‡ [K D I 18 19] इति।

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति—"इति" इत्यादि। 'इति' शब्दः परिसमाप्तौ। 'भारविकृतौ' इति कविनामकथनम्। 'महाकाव्ये' इति महच्छब्देन लक्षणसम्पत्तिः सूचिता। 'किरातार्जुनीये' इति

* सूर्योऽपि साय सागरे मज्जति परेद्युरुन्मज्जति—All except A

† महाभाष्य, however, reads वीरपुरुषकाणि भवन्ति आयुष्मत्पुरुषकाणि च, अध्येतारश्च सिद्धार्था यथा स्युः।

‡ Next line—काव्यं कल्पान्तरस्थायि जायते सदलङ्कृति।

काव्यवर्णनीययो. कथनम्। 'प्रथम सर्ग:' समाप्त: इति शेष:। एवम् उत्तरत्रापि द्रष्टव्यम्।

(11) किरातार्जुनौ अधिकृत्य कृतो ग्रन्थ' किरातार्जुनीयम्। "शिशुक्रन्द-यमसभ-द्वन्द्वेन्द्रजननादिभ्यश्छ." [पा ४।३।८८] इति द्वन्द्वात् छ-प्रत्यय.। राघवपाण्डवीयम् इतिवत्। (12) तथाहि अर्जुन एवात्र नायक:, किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णित.। यथाह दण्डी—

वंश-वीर्य्य प्रतापादि* वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथन च धिनोति न ॥ [K D. I. 22]

अथाय स ग्रह

(13) नेता मध्यमपाण्डवो भगवतो नारायणस्याशज
स्तस्योत्कर्षकृते त्ववर्ण्यततरा दिव्य किरात पुन.।
शृङ्गारादिरसोऽङ्गमत्र विजयी वीर प्रधानो रस
शैलाद्या'नि च वर्णितानि बहुशो दिव्यास्त्रलाभ फलम् ॥

इति श्रीमहामहोपाध्याय-कोलाचल मल्लिनाथसूरि विरचितायां किरातार्जुनीय-
काव्यव्याख्यायां घण्टापथसमाख्याया प्रथम' सर्ग समाप्त:।

(1) विधि means (i) decree and (ii) fate (2) आपत-पयोधौ is to be dissolved as an उपमित कर्मधा and not as a रूपक, because in a *rupaka* the उपमेय is identified with the उपमान, but here the two have been kept distinct as is clear from दिनकृतमिव त्वाम् (3) The sun also plunges into the ocean in the evening and rises up next day—so say the Vedas (4) See p 114 (5) If we read शिथिलबलम् (for शिथिलवसुम्) the meaning is 'with strength undermined' in both cases (6) Both लिङ् and लोट् are used to convey a blessing

(7) The word लक्ष्मी is used in the last sloka of each canto, because it affords agreeable surprise and also serves

* K D. reads श्रुतादीनि which is decidedly better

as an auspicious introduction Says the reverend author of the Mahabhashya—Shastras beginning with auspicious words ending with auspicious words and with auspicious words in the middle gain celebrity and wide publicity, make people heroic and long lived, and the readers become efficient speakers

(8) The fig of speech is पूर्णा उपमा i e Upama' in which the उपमान, उपमेय, साधारण धर्म्म and उपमावाचक शब्द are all explicitly stated Here the उपमान is दिनकृत् (०तम्), the उपमेय—युधिष्ठिर ('त्वाम'), साधारण धर्म्म – मग्नत्व, ०जिह्मत्व etc , उपमावाचक शब्द—इव. Cf. प्रदीप on K P X 1 यत्रोपमानोपमेयसाधारणधर्म्माणामुपमाप्रतिपादकशब्दस्य च.पादान सा पूर्णा , एतच्चतुष्कमध्ये एकस्य द्वयोस्त्रयाणा वा अनुपादान यत्र सा लुप्ता ।

(9) The metre is Malini of which the formula is ननमयययुतेय मालिनी भोगिलोकै It consists of the following groups न न म य य Caesura after the eighth syll

न			न			म			य			य		
‿	‿	‿	‿	‿	‿	–	–	–	‿	–	–	‿	–	–
न	न	म	य	य	यु	ते	य	मा	लि	नी	भो	गि	लो	कै
वि	धि	स	म	य	नि	यो	गा	द्दो	ति	म	हा	र	जि	ह्म

In this sloka the metre has been changed from वंशस्थ to मालिनी because it stands at the end of the canto. For Dandin says A ka'vya composed of cantos not very prolonged of metres sweet to the ear, and of nice turning points, each canto marked by a different metre at the end and thus pleasing to the people, embellished with nice figures of speech [lasts till the dissolution of the world]

(11) See p 1 Intro (12) Arjuna is the hero of this

poem, the hunter has been described as his (rival) antagonist to show his superiority. Dandin says :- After describing the family, prowess and valour (as a foil) of the enemy also, the description of the superiority of the hero by means of his ***victory over his enemy pleases us***

There are two ways of delineating the hero of an epic Either he may be depicted as possessed of all the virtues that the most exalted being can lay claim to, and his antagonist steeped in all the vices that the most corrupt imagination can devise, or his antagonist may also be described as possessed of many excellences such as noble descent, prowess, heroism etc and the hero's superior excellence brought out by depicting his triumph over such a noble and heroic rival In our poem the mere fact that Arjuna put up such a tough fight with the God of Gods, raises him inestimably in the opinion of the readers

(13) The hero of the poem is the third Pa'ndava (Arjuna), the partial incarnation of Lord Na'ra'yana, the divine hunter has been so well depicted only to serve as a foil to his (Arjuna's) greatness, the sentiments of love etc are subsidiary, the main sentiment being the heroic which reigns supreme , mountains, moon-rise etc have been been variously described and the object of the poem is (Arjuna's) acquisition of the divine (Pa'shupata) weapon.

Cf M 's introduction to his टीका on शिशुपालवध—

नेतास्मिन् यदुनन्दनः स भगवान् वीरः प्रधानो रस
शृङ्गारादिभिरङ्गवान् विजयते पूर्णा पुनर्वर्णना ।
इन्द्रप्रस्थगमाद्युपायविषयश्चैद्यावसाद फल
धन्यो माघकविर्वयं च कृतिनस्तत्सूक्तिसंसेवनात् ॥

Extracts from other commentaries

एव द्विषद्विषयस्याभियोगस्य कर्त्तव्यता द्विषत्कल्पितस्य समयस्योपेक्षणीयतां चोपपाद्य लोकरक्षैककृत्यानां विनिपातो न चिरस्थितिरभ्युदयानुबन्धी चेति द्योतयन्ती दिव्यानुभावा धर्मात्मजधर्मपत्नी पौरुषदुर्वारमदृष्टप्रतिबन्धमाशीर्वचनेन परिवर्त्तयति—विधिसमयेत्यादिना। लक्ष्मीस्त्वां भूय समभ्येतु। पूर्वनिवृत्ताया एककर्त्तृकाया क्रियाया' पाश्चात्यतां भूयःशब्दो द्योतयति पुनःशब्दवद्, न त्वनुशब्दवत् पाश्चात्यतामात्रम्। तेन प्रतिकूलेन हेतुना परिवर्त्तिताया लक्ष्म्या अनुकूलेन प्रत्यापत्तिमात्रमाशास्यम्, न प्राप्तिरेवेति द्योत्यते। समभ्येतु सम्यगभिगच्छतु। अभिगते सम्यक्त्वं सूचयता समित्युपसर्गेण लक्ष्म्या' परिवृत्तिपरिभवविपद स्पर्शो द्योत्यते। अभिना त्वाभिमुख्यद्वारेण लक्ष्मीप्राप्तेरव्यवधानं व्यञ्जयता स्वविक्रमजिता लक्ष्मीस्तवोचिता नान्यविक्रमकल्पिता, न सामादिसाध्या वेति द्योत्यते। पूर्वार्धेन लक्ष्मोपरिच्युते कारणमाह—दीप्तिसंहारजिह्ममिति। उत्तमाह्नप्रवर्तयित्री चित्तवृत्तिस्तेजश्च दीप्ति शब्दार्थे। अत्रोभयं विवक्षितम्। दीप्त्या वीर्यतेजसो संहारेण सङ्कोचेन जिह्मं कुटिलमन्यथाभूतमित्यर्थः। दीप्तिसंहारे हेतुमाह—विधिसमयनियोगादिति। विधिसमययोरीश्वरकालयोर्नियोगच्छासनात्। प्राणिपुण्यापुण्यसाक्षी ईश्वर इह विधिशब्देन विवक्ष्यते, प्राणिपुण्यापुण्यपरिपाचकः कालः समयशब्देन। 'विभाषा गुणेऽस्त्रियाम्' [१।३।२५] इति हेतौ पञ्चमी। नियोगस्य क्रियारूपस्यापि द्रव्याश्रितत्वेन गुणत्वमुपचर्यते। ईदृशकर्मायमिदं कुर्यात् इदमनुभवेदितीश्वरस्य कालस्य च सङ्कल्पो नियतफलत्वान्नियोगशब्देनेह विवक्ष्यते। न त्वीश्वरो राजादिवदव्यवधानेन व्यवधानेन वा किञ्चिन्नियुङ्क्ते। ईश्वरादन्यस्त्वद्वीर्यतेजसो सङ्कोचं कर्त्तुं न शक्नुयादित्यर्थः।

विधिसमयकृतस्तदा युधिष्ठिरस्य बुद्ध्यवसाद इति भारतेऽपि द्रौपदीवचस्येव प्रतीयते—"ममो धातं विधातं च यौ मोहं चक्रतुस्तव। पितृपैतामहे राज्य बोढव्ये तेऽन्यथामति' ॥" इत्यादौ।

शिथिलदशमिति। शिथिला विसंस्था दशा अवस्था यस्य स शिथिलदशः तम्।

दशायद्दोऽवस्थासामान्यविषयोऽप्यत्र सामाज्यलक्षणाऽवस्थाविशेषे पर्यवस्यति। अपचिति. कितवैर्हि धर्मिर्यतार्थमाहृत इति लभ्यते। अगाधे अदृष्टतले गम्भीरे। आपत्पयोधौ व्यसनसमुद्रे। मग्नमवपतितम्। मज्जनाधिकरणत्वोपपत्तये दुस्तरत्वप्रतिपत्तये चापद पयोधित्व रूपित, न पयोधिसादृश्यमात्र कृतम्। यथा समुद्र. सर्वाम्भसामाधारस्तथा व्यसन सर्वदु.खानामायतनमित्यर्थविशेष द्योतयितु पयोधावितुयक्तं न समुद्र इति। द्यूतपराजयराज्यपरिभ्रश वनवासादिक्लेशमयेन महीयसा व्यसनेन सञ्छन्नसर्वशक्तिमित्यर्थ.। विधिसमयनियोगेन दीप्तिसहारसेनान्तर्बहिर्जिह्मता बुद्धावसादो धर्षणीयता च, तया दशागेयित्व्यम्, तेन आपत्पयोविमज्जनमिति पूर्वपूर्वमुत्तरोत्तरस्य कारणमित्युक्तिक्रमेण द्योत्यते।

युधिष्ठिराभिप्रायबुभुत्सया क्लेशासहिष्णुतया च महाराज प्रति मतिभ्रमादिदोषारोपणमनुचितमनुशासन च कृतवती स्त्रीक्तिक्रमैरविकृत गरीयसी भर्त्तुराशयमालक्ष्य सवैलक्ष्या विमृश्य धर्मात्मजवर्मपत्नी 'विधिहेतुकस्तव विनिपातो न स्वदोषकृत' इति परमार्थकथनेन महाराज भर्त्तार प्रसादयतीत्यय चार्थो विधिसमयेत्यादिना द्योत्यत एव। व्यसननिमग्नस्य लक्ष्मीप्रत्यापत्त किं निमित्तमिति तत्राह—रिपुतिमिरमुदस्योदीयमानमिति। रिपव एव तिमिर रिपुतिमिरम्। रिपूणा तिमिरत्वेन रूपणं कृतम्, न तिमिरसादृश्य कृतम्। तेन भलीमसास्तमोरूपास्ते रिपव उच्छेद्या एव, न जातु सन्धेया जेया वेति द्योत्यते। उदस्येति उत्साहेनोत्कर्षेण च क्षिप्रा उच्छिद्येति लभ्यते। उदस्येति क्त्वा प्रत्ययेन रिपूच्छेदानन्तरमुदयो भवतीति रिपूच्छेदस्योदयं प्रति नियतकारणत्व द्योत्यते।

उदीयमानमुद्यन्तम्। उदीयमानमिति लट् प्रत्ययेनोदयसमकालमेव लक्ष्मीप्राप्तिर्नानन्तर कालान्तरे वेति प्रतीयते। रिपूच्छेदोदययोर्भावितया कर्तव्यतया च विधेयत्वेऽप्यनुवादेन प्रकारत्व गम्यते। स्वराज्यप्राप्तिरुदय.। लक्ष्मीप्राप्तिस्तु करादानप्रत्यापत्ति। 'ईङ् गतावि'ति पठितस्य श्यन्विकरणस्यात्मनेपदिनो धातोरीयमानेति रूपम्। महत्तरव्यसनमग्नस्यासहायस्य कुत उदयो लक्ष्मीप्राप्तिर्वेति तत्राह—दिनादौ दिनकृतमिवेति। यथा दिनकृत उदेतु न सहायापेक्षा तथैव भवतोऽपीति भाव:। दृष्टान्तेऽपि विशेषणानि योजनीयानि। ईश्वरस्य नियोगाद् दिनकृतोऽपि

दीप्तिसंहारो भवति। अहोरात्रादिरूपस्य स्थूलस्य कालस्य कर्त्ताप्यादित्य. परेण कालेन निगम्यत इति कालनियोगोऽपि तद्दीप्तिसंहारस्य हेतुरेव। दीप्तिसंहारेण जिह्मता प्रतापह्रास, तेन विश्वप्रकाशनरूपाया दशाया शैथिल्य तेनात्ममयरूप पयोधिमज्जनमिति दृष्टान्तेऽपि हेतुक्रमो योजनीय'। दृष्टान्तगत पयोधिमज्जन प्रातिभासिक न पारमार्थिकम्। तेन दार्ष्टान्तिकगतमापन्मज्जनमपि प्राकृतैर्जनै' प्रतीयत इत्येव, न वास्तवमिति विपत्तावपि तस्य सपत्नोच्छेदनशक्तिरक्षोणैवेति द्योत्यते। प्रकाशिताशेषविषय श्रौतस्मार्त्तलौकिकक्रियानिदान दिन कुर्वत आदित्यस्येव विश्वव्यवस्थाविभागमूल सकलक्रियाप्रयोजक साम्राज्यमधितिष्ठतस्तव पुनरुदतमनुद्यमे भुवनमेव विनश्येद इत्यवश्यम् उदेतुमुद्यम कर्त्तव्य एवेति च दिनकृद्दृष्टान्तेन द्योत्यते। दिनकरस्योदय प्रसिद्ध एव। लक्ष्मीस्तु पङ्कजविकासजगतप्रकाशनादिरूपा तस्योदयस्य फलम्। शारद दिनकर प्रभात एव लक्ष्मीरभिगच्छति न हैमनमिति शारदेन दिनकृता साम्य द्योतयितु दिनादावित्युक्तम्। दृष्टान्तगतेन दिनादावित्यनेन दार्ष्टान्तिके लक्ष्मीप्राप्तिहेतुर्दैवप्रसादोल्लास आक्षिप्यते। दिनकृतमिवेति दिनकरेण सादृश्यमुक्तम्, न तु तत्त्व रूपितम्। तेन दिनकराद युधिष्ठिरस्य भेदप्रतीतेस्तदुदयस्य पुनरस्तमयापर्यवसायित्व प्रतीयते। त्रियामावसान एव दिनकरस्योदयो न मध्यरात्रे इति दिनकृद्दृष्टान्तमुदाहरन्त्या द्रौपद्यापि समयावसान एव पुनरुदेतुमुद्यमो विधितसित इति व्यज्यते। समयावसाने द्विषदभियोगाय महाराज प्रवर्त्तयितु मुनिरूवासेनास्य मन्युर्मन्दो मा भूदिति तया तदानी तन्मन्युरुद्दीपन कृतमित्यविरोध'। लक्ष्म्या युधिष्ठिरेऽनुरागातिशयं द्योतयितु' समभिगमे लक्ष्म्या कर्त्तृत्वमुक्त न युधिष्ठिरस्य। एतदुक्त भवति—य एवं विधिवैपरीत्येन परिवर्त्तितदीप्तिप्रतापसम्पदीदृश्या विपदा वशीकृत, तमेव त्वामचिरभाविना विध्यानुकूल्येन समुन्मूलितसपत्नम् अनन्यगामिनी अनुरागिणी अभ्युदयानुबन्धिनी साम्राज्यलक्ष्मी समभिसरत्विति। विधिसमयनियोगशब्दो दीप्तिसंहारशब्देन समासान्तर गतेनाप्याकाङ्क्षादिवशात् सम्बध्यते, यथा देवदत्तस्य गुरुकुलमित्यत्र देवदत्तशब्दो गुरुशब्देन।

अस्य महाकाव्यस्यान्ते "दिनकृतमिवोच्चैरुपजग्मु." [१८।४१] इति धनञ्जय-

[illegible] [illegible] [illegible], अत्र तु युधिष्ठिरोक्तेति युधिष्ठिरधनञ्जययोः [illegible]रिति—तत्रैतत्सर्वं ऐकार्थ्यं च योत्स्यते।

किञ्च सर्वेष्वपि 'सर्वे' लक्ष्मीशब्दम् चादौ श्रीशब्दं च अभिप्रायं प्रयुञ्जानस्य कवितल्लोकमात्र [illegible] भारवेरभिप्रायो विविच्यते। [illegible] नैकाश्रयां सुरेन्द्रादयनुमतां [illegible] [illegible] श्रीशब्दस्तु [illegible] [illegible] परम[illegible]मिति लक्ष्मी[illegible] [illegible]मनुगमेन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] श्रीशब्दस्यादावुपादानेन [illegible] [illegible] श्रीपद[illegible] [illegible] [illegible]रानुपादकतया प्रतिविधि[illegible] इति प्रतीयते। [illegible] [illegible] [illegible] च निग्रमेन प्रयुक्तानां [illegible] नरानुपादकस्य [illegible] [illegible] प्रतिपादिता [illegible] [illegible]पोह्यं [illegible]

[illegible] [illegible]चौर्मोरः स्वलाश्रितश्रीललनस्य तस्य।
[illegible] बभूव सर्वाङ्गस निम्नपरैव लक्ष्मीः ॥

[illegible] श्रीलक्ष्मीशब्दयोरर्थविशेषो विवक्षित इति प्रतीयते। नरकवधे "लक्ष्मी-[illegible] अपि मममूर्तिमये हरिं साध्वसवान् ददर्श" इत्यत्र लक्ष्मीश्री-शब्दयोरर्थविशेषः स्फुट एवेत्यलं बहुना ॥ ४६ ॥

A description of the Land of the Uttarakurus.

उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ।
ततः काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः ॥
नीलवैडूर्यपत्राभिर्नद्यस्तत्र सहस्रशः ॥
रक्तोत्पलवनैश्चात्र मण्डिताश्च हिरण्मयैः ।
तरुणादित्यसदृशैर्भान्ति तत्र जलाशयाः ॥
महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः ।
नीलोत्पलवनैश्चित्रैः स देशः सर्वतो वृतः ॥

निर्मलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः।
उद्भूतपुलिनास्तत्र जातरूपैश्च निम्नगाः॥
सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः।
जातरूपमयैश्चापि हुताशनसमप्रभैः॥
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः।
दिव्यगन्धरसस्पर्शाः सर्वकामान् स्रवन्ति च॥
नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः।
मुक्तावैदूर्य्यचित्राणि भूषणानि तथैव च॥
स्त्रीणां चाप्यनुरूपाणि पुरुषाणां तथैव च।
सर्व्वर्तुसुखसेव्यानि फलन्त्यन्ये नगोत्तमाः॥
महार्हाणि च चित्राणि हैमान्यन्ये नगोत्तमाः।
शयनानि प्रसूयन्ते चित्रास्तरणवन्ति च॥
मनःकान्तानि माल्यानि फलन्त्यत्रापरे द्रुमाः।
पानानि च महार्हाणि भक्ष्याणि विविधानि च॥
स्त्रियश्च गुणसम्पन्ना रूपयौवनलक्षिताः।
गन्धर्व्वाः किन्नराः सिद्धा नागा विद्याधरास्तथा॥
रमन्ते सहितास्तत्र नारीभिर्भास्करप्रभाः।
सर्व्वे सुकृतकर्म्माणः सर्व्वे रतिपरायणाः॥
सर्व्वे कामार्थसहिता वसन्ति सहयोषितः॥
गीतवादित्रनिर्घोषः सोत्कृष्टहसितस्वनः।
श्रूयते सततं तत्र सर्व्वभूतमनोहरः॥
तत्र नामुदितः कश्चिन्नास्ति कश्चिदसत्प्रियः।
अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः॥
समतिक्रम्य तं देशमुत्तरः पयसां निधिः।
तत्र सोमगिरिर्नाम मध्ये हेममयो महान्॥

Ra. किष्किन्ध्या XLIII.